पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन-
राष्ट्रियसंस्कृतसंस्थानेन सम्मानितम्

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

श्रीमद्ब्रह्मसूत्रभाष्यम्

श्रीजगन्नाथयतिविरचितभाष्यदीपिका-सूत्रदीपिकासहितम्

(चतुर्थाध्यायः)

सम्पादकः
विद्वान् पि.वि. उपाध्यायः
ग्रन्थपालकः , पूर्णप्रज्ञसंशोधनमन्दिरम् बेङ्गलूरु - २८

प्रकाशनम्
पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - २८

२००९

पूर्णप्रज्ञसंशोधनमन्दिरम्
नवदेहलीस्थमानवसंसाधनविकासमन्त्रालयाधीन-
राष्ट्रियसंस्कृतसंस्थानेन सम्मानितम्

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम्

श्रीमद्ब्रह्मसूत्रभाष्यम्

श्रीजगन्नाथयतिविरचितभाष्यदीपिका-सूत्रदीपिकासहितम्

(चतुर्थाध्यायः)

सम्पादकः

विद्वान् पि.वि. उपाध्यायः

ग्रन्थपालकः , पूर्णप्रज्ञसंशोधनमन्दिरम् वेङ्गलूरु - २८

प्रकाशनम्

पूर्णप्रज्ञसंशोधनमन्दिरम्
पूर्णप्रज्ञविद्यापीठम्, वेङ्गलूरु - २८

२००९

पूर्णप्रज्ञसंशोधनमन्दिरग्रन्थमाला – ६३

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम् **श्रीमद्ब्रह्मसूत्रभाष्यम्**

श्रीजगन्नाथयतिविरचितभाष्यदीपिका-सूत्रदीपिकासहितम् (**चतुर्थाध्यायः**)

सम्पादकः

विद्वान् पि.वि. उपाध्यायः

ग्रन्थपालकः, पूर्णप्रज्ञसंशोधनमन्दिरम् वेङ्गलूरु - २८

This Publication is brought out by the generous financial help of

Rashtriya Sanskrit Samsthan,
(Deemed University),
New Delhi

प्रकाशनम् -

पूर्णप्रज्ञसंशोधनमन्दिरम्

पूर्णप्रज्ञविद्यापीठम्, कत्तरिगुप्पा मेन्‌रोड्, वेङ्गलूरु - २८

पुटानि	: ४७ + १९०
प्रथममुद्रणम्	: २००९
मुद्रितपुस्तकसङ्ख्या	: १०००
मूल्यम्	: १०० रूप्यकाणि
मुद्रणालयः	: वृन्दावन मुद्रणालयः, वेङ्गलूरु

POORNAPRAJNA SAMSHODHANA MANDIRAM

Recognised by Rashtriya Sanskrit Samsthan, (Deemed University)
Ministry of H.R.D., Govt. of India, New Delhi

ŚRIMAD BRAHMASŪTRA BHĀṢYAM

of

Sri Madhwacharya

with Bhashyadeepika and Sutradeepika of

Sri Jagannathayati

(Chapter IV)

Editor :

Vidwan P.V. Upadhyaya

Curator, Poornaprajna Samshodhana Mandiram,
Bangalore-28

Publisher :
Poornaprajna Samshodhana Mandiram,
Poornaprajna Vidyapeetha, Bangalore -560 028

2009

Poornaprajna Samshodhana Mandiram Series No. 63

ŚRIMAD BRAHMASŪTRA BHĀṢYAM (Chapter IV)

of Sri Madhwacharya with Bhashyadeepika and Sutradeepika of Sri Jagannathayati.

Editor :
Vidwan P.V. Upadhyaya
Curator, Poornaprajna Samshodhana Mandiram,
Bangalore-28

Published by :

Poornaprajna Samshodhana Mandiram
Poornaprajna Vidyapeetha, Katriguppa Main Road,
Bangalore-560 028

This Publication is brought out by the generous financial help of

Rashtriya Sanskrit Samsthan,
(Deemed University),
New Delhi

Pages	: 47+190
First Edition	: 2009
Copies	: 1000
Price	: 100/-
Printed by	: Brindavana Printers, Bangalore

अनुग्रहसन्देशः

वेदार्थनिर्णायकन्यायग्रथनात्मकानि हि ब्रह्मसूत्राणि भगवद्-बादरायणप्रणीतानि नैकभाष्योपजीवकानि विद्वत्प्रवरैः सन्ततम् अध्ययन-योग्यानि विराजन्तेतमाम् । तदेतेषां ब्रह्ममीमांसासूत्राणां भाष्याणि नैकाचार्यप्रणीतानि दृश्यन्ते । तत्र श्रीमदानन्दतीर्थभगवत्पादाचार्य-विरचितं भाष्यं समुचितश्रुतिस्मृत्युदाहरणेन पुष्टं गभीरया शैल्या परमत-विमर्शनसत्सिद्धान्तस्थापनदक्षं च विराजते । अस्य च श्रीमज्जयतीर्थ-पूज्यचरणप्रणीता स्वाचार्याशयव्याख्या विभवप्रदर्शनपरा व्याख्या तत्त्वप्रकाशिकानाम्नी समुल्लसति । अस्याः गाम्भीर्यं श्रीमद्व्यासतीर्थ-श्रीमच्चरणप्रभृतिभिः षड्दर्शनाचार्यैः सुष्ठूपवर्णितम् । अत्र भाष्योदाहृत-श्रुतिस्मृतीनां प्रतिपदार्थविवरणमपेक्ष्यते अद्यतनमन्दाधिकारिभिः श्रुत्यध्ययनव्याख्यानसम्प्रदायविकलैः । इयं च दीपिका भाष्योदाहृत-प्रमाणव्याख्यापरा प्राचीनव्याख्यानविमर्शनकुतूहला च श्रीजगन्नाथ-तीर्थप्रणीता विदुषां विद्यार्थिनां महते उपकाराय कल्पत इति पूर्णप्रज्ञ-संशोधनमन्दिरद्वारा मुद्रापिता । यद्यपीयं दीपिका प्रायश्चत्वारिंशद्वर्षेभ्यः पूर्वमेव श्रीमद्व्यासराजमठाधीशैः यशःशरीरैः श्रीविद्यापयोनिधितीर्थ-श्रीपादैः मुद्रापिताऽऽसीत् । परमिदानीं ग्रन्थानामनुपलम्भाद् विदुषां विद्यार्थिनां चाभ्यर्थनां पुरस्कृत्य अस्मदादेशेन संशोधनमन्दिरद्वारा यावच्छक्ति संशोध्य मुद्रापितः । गतवर्षे समन्वय-अविरोधाध्यायौ भाष्यदीपिकासमलङ्कृतौ मुद्रापितावास्ताम् । इदानीं तृतीय-तुरीयाध्यायावपि सिद्धाविति समेषां विदुषाम् अध्ययन-अध्यापने सूपकुर्वन्तीति विश्वसिमः ।

अस्मत्प्रियशिष्यं वेङ्कटरमणोपाध्यायं श्रद्धया संशोधनकर्मणि व्यापृतम् अस्मदाराध्यः श्रीकृष्णः आयुरारोग्यप्रदानेन समनुगृह्णात्वित्याशास्महे ।

श्रीविश्वेशतीर्थश्रीपादाः

श्रीपेजावरमठाधीशाः

उडुपि

Director's Note

Bhashyadeepika of Sri Jagannatha Yati of Sri Vyasaraja Matha, spead new light on Brahmasutra-Bhashya. He has elloberately explained the references (Shruti and Smrti) quoted by Sri Madhwacharya which are not been explained in previous commentaries. Sri Swamiji quoted Tattvapradeepa views in almost every Adhikarana and examined the explanations given by early commentators. Some times he simply reject the views of few commentators and present his own and creative ideas views in Bhashya and Tattvaprakashika.

The source of inspiration behind this useful venture is our founder H.H. Sri Sri Vishveshatirtha Swamiji. To him we owe all we have and all we will have. How can we repay him for his support and encouragement except through our gratitude and Pranamas.

We gratefull to Prof. Radha Vallabh Tripathi Vice-chancellor, Rashtriya Sanskrit Samsthan (Deemed University), New Delhi, for his help and guidance at every step of our activities.

I will be failing in my duty, if I donot express my thanks to Sri C.S.Kaniyal Finance Officer of Rashtriya Sanskrit Samsthan, New Delhi for his anytime cooperation in all our venture.

I also thank Prof. D. Prahlada Char, Chairman, Poornaprajna Samshohana Mandiram Managing Committee, for his kind support in our academic activities.

I heartely congratulate the able editor for his valuable Vidwan P. Venkataramana Upadhyaya.

I thank M/s. Brindavan Printers who have printed neatly in a short span of time. I hope they extend the same co-operation in future also.

Dr. A.V. Nagasampige
Director.

पीठिका

श्रीमद्व्यासराजविद्यासिंहासनाधीश्वराः पद-वाक्य-प्रमाणपारावार-पारीणाः श्रीमन्तः जगन्नाथयतयः (१७५५-१७७०) माध्ववाङ्मये अद्यापि स्वीयापूर्वप्रबन्धैः यशःकायेन जीवन्ति। तेषामियं भाष्यदीपिका चतुर्था-ध्यायात्मिका इदानीं विदुषां करकमलयोः समर्प्यते। परविद्यांशब्द-मुख्यार्थानां ब्रह्मसूत्राणां वैशिष्ट्यमधिकृत्य विदुषां न किमपि वक्तव्यम् अस्ति। तदिदानीं माध्वभाष्यानुसारेण चतुर्थाध्यायसारः (फलस्वरूपं) सङ्ग्रहेण निरूप्यते।

भाष्यदीपिकावैशिष्ट्यम् -

भाष्यदीपिकास्थाः द्वित्रा विषयाः निरूप्यन्ते। अस्य च वैशिष्ट्यमेवं सङ्ग्रहेण निरूप्यते-

१. भाष्यगतपाठभेदसूचनं तदर्थविवरणं च।

२. तत्त्वप्रकाशिकोक्तवाक्यार्थसंयोजनपुरस्सरं तत्त्वप्रदीपोक्त-वर्णकान्तरसङ्ग्रहणम्।

३. भाष्योदाहृतश्रुतिस्मृतीनां प्रतिपदार्थविवरणम्।

५. क्वचित् टिप्पण्यन्तराशयानुवदनम्। क्वचिच्चाभिप्रायभेदप्रकाशनम्।

६. सर्वमूलटीकाग्रन्थेषु आपाततः प्रतीयमानविरोधपरिहरणम्।

चतुर्थाध्यायसारः

ब्रह्मसूत्रभाष्ये चतुर्थेऽध्याये फलं निरूप्यते। वैराग्य-भक्ति-उपासना-ज्ञानेन मुक्तिरूपं फलं साधकस्य भवति। तत्र मुक्तिर्नाम कीदृशीति श्रीमद्भागवते तत्स्वरूपं प्रतिपादितम् -

'मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः'

(भाग. २.१०.६) इति।

सात्त्विको जीवः ज्ञानानन्दवीर्यादिगुणरूपः। यद्यपि संसारावस्थायां ज्ञानानन्दादयो जीवगुणा नानुभूयन्ते अनाद्यविद्यावृतत्वाद् अदृष्टाश्रुतवस्तुत्वाच्च। तदुक्तम्-

अतः परं यदव्यक्तमव्यूढगुणबृंहितम्।
अदृष्टाश्रुतवस्तुत्वात् स जीवो यः पुनर्भवः ॥(भाग.१.३.७२)इति।

जीवस्वरूपावरणानि षडुक्तानि शास्त्रे। तानि च यथा-

१. अविद्या-

सत्त्वादिगुणात्मिका भावरूपाविद्या। 'बध्नन्ति नित्यदा मुक्तं मायिनं प्रकृतिं गुणाः' इति भागवतोक्तेः।

२. कामः-

'आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय' इति गीतोक्तेः।

'तथा कामनिरुद्धोऽयम् उच्चावचतया भ्रमन्।' इति भागवतोक्तेश्च।

३. प्रारब्धकर्म -

'अनादिकर्मणा बद्धो जीवः संसारमण्डले।
वासुदेवेच्छया नित्यं भ्रमतीति हि तद्वचः ॥'

४. स्वगुणाच्छादिका -

५. परमाच्छादिका -

'अथान्ये प्रकृती दुष्टे नृषु प्रातिस्विकं स्थिते ।
स्वगुणाच्छादिका त्वेका परमाच्छादिका परा ।।'
(भाग.ता. १०.९४.१५) इत्युक्तेः ।

६. लिङ्गशरीरम्-

एकं पञ्चविधं लिङ्गं त्रिवृत् षोडशविस्तरम् ।
एष चेतनया युक्तो जीव इत्यभिधीयते ।।
अनेन पुरुषो देहान् उपादत्ते विमुञ्चति ।।
(४.२९.७६) इति भागवतोक्तेः ।

एकं लिङ्गशरीरं षोडशविस्तरम् । प्राणेन्द्रियान्तःकरणभेदेन त्रिवृत् । कथं पञ्चविधम् ? त्रिधा भिन्नया पञ्चविधया युतम् । पञ्चप्राणाः पञ्च-ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनसा सह षोडशविधम् ।

एवं, 'न ऋते त्वत्क्रियते' (ब्र.सू.अ.- पृ. २६१) इत्यनुव्याख्यान-व्याख्यावसरे 'परमेश्वरो अचिन्त्याद्भुतया स्वशक्त्या जीवस्वरूपचैतन्य-माच्छादयति' (न्या.सु.- पृ. २६६) इति सुधोक्तेः ईश्वरेच्छाऽपि सप्तमी प्रतिबन्धिकाऽऽवरणरूपा विद्यत इत्यवगन्तव्यम् ।

एवं चैतादृशावरणैः बद्धो जीवः स्वीयमप्राकृतमानन्दं विद्यमानमपि अभुञ्जन् संसरति अनुभवति च दुःखम् । विद्यया चावरणानि हित्वा भगवत्प्रसादेन मुक्तिमाप्नुयात् ।

अङ्गचतुष्टयुक्तो मोक्षः

कर्मक्षयः, उत्क्रान्तिः, मार्गः, भोग इति चत्वारि मुक्तिसोपानानि । तदुक्तम्- 'कर्मक्षयः तथोत्क्रान्तिः मार्गो भोगचतुष्टयम् ।' (अनु. ४.१.१)

इति । अत्र प्रथमपादे प्रथमेऽधिकरणे सर्वदा श्रवणादेः कर्तव्यता समर्थ्यते । ब्रह्म गुणपूर्णमिति सर्वदा स्वामी इति च सर्वदोपास्यम् । भगवदङ्गोत्पन्नदेवैः तत्तदङ्गाश्रितत्वेनोपासना कार्या । ध्यानादिकं मनस एकाग्रतासाधके पवित्रे देशे आसीनेन कार्यमिति समर्थ्यते ।

कर्मक्षयः-

अपरोक्षज्ञानोत्तरं प्रथमतः कर्मक्षयो भवति । तदुक्तम्-

'तदधिगमे उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्'

(ब्र.सू. ४.१.१३) इति ।

अयमाशयः- मोक्षयोग्यैः क्रियमाणं कर्म द्विविधम् । पुण्यं पापं चेति । पुण्यमपि प्रवृत्तनिवृत्तभेदेन द्विविधम् । प्रवृत्तं स्वर्गादिफलकम् । ज्ञानात्पूर्वभावि निवृत्तं कर्म अपरोक्षज्ञाननिदानम् । तदुत्तरं तु मुक्तावानन्दातिशयकारणम् । अपरोक्षज्ञाने जाते सञ्चितपापस्य नाशो भवति । तदुक्तम्-

'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन' (भ.गी.) इति ।

अत्र पापनाशो नाम द्विषतां प्रदानमेव । केषाञ्चित्स्वरूपतोऽपि नाशः विद्यते । एवमनिष्टपुण्यस्य कूपतटागादिनिर्माणजस्य सुहृद्भ्यः प्रदानम् । तदुक्तम्-

'अतोऽन्यदपीत्यकेषामुभयोः'(ब्र.सू. ४.१.१७) ।

प्रारब्धकर्मणस्तु भोगेनैव क्षयः । तदुक्तम्- 'प्रारब्धकर्मणोऽन्यस्य ज्ञानादेव परिक्षयः' (स.शा.सं.) इति । प्रारब्धस्यापि संविदा उपमर्दो भवति । तदुक्तं भागवते- 'न वै जनो जातु कथञ्चनाव्रजेत् मुकुन्दसेवी अन्यवदङ्ग संसृतिम्' (भाग. १.५.१९) इति ।

उत्क्रान्तिः-

उत्क्रान्तिमार्गौ प्रायेण देवकक्ष्याबहिर्भूतानामेव। तदुक्तम्- 'उत्क्रान्ति-मार्गौ देवानां न प्रायेण भविष्यतः।' (ब्र.सू.अनु.) इति। देवेतराणां ब्रह्मनाड्या चरमशरीरादुत्क्रान्तिः। देवानां तु स्वोत्तमेषु प्रविश्य देहत्यागेन चतुर्मुखद्वारा परमात्मनि प्रवेशः।

प्रारब्धानुभवानन्तरं हृदिस्थहरेः तेजसा हृदयाग्रे प्रकाशो जायते। प्राणाद्यशेषपरिवारविशिष्टः हृदयस्थो भगवान् तदा जीवमादाय प्रकाश-द्वारेण ब्रह्मनाडीं प्रविशति। मूलाधारं समारभ्यामूर्धानमृजुस्थिता सुषुम्ना-नाड्येव पञ्चप्रभेदिनी ब्रह्मनाडीत्युच्यते। तत्राप्रतीकालम्बनानां देवादि-व्यतिरिक्तानां सुषुम्नानाडीमध्यादुत्क्रमणम्। तदा हृदयाग्रं प्रद्योतते। तत्र वायुः पुरतो गच्छति। तमनु जीवमादाय परमात्मा। तदुक्तम्-

'तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनु-स्मृतियोगाच्च हार्दानुगृहीतः शताधिकया।' (ब्र.सू. ४.२.१७) इति।

देवानां स्वोत्तमेषु लय इत्युक्तम्। तत्र द्वौ मार्गौ गरुडमार्ग-शेषमार्ग-भेदेन। तत्रत्यः क्रमः-

मनुष्योत्तमानां निर्ऋतेश्च **यमे**
यमस्य पितृवैवस्वतादीनां **स्वायम्भुवमनौ**
अग्रेः **सूर्ये**
सूर्याकाशपृथिवीनां **गुरौ**
मनु-गुरु-दक्ष-शचीनाम् **इन्द्रे**
इन्द्रस्य **सौपर्ण्याम्**
सौपर्ण्यर्याः **गरुडे**
गरुडमार्गः

गन्धर्वाणां **कुबेरे**
शतस्थानामश्विनोश्च **वरुणे**
कुबेर-वरुणयोः **सोमे**
सोमस्य विष्वक्सेनादीनां च **अनिरुद्धे**
रत्यनिरुद्धसनकादीनां **कामदेवे**
कामदेवस्य **वारुण्याम्**
वारुण्याः **शेषे**
शेषमार्गः

गरुडस्य सरस्वत्याम् शेषस्य सरस्वत्याम्

सरस्वत्याः विरिञ्चे

दिरिञ्चस्य लक्ष्मीद्वारा नारायणे लयः

तदेतत्सर्वमुक्तम्- 'वाङ्मनसि दर्शनात् शब्दाच्च' (ब्र.सू. ४.२.१) अत एव च सर्वाण्यनु. (४.२.३) सोऽध्यक्षे तदुपगमादिभ्यः (४.२.४) 'भूतेषु तच्छ्रुतेः' (४.२.५) इत्यादिसूत्रेषु ।

मार्गः

आदौ शरीरादुत्क्रान्तोऽर्चिर्लोकं गच्छति । अर्चिर्लोके चार्चिर्नामाग्नि-सुतोऽग्निर्ज्योतिरिति रूपद्वयेन तिष्ठति । तत्रादावग्निनामकं द्वितीयं रूप-मेति । प्रत्युद्गमादिभिर्भगवत्पूजा च पूर्ववदेव सर्वलोकेषु भवति । एवमर्चिर्लोके द्विरूपेण संस्थितमग्नेः सुतमर्चिर्नामानं देवं प्राप्य तत आतिवाहिकलोकं गच्छति । तत्रातिवाहिकलोकनामानं वायुपुत्रं ततोऽहरभिमानिलोकं ततः शुक्लपक्षाभिमानिलोकं तत उत्तरायणाभिमानिलोकं ततः संवत्सराभिमानि-लोकं ततो विद्युदभिमानिलोकं ततो वरुणलोकं ततः प्रजापतिलोकं ततः सूर्यलोकं ततः सोमलोकं ततो वैश्वानरलोकं तत इन्द्रलोकं ततो ध्रुवलोकं ततो भारतीलोकं ततो वायुलोकं गच्छति । तत्र च वायुदेवप्रसादेन भगवद्ध्यानादिसुखसम्भृतमनाः जीवः बहुकालं तिष्ठति ।

तदुक्तम्-

उत्क्रान्तस्तु शरीरात् स्वात् गच्छत्यर्चिषमेव तु ।
ततो हि वायोः पुत्रं च योऽसौ नाम्नाऽतिवाहिकः ॥
ततोऽहः पूर्वपक्षं चाप्युदक्संवत्सरं तथा ।
तटितं वरुणं चैव प्रजापं सूर्यमेव च ॥

सोमं वैश्वानरं चेन्द्रं ध्रुवं देवीं दिवं तथा ।
ततो वायुं परं प्राप्य तेनैति पुरुषोत्तमम् ॥
(ब्र.सू.भा. ४.३.५) इति ।

एवं जीवः चतुर्मुखब्रह्मणा सह विरजायां कृतस्नानः त्यक्तलिङ्गशरीरश्च स्वरूपशरीरेण भगवदुदरे ध्यानङ्गतः तिष्ठति । सृष्टिकाले भगवदुदरस्थित-लक्ष्म्यात्मकश्वेतद्वीपानन्तासनवैकुण्ठलोकानां भगवदुदरात् पुनः ब्रह्माण्डे स्थापिते तत्र श्वेतद्वीपपतिं परवासुदेवं दृष्ट्वा अपसृतभगवदिच्छारूप-सप्तमावरणः स्वरूपशरीरेण अमन्दमानन्दमनुभवन् यथायोग्यं भूमौ अन्तरिक्षे स्वर्गे श्वेतद्वीपादौ तिष्ठति ।

भोगः -

मुक्तिरियं सालोक्य-सामीप्य-सारूप्य-सायुज्यभेदेन चतुर्विधा ।

१. सालोक्यम्-

भगवल्लोकावस्थानं विना भूम्यादिषु स्थित्वा परमात्मसन्निधाननिमित्तेन (दर्शनेन वा) भोगः सालोक्यमुच्यते । अत्र मनुष्योत्तमा अधिकारिणः । तदुक्तम्- 'केचिदत्रैव मुच्यन्ते नोत्क्रामन्ति कदाचन' इति ।

२. सामीप्यम् -

भगवत्सामीप्यविशेषाद् भोगविशेषवन्तः ऋष्यादयः सामीप्यभाजः । तदुक्तं भाष्ये- 'तत्रापि क्रमयोगेन ज्ञानाधिक्यात् समीपगाः' इति ।

बृहद्भाष्ये च-

'उपासनाबलान्मुक्तो भोगान् कर्मफलान् सदा ।
भुङ्क्ते विष्णोः समीपस्थो सर्वदोषविवर्जितः ॥' इति ।

३. सारूप्यम् -

'सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेशनिष्काभरणाः सुपेशसः ।' (भाग. २.९.११) इति द्वितीयभागवतोक्तदिशा विष्णोरिव चतुर्बाहवः शङ्ख-चक्रायुधसमलङ्कृताः शोभन्ते । सारूप्यपदयोग्याश्च जय-विजयादयो द्वारपालाः ।

४. सायुज्यम् -

स्वोत्पत्त्यङ्गेषु प्रविश्य तत्रैव स्थित्वा भगवच्छरीरे भोगानुभवः सायुज्यमुच्यते ।

'आदत्ते हरिहस्तेन हरिदृष्ट्यैव पश्यति ।
गच्छेच्च हरिपादाभ्यां मुक्तस्यैषा स्थितिर्भवेत् ॥'
(ब्र.सू.भा. ४.४.५) इति ।

अत्र देवानां स्वस्वोत्तमप्रवेशेन परमात्मशरीरेण च भोगः । चतुर्मुखस्य तु परमात्मशरीरप्रवेशेनैव भोगः । तदुक्तम् अणुभाष्ये-

'उत्तरेषूत्तरेष्वेवं यावद्वायुं विमुक्तिगाः ।
प्रविश्य भुञ्जते भोगान् तदन्तर्बहिरेव वा ॥
वायुर्विष्णुं प्रविश्यैव ॥' (स.शा.सं.) इति ।

एतत्तु प्रायिकम् । हरिशरीराद् बहिः भोगस्यापि प्रमितत्वात् । एवं माध्वभाष्यानुसारेण चतुर्थाध्यायसारः सङ्क्षेपेण निरूपितः ।

१. भाष्यदीपिकास्थाः केचन विषया अत्र स्थालीपुलाकन्यायेन निरूप्यन्ते ।

तत्रादौ सूत्रभाष्यटीकोक्तलयक्रमः भाष्यदीपिकायां सुष्ठु सङ्गृहीतः । तदीयवाक्यैरेव सः विषयः प्रस्तूयते ।

''**अत्रायं गुरुपादोक्तलयक्रमः**- मनुष्योत्तमानां निर्ऋतेश्च यमे लयः। यमस्य पितॄणां वैवस्वतादिमनूनां प्रियव्रतादिचक्रवर्तिनां च स्वायम्भुवे मनौ लयः। ऋभूणां पृथिव्यां लयः। साध्यानामाकाशे लयः। अग्निपुत्राणामग्नौ लयः। अग्नेः सूर्ये लयः। सूर्यस्याकाशस्य पृथिव्याश्च गुरौ लयः। भृग्वादीनां दक्षे लयः। मनुगुरुदक्षशचीनां मरुद्गणानां चेन्द्रे लयः। कुबेरस्य वरुणस्य च सोमे लयः। सोमस्य विष्वक्सेनादिपार्षदानां चानिरुद्धे लयः। अनिरुद्धस्य सनकादियतीनां रत्याश्च कामदेवे लयः। कामदेवस्य वारुण्याम्। वारुण्याः शेषे। शेषस्य सरस्वत्याम्। एवमिन्द्रस्य सौपर्ण्यां लयः। सौपर्ण्या गरुडे। गरुडस्य सरस्वत्याम्। एवं शेषगरुडमार्गभेदेन स्वोदरप्रविष्टाखिलप्रपञ्चायाः सरस्वत्याः विरिञ्चे लयः। विरिञ्चस्तु लक्ष्मीं प्रविश्य नारायणे लीनो भवतीति।''

२. अपरोक्षज्ञानानन्तरं सात्त्विकस्य जीवस्य कर्मक्षयोऽभिहितः। एवमेव हरिद्वेषिणि तमोयोग्येऽपि एष एव न्यायः वैपरीत्येन योजनीयः। सोऽयं विषयः भाष्यदीपिकागतवचनोद्धरणेनैव पूर्यते-

''इदं त्ववधेयम्- द्वेषिणः पूर्वपुण्यस्याप्रारब्धस्य विनाशः उत्तरस्याश्लेष इत्ययमर्थस्तावदितरस्येत्यनेनैवोक्तः। अग्निहोत्रादीत्यनेन ज्ञानिकृताकाम्यपुण्यस्य पूर्वस्य ज्ञानार्थत्वमुत्तरस्य ज्ञानकार्यमोक्षातिशयार्थत्वमिति यो न्यायोऽभिहितः सोऽपि द्वेषिणि तद्वैपरीत्येनानुसर्तव्यः। द्वेषपरिपाकप्राक्कालीनस्याप्रारब्धस्य पापस्य द्वेषाभिवृद्धिहेतुत्वमुत्तरस्य तु साक्षात्तमोऽनुप्रवेशः। एवमतोऽन्यदपीत्यनेन ज्ञानपूर्वकालीनकाम्यपुण्यस्याप्रारब्धस्यानिष्टस्य च नाशस्तदुत्तरकालीनस्य तादृशस्यासंश्लेष इति यो न्यायोऽभिहितः स द्वेषिण्यपि वैपरीत्येनानुसर्तव्यः। द्वेषपरिपाकात् पूर्वतनं काम्यमप्रारब्धं पुण्यमनिष्टं चेन्न नश्यति। यथा दुर्योधनादीनां राजत्वापादकं कुरुवंशादौ जननकारणं पुण्यम्। तस्य कृष्णभीमादिमहाद्रोहद्वारा

पूर्णतमोहेतुत्वात्। इष्टं चेन्नश्यति । द्वेषपूर्त्युत्तरकालीनं च काम्य-पुण्यमप्रारब्धमनिष्टं चेत् श्लिष्यते । इष्टं चेन्न श्लिष्यते । उत्तरस्याकाम्यस्य तु मनुष्याधमकृतस्य तमसि दुःखातिशयह्रासहेतुत्वं, कल्यादिकृतस्य तु तेषां दुःखस्य क्लृप्तत्वात् स्वयोग्याधिकपापविनाशहेतुत्वम् । एवं 'यदेव विद्यया' इत्यनेन ज्ञानिकृतोत्तरपुण्यस्य महानन्तफलत्वमिति यो न्यायोऽभिहितः सः द्वेषिपापेऽप्यनुसर्तव्यः । प्रमाणबलाद् द्वेषिपापस्यापि तमोऽनुप्रवेशोऽवश्यमङ्गीकार्य इति सूत्रत्रयन्यायो द्वेषिपुण्ये पापे चानुसर्तव्य इति ।''

३. अपूर्वप्रमेयाविष्करणम् -

'वैद्युतेनैव हि तच्छ्रुतेः' (ब्र.सू. ४.३.६) इति सूत्रव्याख्यानावसरे भाष्यकारैः वायुरेव परं ब्रह्म प्रापयति जीवस्येत्युक्तम्। अत्र बृहत्तन्त्रवचनमपि प्रमाणतयोदाहृतम् -

'विद्युत्पतिर्वायुरेव नयेद् ब्रह्म न चापरः ।
कुतोऽन्यस्य भवेच्छक्तिः तमृते प्राणनायकम् ॥' इति ।

अत्र विद्युत् भारती, तस्याः पतिः वायुः, ब्रह्म नयतीत्युक्तम् । अत्र अनुसन्धेयः सूक्ष्मविचारः भाष्यदीपिकायामुपवर्णितः -

अर्चिरादिमार्गे सुजीवः गच्छन् मार्गदेवम् इन्द्रमाप्नोति । ततः विश्व-तैजस-प्राज्ञान्, अनिरुद्ध-प्रद्युम्न-सङ्कर्षणांश्च प्राप्नोति। एते षट्सङ्ख्याकाः भारत्याः पुत्राः । नैतानि भगवद्रूपाणि । नामसाम्यमत्र भ्रामकम् । एते तु भारतीलोकस्य समीप एव वसन्ति । एतेषां मार्गदर्शनेन जीवः भारतीं ततः प्राणं च प्राप्नोति । ततः परमात्मानं ततः ब्रह्माण्डनवावरणान्यतीत्य विश्वादिभगवद्रूपाणि प्राप्नोति । ततोऽनिरुद्ध-प्रद्युम्न-सङ्कर्षण-वासुदेव-रूपाणि प्राप्नोति । ततः सर्वव्याप्तं सर्वावतारप्रादुर्भाववीजं नारायण-

माप्नोति । अत्रोत्तरोत्तरलोकाः विशिष्टसुखेताः । तत्र भगवतः नारायणस्य सन्निधाने जीवः सुखमनुभवतीति रहस्यम् । अपूर्वोऽयं विषयः सप्तमस्कन्ध-षोडशाध्यायव्याख्यानावसरे भगवत्पादैर्विशदीकृतः । स विषयः भाष्य-दीपिकायाम् एवं सङ्गृहीतः -

''अत्र विशेषः-

'विश्वाद्या अनिरुद्धाद्याः ते द्विधा सम्प्रकीर्तिताः ।
विष्णुरूपास्तदन्ये च तान् सर्वान् याति मोक्षगः ॥
तदन्ये च दिवस्पुत्राः सर्वे च द्युसमीपगाः ।
ते दिवं प्रापयन्त्येनं स वायुं स हरिं पृथक् ॥
विश्वादिरूपं तुर्यश्च वासुदेवश्च नापरः ।' (भा.ता. ७.१५.५२)

इति सप्तमस्कन्धतात्पर्योक्तोऽनुसन्धेयः । बृहत्तन्त्र इति । उक्तत्वादिति शेषः । अस्य नाशङ्कनीयमित्यनेनान्वयः ।'' इति ।

विकारित्वेऽपि जीवोऽविनाशी

अभावाधिकरणे (४.४.१०) जीवानां मुक्तौ जडदेहाभावेऽपि स्वरूपभूतशरीरस्य विद्यमानत्वेन भोगानुभव उपपन्न इत्युक्तम् ।

अपि च मुक्ताः शुद्धसत्त्वात्मकजडदेहमपि यदृच्छया स्वीकुर्वन्ति । तेन च भुञ्जते सकलान् भोगान् । यदृच्छया त्यजन्त्यपि । एवं च भोगानुभव-प्रतिबन्धकस्य कस्याप्यभावात् सर्वदा तेषां भोगानुभवोऽस्तीति प्रतिपादि-तम् । अत्र भाष्यदीपिकायां बृहदारण्यकभाष्यव्यासतीर्थीयटिप्पण्यनुरोधेन अपूर्वप्रमेयमाविष्कृतम् -

यद्यपि संसारावस्थायां जीवः अणुरेव । तथाऽपि मुक्तावीश्वरः तदीयं तेजः स्वरूपमपि सुमहत् करोति । तदुक्तम् -

'अल्पतेजस्तथैवाल्पं जीवरूपं हि संसृतौ ।
तदेव सुमहत्तेजः करोति भगवान् महत् ।
अतो नवतरं चैतत् ब्रह्मादीनां करोत्यजः ॥'(बृ.भा. ६.४.५) इति ।

अत्र स्वरूपशरीरस्य महत्त्वं च स्वस्वचरमशरीरसमत्वेन तूलपिण्डात् प्रचय एव क्रियत इति समाहितम् । न चात्र प्रचयाङ्गीकारे विकारित्वेन जीवस्यानित्यत्वप्रसक्तिः । 'ईश्वरशक्त्या तदुपपत्तेः' इति गीताभाष्य-प्रमेयदीपिकोक्तरीत्या सर्वं समञ्जसमित्युक्तम् ।

नैकस्मिन्नसम्भवात् (२.२.३३) इति सूत्रानुव्याख्यानसुधायामपि इयमाशङ्का समाहिता । यथा-

जीवस्वरूपे किञ्चिद्विकाराङ्गीकारेऽपि नानित्यत्वप्रसक्तिः। अनित्यत्वं हि तदैव भवति यदा जैवयावद्द्रव्यभाविधर्मेषु विकारोऽभ्युपेयते । न चैवं प्रकृते । तस्मात् स्वरूपदेहेन बाह्यशुद्धसत्त्वात्मकदेहेनापि मुक्तौ भोग-सम्भवात् सर्वं समञ्जसम् इति समाहितम् । एवमुत्तरप्रस्थानगता विषयाः यथासन्दर्भमत्र विदुषामुपाकाराय संयोजिताः ।

अध्यायार्थसङ्ग्रहः

चतुर्थाध्यायसारः मुख्यविषयोपबृंहितः सम्यक् सङ्गृहीतः भाष्यदीपिका-कारैः । तदीयवाक्यैरेव स विषयः प्रस्तूयते-

''अत्रायमाचार्योक्तोऽध्यायार्थसङ्ग्रहः- येऽप्रतीकालम्बनाः देवाः भगवज्ज्ञानभोगाभ्यां निवृत्तसमस्तानिष्टकर्माणः चेतनोत्क्रमणात् प्रागेव देहनाशादर्चिरादिलोकानां च नष्टत्वादुत्क्रमणेनार्चिरादिमार्गेण च रहिताः तत्वेतरदेवाः अण्डलयकाले तत्वदेवाः अण्डलयानन्तरं यथायोग्यं स्व-स्वोत्तमप्रवेशेन परित्यक्तदेहाः स्वोचितेन पथा गरुडमार्गेण शेषमार्गेण च

पुन्नामकहिरण्यगर्भेण सह वैकुण्ठवासिनं भगवन्तं प्राप्तास्तेन सह विरजास्नानेन भिन्नलिङ्गशरीराः विध्वस्तप्रकृतयः अत्यन्तनिवृत्तानिष्टा भवन्ति । ये तु ऋषयः देवानुगाः पितरः प्रतीकालम्बनाः भगवदपरोक्षानन्तरं भगवज्ज्ञान-भोगाभ्यां निवृत्तसमस्तानिष्टकर्माणः उत्क्रमणेन त्यक्तदेहाः अर्चिरादिपथा यथायोग्यस्थाने स्थिताः अण्डलयकाले स्वोत्तमान् प्रविष्टाः वैकुण्ठवासिनं हरिं प्राप्ताः हिरण्यगर्भेण सह विरजास्नानेन भिन्नलिङ्गशरीराः विध्वस्तप्रकृतयः अत्यन्तनिवृत्तानिष्टा भवन्ति । ये तु मनुष्योत्तमाः निष्कामुकभगवदर्थ-श्रुत्यादिविहितकार्यानुष्ठानेन शुद्धान्तःकरणाः प्रक्षीणरागादिदोषाः सञ्जात-भगवद्भक्तिमन्तः श्रवणमननिदिध्यासनाभ्यासवन्तः परमभागवताः स्व-योग्यभगवदपरोक्षानन्तरमत्यन्तनिवृत्तानिष्टसञ्चितकर्माणः आगामि-दुष्कर्मलेपविधुराः यावत्प्रारब्धं भागवतधर्मनिष्ठाः उत्तरायणमार्गेण त्यक्तदेहाः भगवल्लोकगमनार्थमर्चिरादिपथा महरादिलोके समासीनाः लयकाले स्वोत्तमप्रवेशेनोर्ध्वं गताः ब्रह्माण्डलयानन्तरं लिङ्गशरीरभङ्गकाले उपस्थिते सुषुम्नामार्गेण त्यक्तान्यदेहाः हिरण्यगर्भेण सह विरजास्नानेन भिन्नलिङ्ग-शरीराः प्रध्वस्तस्वगुणाच्छादिकाः विध्वस्तप्रकृतयः अत्यन्तनिवृत्तानिष्टा भवन्ति । ये त्वत्यल्पाः मानुषाः स्थावरादयश्च एकगुणोपासकाः कार्य-ब्रह्मकालान्त्यभागे स्वस्वयोग्यावतारापरोक्षिणः उत्क्रमणार्चिरादिमार्ग-रहिताः प्रभुक्तात्यल्पप्रारब्धकर्माणः अण्डलयकाले स्वोत्तमप्रवेशेनोर्ध्वं गताः ब्रह्मणा सह त्यक्तलिङ्गशरीराः विध्वस्तप्रकृतयोऽत्यन्तनिवृत्तानिष्टाः भवन्ति । ते सर्वेऽपि महाप्रळये भगवदुदरे स्थित्वा पुनस्सृष्टौ भगवल्लोका-विर्भावे श्वेतद्वीपगतभगवद्दर्शनेनापगतभगवदिच्छावरकाः सम्यगाविर्भूत-ज्ञानानन्दादिगुणाः वासुदेव-परिकल्पस्वस्वयोग्यस्थानेषु स्थिताः भगवन्त-मुपासीनाः सयुजः भगवद्देहे बहिश्च अन्ये बहिरेव स्वरूपदेहेन लीला-

गृहीतविग्रहैर्वा सङ्कल्पमात्रसाध्यान् दिव्यान् भोगान् तारतम्येन भुञ्जानाः न कदाचित् पुनरावर्तन्त इति ।''

एवमनेकेऽपूर्वाः विषया अस्मिन् व्याख्याने लभन्त इत्यर्थवानयं मुद्रणप्रयासः । अस्याध्ययनं विद्यार्थिनां विदुषां च महते उपकाराय कल्पत इति विश्वसिमः ।

ग्रन्थस्यास्य संशोधने ब्रह्मविद्याप्रदानेन समनुग्राहकेभ्यः पदवाक्यप्रमाण-पारावारपारीणेभ्यः पेजावरमठाधिपेभ्यः श्रीमद्भ्यः श्रीविश्वेशतीर्थ-श्रीमच्चरणेभ्यः सभक्तिश्रद्धं प्रणाततीः समर्पये ।

ग्रन्थस्यास्य प्रकाशनार्थं समुचितवित्तदानादिना प्रोत्साहकेभ्यः नव-देहलीस्थराष्ट्रियसंस्कृतसंस्थानकुलपतिपदमलङ्कुर्वाणेभ्यः विद्वत्प्रवरेभ्यः राधावल्लभत्रिपाठीमहाभागेभ्यः सादरं प्रणामाः समर्प्यन्ते ।

सर्वदाऽपि संशोधनमन्दिरकार्येषु स्वीयाभिमानं प्रकाश्य मार्गदर्शनेन प्रोत्साहकेभ्यः सि.एस्. कनियाल्महाभागेभ्यः वन्दनानि समर्पये ।

पूर्णप्रज्ञसंशोधनमन्दिरस्याध्यक्षपदमलङ्कुर्वाणेभ्यः अस्मद्गुरुवर्येभ्यः डि. प्रह्लादाचार्येभ्यः तदीयं मार्गदर्शनम् अनुग्रहं च परमादरेण संस्मरामि ।

ग्रन्थस्यास्य शोधकर्मणि अपूर्वं साह्यमाचरितवद्भ्यः डा. ए.वि. नागसम्पिगेमहाभागेभ्यः सादरं वन्दनानि समर्पये ।

ग्रन्थस्यास्य संशोधने मातृकाप्रदानेन शोधनकर्मणि उपकारं विहित-वद्भ्यः धारवाडग्रामस्थगोविन्दराव् नवलगुन्दमहाभागेभ्यः वन्दनानि ।

पि.वि. उपाध्यायः

ಮುನ್ನುಡಿ

ಶ್ರೀವ್ಯಾಸರಾಜಮಠದ ವಿದ್ಯಾಸಿಂಹಾಸನವನ್ನು ಕ್ರಿ.ಶ. 1755- 1770 ಅಲಂಕರಿಸಿ ತತ್ತ್ವವಾದದ ಪರಂಪರೆಗೆ ಅದ್ವಿತೀಯಸೇವೆಸಲ್ಲಿಸಿದವರು ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳು. ಶ್ರೀಮದಾಚಾರ್ಯರ ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯಕ್ಕೆ ಅವರು ರಚಿಸಿದ ವ್ಯಾಖ್ಯೆ 'ಭಾಷ್ಯದೀಪಿಕೆ'. ಭಾಷ್ಯಕಾರರ ಆಶಯವನ್ನು ಪ್ರಾಚೀನ ಟೀಕೆಗಳ ಬೆಳಕಿನಲ್ಲಿ ವಿವರಿಸುವ ಈ ಕೃತಿಗೆ ಭಾಷ್ಯದೀಪಿಕೆಯೆಂಬ ಹೆಸರು ಅನ್ವರ್ಥವೆನಿಸುವುದು. ಭಾಷ್ಯದೀಪಿಕೆಯ ವೈಶಿಷ್ಟ್ಯವನ್ನು ಹೀಗೆ ಸಂಕ್ಷೇಪವಾಗಿ ಸೆರೆಹಿಡಿಯಬಹುದಾಗಿದೆ-

1. ಭಾಷ್ಯಪಾಠ ಭೇದಗಳ ಸೂಚನೆ ಮತ್ತು ಅರ್ಥವಿವರಣೆ.
2. ಟೀಕೆಯಲ್ಲಿ (ತತ್ತ್ವಪ್ರಕಾಶಿಕೆ) ನಿರೂಪಿಸಿದ ವಿಷಯಗಳ ಜೊತೆಗೆ ಪ್ರಾಚೀನ ಟೀಕೆಯಾದ ತತ್ತ್ವಪ್ರದೀಪದ ವಿಷಯಗಳ ಮಂಡನೆ.
3. ಬ್ರಹ್ಮಸೂತ್ರಭಾಷ್ಯ ಟೀಕೆಯ ವಿವರಣೆಯ ಜೊತೆಗೆ, ಅನುವ್ಯಾಖ್ಯಾನ ಸುಧಾ-ಸರ್ವಮೂಲ ಗ್ರಂಥಗಳಲ್ಲಿ ಬರುವ ಸಂದರ್ಭೋಚಿತ ವಿಷಯಗಳ ಉಪಪಾದನೆ.
4. ಭಾಷ್ಯದಲ್ಲಿ ಉದಾಹರಿಸಿದ ಶ್ರುತಿಸ್ಮೃತಿಗಳ ಪ್ರಾಯಃ ಪ್ರತಿಪದಾರ್ಥ ವಿವರಣೆ.
5. ಕೆಲವು ಟಿಪ್ಪಣಿಯ ವಿಷಯಗಳ ಅನುವಾದದ ಜೊತೆಗೆ ಕೆಲವಡೆ ಅಭಿಪ್ರಾಯಭೇದ ತಳೆಯುವುದು ಅಥವಾ ಇನ್ನೊಂದು ವ್ಯಾಖ್ಯಾನದ ಆಶಯ ನಿರಾಕರಣೆ.
6. ಟೀಕಾಗ್ರಂಥಗಳಲ್ಲಿ ಮತ್ತು ಸರ್ವಮೂಲಗ್ರಂಥಗಳಲ್ಲಿ ಅಪಾತತಃ ತೋರುವ ವಿರೋಧ ಪರಿಹಾರ.

ವ್ಯಾಖ್ಯಾನಗಳ ವಿಮರ್ಶೆ

ನ ಪ್ರತೀಕಾಧಿಕರಣದಲ್ಲಿ (4. 1. 3) ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳು ಮಾಡಿರುವ ವಿಮರ್ಶೆ- ಸೂಕ್ಷ್ಮಚಿಂತನೆಗಳನ್ನು ಒಳಗೊಂಡಿದ್ದು. ಇಲ್ಲಿ ಸಂಗ್ರಹವಾಗಿ ನಿರೂಪಿಸಲಾಗಿದೆ-

ಛಾಂದೋಗ್ಯೋಪನಿಷತ್ತಿನಲ್ಲಿ ನಾಮ-ವಾಕ್-ಮನಸ್ಸು-ಸಂಕಲ್ಪ-

ಚಿತ್ತ-ಧ್ಯಾನ-ವಿಜ್ಞಾನ-ಬಲ-ಅನ್ನ-ನೀರು-ತೇಜಸ್-ಆಕಾಶ-ಸ್ಮರ-ಆಶಾ-ಪ್ರಾಣ ಗಳನ್ನು ಬ್ರಹ್ಮನೆಂದು ಉಪಾಸನೆ ಮಾಡಬೇಕು. (ಛಾಂ. 7. 1. 5) ಎಂಬ ನಿರೂಪಣೆ ಇದೆ. ಜಡವಾದ ನಾಮ-ಮನಸ್ಸು-ಜಲ-ಆಕಾಶ ಮೊದಲಾದವು ಗಳು ಬ್ರಹ್ಮನಾಗಲು ಸಾಧ್ಯವಿಲ್ಲ. ಆದ್ದರಿಂದ ಸೂತ್ರಕಾರರು ಶ್ರುತಿಯ ಆಂತರ್ಯವನ್ನು ವಿವರಿಸಿದರು- 'ನ ಪ್ರತೀಕೇ ನ ಹಿ ಸಃ (4. 1. 3)

ಇಲ್ಲಿ 'ನಾಮ' ಮೊದಲಾದ ಶಬ್ದಗಳಿಂದ ಪ್ರತಿಪಾದ್ಯವಾದ ವಸ್ತು ಹಾಗೂ ಅದರ ಅಭಿಮಾನಿದೇವತೆಯಲ್ಲಿ ಬ್ರಹ್ಮನನ್ನು ಉಪಾಸನೆ ಮಾಡಬೇಕು. ಜಡವಸ್ತು ಹಾಗೂ ಚೇತನವಸ್ತುಗಳು ಪರಬ್ರಹ್ಮನ ಅಧಿಷ್ಠಾನವಾಗಿದ್ದು 'ಪ್ರತಿಮೆ' ಎನಿಸಿವೆ. ಜಡ-ಚೇತನಗಳು ಎಂದೂ ಬ್ರಹ್ಮವಾಗುವುದಿಲ್ಲ. ನಾಮ-ವಾಕ್ ಮೊದಲಾದ ಈ ಪ್ರಕರಣದಲ್ಲಿ ಬರುವ ಶಬ್ದಗಳಿಂದ, ಉಷಾ-ಸ್ವಾಹಾ-ಪರ್ಜನ್ಯ-ಮಿತ್ರ-ಅಗ್ನಿ-ವರುಣ-ಚಂದ್ರ-ಪ್ರಾಣ-ಪ್ರಮಹ-ಅನಿರುದ್ಧ-ಇಂದ್ರ-ಉಮಾ-ರುದ್ರ-ಭಾರತೀ-ಪ್ರಾಣ ಎಂಬ ಅಭಿಮಾನಿದೇವತೆಗಳನ್ನು ತೆಗೆದುಕೊಳ್ಳಬೇಕು.

ಈ ಚೇತನರಲ್ಲಿ ಭಗವಂತನ ಉಪಾಸನೆ ನಡೆಸಬೇಕೆಂಬುದು ಸೂತ್ರಕಾರರ ಹೃದಯ.

'ನಾಮ ಬ್ರಹ್ಮೇತ್ಯುಪಾಸೀತ' ಎಂಬ ಶ್ರುತಿವಚನವನ್ನು ಗಮನಿಸಿದಾಗ 'ಸಾಮಾನಾಧಿಕರಣ್ಯವ್ಯಪದೇಶ' (ಸಮಾನವಿಭಕ್ತಿಯುಳ್ಳ ವಿಶೇಷ್ಯ-ವಿಶೇಷಣಗಳನ್ನು / ಧರ್ಮ-ಧರ್ಮಿಗಳನ್ನು ತಿಳಿಸುವ ಎರಡು ಪದಗಳನ್ನು ಒಳಗೊಂಡ ಪ್ರಯೋಗ. ಉದಾ- 'ಸುಂದರೋ ರಾಮಃ' (ಸೌಂದರ್ಯ-ವದಭಿನ್ನೋ ರಾಮಃ) ಇದೆ. ಇದರಿಂದ ಮೇಲ್ನೋಟಕ್ಕೆ ನಾಮ-ಬ್ರಹ್ಮಗಳಿಗೆ ಅಭೇದವನ್ನು ಹೇಳಿದಂತೆ ಕಾಣುವುದು. ಆದ್ದರಿಂದ ಆಚಾರ್ಯರು ಬ್ರಹ್ಮತರ್ಕದ ವಚನವನ್ನು ಉದಾಹರಿಸಿ ಅದರ ಆಂತರ್ಯವನ್ನು ವಿವರಿಸಿದ್ದಾರೆ-

ನಾಮಾದಿ ಪ್ರಾಣಪರ್ಯಂತಮುಭಯೋಃ ಪ್ರಥಮಾತ್ವತಃ ।
ಐಕ್ಯದೃಷ್ಟಿರಿತಿ ಭ್ರಾಂತಿರಬುಧಾನಾಂ ಭವಿಷ್ಯತಿ ।
ನಾಮಾದಿಸ್ಥಿತಿರೇವಾತ್ರ ಬ್ರಹ್ಮಣೋ ಹಿ ವಿಧೀಯತೇ ॥
ಸರ್ವಾರ್ಥಾ ಪ್ರಥಮಾ ಯಸ್ಮಾತ್ ಸಪ್ತಮ್ಯರ್ಥಾ ತತೋ ಮತಾ ॥

ಈ ಪ್ರಮಾಣವಚನದ ಅಭಿಪ್ರಾಯ ಹೀಗಿದೆ-

ಛಾಂದೋಗ್ಯದಲ್ಲಿ ಬರುವ ನಾಮದಿಂದ ಆರಂಭಿಸಿ ಪ್ರಾಣನವರೆಗೆ ಉಲ್ಲಿಖಿತವ್ಯಕ್ತಿಗಳನ್ನು ತಿಳಿಸುವ 'ನಾಮ' ಮೊದಲಾದ ಪದಗಳು ಮತ್ತು ಬ್ರಹ್ಮಪದವೂ ಪ್ರಥಮಾವಿಭಕ್ತಿಯನ್ನು ಹೊಂದಿರುವ ಕಾರಣ, ಅವುಗಳಲ್ಲಿ ಅಭೇದವಿದೆಯೆಂಬ ಭ್ರಾಂತಿ ಉಂಟಾಗುತ್ತದೆ. ಆದರೆ ಇಲ್ಲಿ 'ನಾಮ' ಮೊದಲಾದ ಪದಗಳಿಂದ ವಾಚ್ಯನಾದ ದೇವತೆಯಲ್ಲಿ ಪರಬ್ರಹ್ಮನ ಉಪಾಸನೆಯನ್ನು ಇಲ್ಲಿ ವಿಧಿಸಲಾಗಿದೆ.

'ನಾಮ' 'ವಾಕ್' ಎಂಬ ಪ್ರಥಮಾವಿಭಕ್ತಿಯನ್ನು ಹೊಂದಿದ ಪದಗಳಿಗೆ ಎಲ್ಲ ವಿಭಕ್ತಿಗಳ ಅರ್ಥವನ್ನು ಹೇಳಬಹುದಾದ ಕಾರಣ ಸಪ್ತಮೀವಿಭಕ್ತಿಯ ಅರ್ಥವನ್ನು ಪ್ರಕೃತ ತೆಗೆದುಕೊಳ್ಳಬಹುದಾಗಿದೆ. 'ನಾಮ ಬ್ರಹ್ಮವೆಂದು ಉಪಾಸನೆಮಾಡಿ' (ನಾಮ ಬ್ರಹ್ಮೇತ್ಯುಪಾಸೀತ) ಎಂಬ ವಾಕ್ಯಕ್ಕೆ ನಾಮದಲ್ಲಿ ನಾಮಾಭಿಮಾನಿದೇವತೆಯಾದ ಉಷಾದೇವಿಯಲ್ಲಿ ಪರಮಾತ್ಮನನ್ನು ಉಪಾಸನೆ ಮಾಡಿ ಎಂದು ಅರ್ಥವಾಗಿದೆ.

ಇಲ್ಲಿ ಭಾಷ್ಯದೀಪಿಕಾರರು ಕೆಲವು ವ್ಯಾಖ್ಯಾನಕಾರರ ಅಭಿಪ್ರಾಯವನ್ನು ಉಲ್ಲೇಖಿಸಿದ್ದಾರೆ-

'ಛಾಂದೋಗ್ಯೋಪನಿಷತ್ತಿನಲ್ಲಿ 'ನಾಮೋಪಾಸ್ವ' (7.1.4) 'ವಾಚ ಮುಪಾಸ್ವ' (7.2.1) ಎಂಬುದಾಗಿ ನಾಮ ಮೊದಲಾದವನ್ನು ಬ್ರಹ್ಮನೆಂದು ಉಪಾಸನೆ ಮಾಡಿರೆಂದು ವಿಧಿಸುವ ವಾಕ್ಯಗಳು ಕಾಣುತ್ತವೆ. ' ಸ ಯೋ ನಾಮ ಬ್ರಹ್ಮೇತ್ಯುಪಾಸ್ತೇ ಯಾವನ್ನಾಮ್ನೋಗತಂ ತತ್ರಾಸ್ಯ ಕಾಮಚಾರೋ ಭವತಿ (ಛಾಂ.7.1.5) 'ವಾಚಂ ಬ್ರಹ್ಮೇತ್ಯುಪಾಸ್ತೇ ಯಾವದ್ವಾಚೋಗತಂ ತತ್ರಾಸ್ಯ' (ಛಾಂ.7.2.2) ಇತ್ಯಾದಿಯಾಗಿ ಉಪಾಸನೆಯ ಫಲವನ್ನು ತಿಳಿಸುವ ವಾಕ್ಯಗಳಿದ್ದಾವೆ. ಛಾಂದೋಗ್ಯದಲ್ಲಿ ಬರುವ ವಿಧಿ ಮತ್ತು ಫಲಗಳನ್ನು ನಿರೂಪಿಸುವ ಪ್ರಕರಣದಲ್ಲಿರುವ 'ನಾಮ' 'ವಾಕ್' ಮೊದಲಾದ ಪದಗಳು ದ್ವಿತೀಯಾವಿಭಕ್ಯಂತವಾಗಿದ್ದಾವೆ, ಪ್ರಥಮಾವಿಭಕ್ಯಂತವಲ್ಲ. ಆದ್ದರಿಂದ 'ಉಭಯೋಃ ಪ್ರಥಮಾತ್ತತಃ ಎಂಬ ಪ್ರಮಾಣವಚನದ ಪ್ರಕೃತೋಲ್ಲೇಖ ಹೇಗೆ ಸಂಗತ? ಈ ಪ್ರಮಾಣವಚನವು ಪ್ರಥಮಾವಿಭಕ್ಯಂತವಾದ ಪದಗಳಲ್ಲಿ ಐಕ್ಯಭಾವನೆಯ ಸಂಭವನೀಯತೆಯನ್ನು ಪ್ರತಿಪಾದಿಸುತ್ತಿದೆಯಲ್ಲವೆ?

ಇದರ ಪರಿಹಾರವನ್ನು ಹೀಗೆ ತಿಳಿಯಬೇಕು-

ಆಚಾರ್ಯರು 'ನಾಮ ಬ್ರಹ್ಮೇತ್ಯುಪಾಸೀತ' ಎಂಬುದಾಗಿ ಭಾಷ್ಯದಲ್ಲಿ ಉದಾಹರಿಸಿದ ಪ್ರಮಾಣವಚನವು, ಶಾಖಾಂತರದಲ್ಲಿರುವುದೇ ಆಗಿದೆ. ಛಾಂದೋಗ್ಯದಲ್ಲಿ 'ನಾಮಬ್ರಹ್ಮ-ವಾಕ್‌ಬ್ರಹ್ಮ ಇತ್ಯಾದಿಸ್ಥಳಗಳಲ್ಲಿ ದ್ವಿತೀಯಾವಿಭಕ್ತಿಯೇ ಇದೆ 'ಪ್ರಥಮಾತ್ವತಃ' ಎಂಬ ಬ್ರಹ್ಮತರ್ಕ ವಚನವು ಪ್ರಥಮಾವಿಭಕ್ತ್ಯಂತ ಪದಗಳಂತೆಯೇ ದ್ವಿತೀಯಾವಿಭಕ್ತಿ ಇರುವಾಗಲೂ ಅಭೇದವು ಪ್ರತೀತವಾಗುತ್ತದೆ ಎಂಬ ಆಶಯ ಹೊಂದಿದೆ. 'ದೇವದತ್ತನನ್ನು ಜಾಣನೆಂದು ತಿಳಿ' (ದೇವದತ್ತಂ ಬುದ್ಧಿಮಂತಂ ವಿದ್ಧಿ) 'ಸಿಂಹವೆಂದು ತಿಳಿ' (ಸಿಂಹಂ ವಿದ್ಧಿ) ಇತ್ಯಾದಿ ಉದಾಹರಣೆಗಳನ್ನು ಪರಿಶೀಲಿಸಿದಾಗ ಇಲ್ಲಿ ಎರಡರಲ್ಲಿ ಅಭೇದವು ಗೋಚರವಾಗುತ್ತದೆ.

ಈ ಹಿನ್ನೆಲೆಯಲ್ಲಿ ತತ್ತ್ವಪ್ರದೀಪದಲ್ಲಿ - 'ಪ್ರಥಮಾತ್ತ್ವತಃ' ಎಂಬ ಪದವು ಪ್ರಥಮಾವಿಭಕ್ತಿಗೆ ಸಮೀಪದಲ್ಲಿರುವ ದ್ವಿತೀಯಾವಿಭಕ್ತ್ಯಂತ ಪದವನ್ನು ಉಪಲಕ್ಷಣಯಾ (ಅಜಹಲ್ಲಕ್ಷಣಯಾ) ಬೋಧಿಸುತ್ತದೆ. ಆದ್ದರಿಂದ 'ಪ್ರಥಮಾತ್ವತಃ' ಎಂಬ ಪದಕ್ಕೆ ದ್ವಿತೀಯಾವಿಭಕ್ತ್ಯಂತವಾದ ಪದಗಳೆರಡು ಇರುವಾಗಲೂ ಅಭೇದಬೋಧಕ್ಕೆ ಯಾವ ಬಾಧಕವಿಲ್ಲ. ಈ 'ನ ಪ್ರತೀಕಾಧಿಕರಣ'ದಲ್ಲಿ ಉಲ್ಲೇಖಿಸಿದ 'ನಾಮ ಬ್ರಹ್ಮೇತ್ಯುಪಾಸೀತ' ಎಂಬ ವಚನವು ಛಾಂದೋಗ್ಯ ವಚನವಾಗಿರದೇ ಶಾಖಾಂತರದಲ್ಲಿರುವ ವಚನವೆಂದು ತಿಳಿಯಬೇಕು. ಶಾಖಾಂತರೋದಾಹೃತ 'ನಾಮ ಬ್ರಹ್ಮೇತ್ಯುಪಾಸೀತ' ಎಂಬ ವಚನವು ಪ್ರಥಮಾ ವಿಭಕ್ತ್ಯಂತವಾಗಿರುವುದಾದರೂ ಛಾಂದೋಗ್ಯದಲ್ಲಿ ಬರುವ 'ನಾಮ' 'ವಾಕ್' ಮೊದಲಾದ ಶಬ್ದಗಳು ದ್ವಿತೀಯಾವಿಭಕ್ತ್ಯಂತ ಪದಗಳಾಗಿವೆ.

ಭಾಷ್ಯದೀಪಿಕಾರರು ಈ ಆಶಯವನ್ನು ನಿರಾಕರಿಸುತ್ತಾರೆ- ಭಾಷ್ಯದಲ್ಲಿ ಉಲ್ಲೇಖಿಸಿದ 'ನಾಮ ಬ್ರಹ್ಮೇತ್ಯುಪಾಸೀತ' ಎಂಬ ವಚನವು ಶಾಖಾಂತರ ವಚನವೆಂದು ಉದಾಹೃತವಾಗಿಲ್ಲ. ತತ್ತ್ವಪ್ರದೀಪದಲ್ಲಿ ಈ ಆನುಪೂರ್ವಿಯ ಶಾಖಾಂತರವಚನವಿದೆಯೆಂದು ಉಲ್ಲಿಖಿತವಾದರೂ 'ನ ಪ್ರತೀಕಾಧಿಕರಣ' ಭಾಷ್ಯದಲ್ಲಿ ಛಾಂದೋಗ್ಯೋಪನಿಷತ್ತಿನದಲ್ಲದ ಶಾಖಾಂತರವಚನವು ಇದೆಂದು ಹೇಳಲು ಆಧಾರ ಸಾಲದು.

ಫಲವಾಕ್ಯದಲ್ಲಿರುವ ನಪುಂಸಕಲಿಂಗವುಳ್ಳ ನಾಮ ಬ್ರಹ್ಮಪದಗಳು ಪ್ರಥಮಾಂತಗಳೆಂದು ಹೇಳಲು ಯಾವ ಅನುಪಪತ್ತಿಯೂ ಇಲ್ಲದಿರುವಾಗ, ಅವುಗಳನ್ನು ದ್ವಿತೀಯಾವಿಭಕ್ತ್ಯಂತಪದಗಳೆಂದು ಗ್ರಹಿಸಿ ಆಕ್ಷೇಪ- ಪರಿಹಾರವನ್ನು ವರ್ಣಿಸುತ್ತಿರುವುದು ಸೂಕ್ತವಲ್ಲ. ಅಜ್ಞಾನಮೂಲಕವೂ ಅಹುದು. ಈ ಬಗ್ಗೆ ಛಾಂದೋಗ್ಯವ್ಯಾಸತೀರ್ಥಿಯವಚನಗಳು ಅನುಸಂಧೇಯವಾಗಿವೆ- 'ನಾಮ ಬ್ರಹ್ಮೋಪಾಸ್ವ' (ಛಾಂದೋಗ್ಯೋಪ- ನಿಷತ್ತಿನದಲ್ಲದ ಪ್ರಮಾಣವಚನ) ಎಂಬಲ್ಲಿ ದ್ವಿತೀಯಾವಿಭಕ್ತ್ಯಂತ ಪದಗಳಿವೆಯೆಂದೂ 'ಸ ಯೋ ನಾಮ ಬ್ರಹ್ಮೇತ್ಯುಪಾಸ್ತೆ' (ಛಾಂ. 7. 1. 5) ಎಂಬ ಸ್ಥಳದಲ್ಲಿರುವ ನಾಮ-ಬ್ರಹ್ಮಪದಗಳು ಪ್ರಥಮಾವಿಭಕ್ತ್ಯಂತವೆಂದು ತಿಳಿಯಬೇಕು'. ಇಲ್ಲಿ ಎರಡೂ ಸ್ಥಳಗಳಲ್ಲಿ 'ನಾಮ-ವಾಕ್' ಇತ್ಯಾದಿ ಪದಗಳಿಗೆ ಅಭಿಮಾನಿದೇವತೆಗಳಲ್ಲಿ ಬ್ರಹ್ಮನನ್ನು ಉಪಾಸಿಸಬೇಕೆಂದು ಸಪ್ತಮೀವಿಭಕ್ತಿಯ ಅರ್ಥವನ್ನು ಸ್ವೀಕರಿಸಬೇಕು- '' 'ನಾಮ ಬ್ರಹ್ಮೋಪಾಸ್ವ' ಇತ್ಯಾದ್ಯುಕ್ತಾಃ ದ್ವಿತೀಯಾಃ, 'ಸ ಯೋ ನಾಮ ಬ್ರಹ್ಮೇತ್ಯುಪಾಸ್ತೇ'(ಛಾಂ. 7. 1. 5) ಇತ್ಯಾದ್ಯುಕ್ತಾಃ ಪ್ರಥಮಾಶ್ಚ ಸಪ್ತಮ್ಯರ್ಥ- ತಯಾ ವ್ಯಾಖ್ಯಾತಾಃ''

ಆದ್ದರಿಂದ ಭಾಷ್ಯದಲ್ಲಿ ಉಲ್ಲಿಖಿತವಾದ 'ನಾಮ ಬ್ರಹ್ಮೇತ್ಯುಪಾಸೀತ' ಎಂಬ ವಚನವು ಛಾಂದೋಗ್ಯೋಪನಿಷತ್ತಿನಿಂದ ಉದಾಹೃತವಾಗಿದೆ ಎಂದು ನಿರ್ಧರಿಸಬಹುದು. ಆದರೆ ಈ ಅಧಿಕರಣದ ಬ್ರಹ್ಮತರ್ಕಪ್ರಮಾಣ ವಚನದಲ್ಲಿ 'ಪ್ರಥಮಾತ್ವತಃ' ಎಂಬುದಾಗಿ ಪದವಿದ್ದರೂ ಪ್ರಥಮಾವಿಭಕ್ತ್ಯಂತವಾದ ಪದದ ಜೊತೆಗೆ ದ್ವಿತೀಯಾವಿಭಕ್ತಿಯುಳ್ಳ ಪದಗಳಿರುವಾಗಲೂ ಅಲ್ಲಿ ಸಪ್ತಮೀವಿಭಕ್ತಿಯ ಅರ್ಥವನ್ನು ತೆಗೆದುಕೊಳ್ಳಬೇಕು. 'ಪ್ರಥಮಾತ್ವತಃ' ಎಂಬ ಪದಕ್ಕೆ 'ಅಜಹಲ್ಲಕ್ಷಣಯಾ' ದ್ವಿತೀಯಾದಿವಿಭಕ್ತ್ಯಂತ ಪದಗಳಿರುವಾಗಲೂ ಎಂಬ ಅರ್ಥವು ಸಿದ್ಧವಾಗುತ್ತದೆ.

ತತ್ತ್ವಪ್ರದೀಪವಚನವು ಸಂದರ್ಭೋಚಿತವಾಗಿ ಪ್ರಥಮಾವಿಭಕ್ತ್ಯಂತವಾದ ಪದದ ಜೊತೆಗೆ ದ್ವಿತೀಯಾವಿಭಕ್ತ್ಯಂತವಾದ ಪದವಿರುವಾಗ ಸಪ್ತಮೀವಿಭಕ್ತ್ಯರ್ಥವನ್ನು ಸ್ವೀಕರಿಸುವುದನ್ನು ಅನುಮೋದಿಸುತ್ತದೆ. ಆದ್ದರಿಂದ 'ವಾಚಂ ಬ್ರಹ್ಮ' ಇತ್ಯಾದಿ ಸ್ಥಳಗಳಲ್ಲೂ ವಾಗ್‌ದೇವತೆಯಲ್ಲಿ ಬ್ರಹ್ಮೋಪಾಸನೆ ನಡೆಸಬೇಕೆಂದು ಅರ್ಥ ಹೇಳಲು ಸಾಧ್ಯವಾಗುವುದು. 'ತಾಪಾಂತರೇ

ಪ್ರಥಮಾತ್ವಾತ್' ಎಂಬ ತತ್ತ್ವಪ್ರದೀಪವಚನವು ಛಾಂದೋಗ್ಯಕಿಂತ ಭಿನ್ನವಾದ ಬೇರೆ ಶಾಖೆಯಲ್ಲಿರುವ 'ನಾಮ ಬ್ರಹ್ಮೋಪಾಸೀತ' ಎಂಬ ವಿಧಿವಾಕ್ಯವನ್ನು ನಿರಾಕರಿಸುವುದಿಲ್ಲ. ಪ್ರಕೃತದಲ್ಲಿ ಆಚಾರ್ಯರಿಂದ ಉದಾಹೃತವಾದ 'ನಾಮ ಬ್ರಹ್ಮೇತ್ಯುಪಾಸೀತ' ಎಂಬ ವಚನವು ಛಾಂದೋಗ್ಯದಲ್ಲಿರುವುದೇ ಆಗಿದೆ.

ಇನ್ನೂ ಕೆಲವರ ವ್ಯಾಖ್ಯಾನ ಹೀಗಿದೆ-

'ಪ್ರಥಮಾತ್ವತಃ' ಎಂಬ ಪದಕ್ಕೆ ಅಜಹಲ್ಲಕ್ಷಣೆಯನ್ನು ಆಶ್ರಯಿಸಿ ವ್ಯಾಖ್ಯಾನಿಸಬೇಕಿಲ್ಲ. 'ಪ್ರಥಮಯೋಃ ಪೂರ್ವಸವರ್ಣಃ--' ಎಂಬ ಸೂತ್ರ-ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ವೈಯಾಕರಣರು ತೋರಿದ ದಾರಿಯಂತೆ, 'ಪ್ರಥಮಾತ್ವತಃ' ಎಂಬ ಪದಕ್ಕೆ 'ಪ್ರಥಮಾ ಚ ದ್ವಿತೀಯಾ ಚ ಪ್ರಥಮೇ ತಯೋರ್ಭಾವಃ ಪ್ರಥಮಾತ್ವಮ್' ಎಂಬುದಾಗಿ ವಿಗ್ರಹಮಾಡಿ ಪ್ರಥಮಾವಿಭಕ್ತ್ಯಂತವಾದ ಹಾಗೂ ದ್ವಿತೀಯಾವಿಭಕ್ತ್ಯಂತವಾದ ಎರಡು ಪದಗಳಲ್ಲಿ ಅಭೇದವು ಪ್ರತೀತವಾಗುವುದೆಂದು ವ್ಯಾಖ್ಯಾನಿಸಬಹುದು.

ಮತ್ತೆ ಕೆಲವರ ಅಭಿಪ್ರಾಯ ಹೀಗಿದೆ-

'ಮನೋ ಹಿ ಬ್ರಹ್ಮ ಮನ ಉಪಾಸ್ವ' (ಛಾಂ. 7. 3. 1.) ಇತ್ಯಾದ ಸ್ಥಳಗಳಲ್ಲಿ ಮನಸ್ಸೆಂಬ ಪ್ರತಿಮೆಯಲ್ಲಿ ಬ್ರಹ್ಮನನ್ನು ಉಪಾಸಿಸು ಎಂದೇ ಅರ್ಥವಾಗಿದೆ ಇಲ್ಲಿ 'ಮನೋಬ್ರಹ್ಮಪದಗಳು' ಪ್ರಥಮಾವಿಭಕ್ತ್ಯಂತವಾಗಿವೆ. ಇದರಂತೆ 'ನಾಮ ಹಿ ಬ್ರಹ್ಮ ವಾಗ್ ಹಿ ಬ್ರಹ್ಮ' ಇತ್ಯಾದಿಯಾಗಿ ವಾಕ್ಯಗಳನ್ನು ಸ್ವೀಕರಿಸಿ (ಊಹೆ ಮಾಡಿಕೊಂಡು) ನಾಮ ಮೊದಲಾದ ಪದಗಳಿಗೂ ಹಾಗೂ ಬ್ರಹ್ಮಪದಕ್ಕೂ ಪ್ರಥಮಾಂತತ್ವವೇ ಇದೆಯೆಂದು ತಿಳಿಸಲು 'ನಾಮಾದಿ ಪ್ರಾಣಪರ್ಯಂತಮುಭಯೋಃ ಪ್ರಥಮಾತ್ವತಃ' ಎಂಬ ವಚನ ಹೊರಟಿದೆ. 'ನಾಮ ಹಿ ಬ್ರಹ್ಮ ವಾಗ್ ಹಿ ಬ್ರಹ್ಮ' ಎಂಬುದಾಗಿ 'ಪಾಠ'ವಿದೆಯೆಂದು ಸಂಪ್ರದಾಯ ತಿಳಿದವರು ಹೇಳುತ್ತಾರೆ.

ಹೀಗೆ ಅನೇಕವ್ಯಾಖ್ಯಾನಗಳನ್ನು ಉಲ್ಲೇಖಿಸಿ ಸೂಕ್ತ ವಿವರಣೆಯನ್ನು ನೀಡಿ, ತಮ್ಮದೇ ಆದ ವಿಮರ್ಶೆಯ ಹಿನ್ನೆಲೆಯಲ್ಲಿ ಭಾಷ್ಯವ್ಯಾಖ್ಯಾನ ಮಾಡುವುದು ಶ್ರೀಜಗನ್ನಾಥಯತಿಗಳ ವೈಶಿಷ್ಟವಾಗಿದೆ.

ಟೀಕಾದ್ಯುಕ್ತಾರ್ಥ ಸಂಗ್ರಹ

ಕರ್ಮಕ್ಷಯದ ವಿವರವು ಭಾಷ್ಯದೀಪಿಕೆಯಲ್ಲಿ ವಿವರವಾಗಿ ಮೂಡಿ ಬಂದಿದೆ. ತತ್ತ್ವಪ್ರಕಾಶಿಕೆಯ ಪ್ರಮೇಯ ಸಂಗ್ರಹದ ಜೊತೆಗೆ ಅನುವ್ಯಾಖ್ಯೋಕ್ತ ಪ್ರಮೇಯಗಳೂ ಇಲ್ಲಿ ನಿರೂಪಿತವಾಗಿವೆ. ಕೆಲವಡೆ ಟೀಕೆಯಲ್ಲಿ ಸೂಚಿತವಾದ ಅಪೂರ್ವಪ್ರಮೇಯಗಳನ್ನು ಇಲ್ಲಿ ವಿವರಿಸಲಾಗಿದೆ. ಪ್ರಕೃತ ಸಂಕ್ಷೇಪವಾಗಿ ಕರ್ಮಕ್ಷಯಸ್ವರೂಪವನ್ನು ನಿರೂಪಿಸುತ್ತೇವೆ:-

ಮುಕ್ತಿಯೋಗ್ಯ ಜೀವರಿಗೆ ಶ್ರೀಹರಿಯು ಕರುಣೆಯಿಂದ ತನ್ನ ಸಾಕ್ಷಾತ್ಕಾರ ನೀಡುವನು. ಯಾವರೂಪವು ಜೀವನೊಡನೆ ಅನಾದ್ಯನಂತ ಕಾಲದಲ್ಲಿ ಒಡನಾಡಿಯಾಗಿ ಸ್ವರೂಪದೇಹದಲ್ಲಿದ್ದು ನಿಯಾಮಕವಾಗಿದೆಯೋ ಅದನ್ನೇ 'ಬಿಂಬರೂಪ' ಎನ್ನುವರು. ಇದರ ಸಾಕ್ಷಾತ್ಕಾರವೇ ಮುಕ್ತಿಗೆ ಕಾರಣವೆನಿಸಿದೆ. ಅಪರೋಕ್ಷಜ್ಞಾನವೆಂಬ ಬೆಂಕಿಯು ಅನಾರಬ್ಧವಾದ ಪಾಪವನ್ನು ಭಸ್ಮ ಮಾಡುತ್ತದೆ. (ಸಂಚಿತಕರ್ಮವು ಅಮಂಗಲಫಲ ನೀಡದು) ಅಪರೋಕ್ಷಜ್ಞಾನದ ನಂತರದಲ್ಲಿ ಸಾಧಕನಾದ ಜೀವನಿಗೆ ಯಾವುದೇ ಪಾಪಗಳು ಅಂಟುವುದಿಲ್ಲ. ಪ್ರಾರಬ್ಧಕರ್ಮಫಲವನ್ನು ಮಾತ್ರವೇ ಅನುಭವಿಸಿ ಜೀವನು ಉತ್ತಮಲೋಕಗಳಲ್ಲಿ ಪ್ರಾರಬ್ಧಶೇಷವನ್ನು ಕಳೆದುಕೊಂಡು ನಂತರ ಮುಕ್ತನಾಗುವನು.

ಇನ್ನು 'ಕರ್ಮ'ದ ನಾನಾಮುಖಿಗಳನ್ನು ಗಮನಿಸುವಾ-

ಮುಕ್ತಿಯೋಗ್ಯರ ಕರ್ಮವನ್ನು ಎರಡು ಬಗೆಯಾಗಿ ವಿಂಗಡಿಸಬಹುದು- ಪುಣ್ಯ-ಪಾಪ ಎಂಬುದಾಗಿ. ಪುಣ್ಯಕರ್ಮವು ನಿವೃತ್ತ (ಅಕಾಮ್ಯ) ಪ್ರವೃತ್ತ(ಕಾಮ್ಯ) ಎಂಬುದಾಗಿ ಎರಡು ಬಗೆಯಾಗಿದೆ.

ಅನಿಷಿದ್ಧವಾದ ಕಾಮನೆಗಳೊಂದಿಗೆ ಕರ್ಮಮಾಡುವುದು 'ನಿಷ್ಕಾಮ' (ನಿವೃತ್ತ)ವೆನಿಸಿದೆ. ಅಪರೋಕ್ಷಜ್ಞಾನಕ್ಕಿಂತ ಪೂರ್ವದಲ್ಲಿ ಆಚರಿಸುವ ನಿಷ್ಕಾಮಕರ್ಮವು ಹೃದಯವನ್ನು ಶುಚಿಗೊಳಿಸಿ ತತ್ತ್ವಜ್ಞಾನದ ವಿಕಾಸಕ್ಕೆ ಕಾರಣವಾಗುವುದು. ಅಪರೋಕ್ಷಜ್ಞಾನಾನಂತರದ ಕರ್ಮವು ಮುಕ್ತಿಯಲ್ಲಿ ತನ್ನ ಯೋಗ್ಯತೆಗೆ ಅನುಗುಣವಾದ ಪೂರ್ಣಾನಂದವನ್ನು ಪಡೆಯಲು ಕಾರಣವಾಗುವುದು.

ಇನ್ನು ಕಾಮ್ಯಕರ್ಮ(ಪುಣ್ಯ)ದ ವಿಚಾರ ತಿಳಿಯೋಣ-

ಅಪರೋಕ್ಷಜ್ಞಾನಕ್ಕಿಂತ ಮುಂಚಿನ ಕಾಮ್ಯಪುಣ್ಯವು ಪ್ರಾರಬ್ಧ ಹಾಗೂ ಅಪ್ರಾರಬ್ಧವೆಂಬುದಾಗಿ ಎರಡು ಬಗೆಯಾಗಿದೆ. ಪ್ರಾರಬ್ಧವನ್ನು ಅನುಭವದ ಮೂಲಕವೇ ಕಳೆದುಕೊಳ್ಳಬೇಕು. ಅಪ್ರಾರಬ್ಧವಾದ ಕಾಮ್ಯಪುಣ್ಯವು ಇಷ್ಟ ಹಾಗೂ ಅನಿಷ್ಟವೆಂದು ಎರಡು ಬಗೆಯಾಗಿದೆ.

ಇಷ್ಟವಾದ ಕಾಮ್ಯಪುಣ್ಯವು ದೇಹಧಾರಣೆ-ಅನ್ನಪಾನಾದಿಲಾಭ ಜ್ಞಾನಾದಿ ಮಂಗಲ ಗುಣಗಳ ಅಭಿವ್ಯಕ್ತಿಕಾರಣವಾಗಿದೆ. ಅನಿಷ್ಟಕಾಮ್ಯಪುಣ್ಯವು ಸ್ವರ್ಗಾದಿ ಸುಖ ಸಾಧನವಾಗಿದೆ.

ಅಪರೋಕ್ಷಜ್ಞಾನಾನಂತರದ ಕಾಮ್ಯಪುಣ್ಯವೂ ಇಷ್ಟ - ಅನಿಷ್ಟವೆಂದು ಎರಡು ಬಗೆಯಾಗಿದೆ. ಇಂದ್ರನು ವೃತ್ರಾಸುರನ ನಾಶಕ್ಕಾಗಿ ನಾರಾಯಣ ವರ್ಮದ ಉಪದೇಶ ಪಡೆದು ಫಲ ಪಡೆದಿರುವುದು, ಅಪರೋಕ್ಷಜ್ಞಾನಿಗೂ ಕಾಮ್ಯಕರ್ಮವಿದೆಯೆಂಬುದಕ್ಕೆ ಸಾಕ್ಷಿಯಾಗಿದೆ. ಇದರಂತೆ ಯುಧಿಷ್ಠಿರನು, ಅಕ್ಷಯಪಾತ್ರೆಯನ್ನು ಸೂರ್ಯಾನುಗ್ರಹದಿಂದ ಪಡೆದ ಸಂಗತಿಯನ್ನು ಉಲ್ಲೇಖಿಸಬಹುದಾಗಿದೆ. ಕಾಮ್ಯವಾದ ಇಷ್ಟಪುಣ್ಯದಿಂದ ನಾನಾವಿಧ ಭೋಗಗಳನ್ನು ಅಪರೋಕ್ಷಜ್ಞಾನಿಯು ಪಡೆಯುತ್ತಾನೆ ಇದನ್ನೇ 'ಪುರುಷಾರ್ಥೋ೭ತಃ ಶಬ್ದಾತ್' (ಬ್ರ.ಸೂ. 3.4.1) 'ಯಂ ಯಂ ಲೋಕಂ ಮನಸಾ ಸಂವಿಭಾತಿ' (ಆಥರ್ವಣೋಪನಿಷತ್ 1.10) ಎಂಬ ಸೂತ್ರ ಮತ್ತು ಉಪನಿಷತ್ತು ವರ್ಣಿಸುತ್ತಿವೆ. ರಾಜಪದವಿ ಮೊದಲಾದ ಜ್ಞಾನಭಕ್ತಿ ಪ್ರತಿಬಂಧಕವಾದ ಸ್ಥಾನಗಳು ಅನಿಷ್ಟಪುಣ್ಯದ ಫಲರೂಪವಾಗಿವೆ.

ಅಥವಾ ಇದನ್ನು ಹೀಗೂ ವಿವರಿಸಬಹುದಾಗಿದೆ-

ಸಾಧಕರು ಕೆರೆ-ಬಾವಿ ಕಟ್ಟಿಸುವುದು, ಸಮಾಜಸೇವೆ ಮಾಡುವುದು ಇವೇ ಮೊದಲಾದ ಮಾಧ್ಯಮಗಳಿಂದ ಗಳಿಸಿದ ಪುಣ್ಯವನ್ನು 'ಅನಿಷ್ಟಪುಣ್ಯ'ವೆಂದು ಶಾಸ್ತ್ರಗಳು ಕರೆದಿವೆ. ಇಂತಹ ಪುಣ್ಯವನ್ನು ಜ್ಞಾನಿಗಳು ತಮ್ಮನ್ನು ಸೇವೆ ಮಾಡುವ ಸುಜನರಿಗೆ ಕರುಣಿಸಿ ಅನುಗ್ರಹಿಸುತ್ತಾರೆ. ಇನ್ನೊಬ್ಬರ ಕಲ್ಯಾಣಕ್ಕಾಗಿ ವಾಯುಸ್ತುತಿಪುರಶ್ಚರಣ, ಜಪ-ಹೋಮ ಕಾರ್ಯಗಳನ್ನು ಪುರೋಹಿತರು ಮಾಡಿ ಪುಣ್ಯವನ್ನು ಯಜಮಾನನಿಗೆ ಧಾರೆ ಎರೆಯುವಂತೆ, ಜ್ಞಾನಿಗಳ ಅನಿಷ್ಟಪುಣ್ಯವು ಅವರ ಅಪೇಕ್ಷೆಯಂತೆ ಸೇವಕರಿಗೆ, ಹಾಗೂ ಅವರ

ಪ್ರೀತಿವಾತ್ಸಲ್ಯಗಳಿಗೆ ಪಾತ್ರರಾದವರಿಗೆ ಸಂದಾಯವಾಗುತ್ತದೆ. ಮಹಾತ್ಮರ ಸೇವೆ, ಪಾಠ-ಪ್ರವಚನ, ಗ್ರಂಥಲೇಖನಗಳಿಂದ ಬರುವ ಪುಣ್ಯವನ್ನು 'ಇಷ್ಟ-ಪುಣ್ಯ'ವೆಂದು ಕರೆಯುತ್ತಾರೆ. ಇಂತಹ ಪುಣ್ಯವನ್ನು ಜ್ಞಾನಿಗಳು ತಾವೇ ಉಳಿಸಿಕೊಳ್ಳುತ್ತಾರೆ. ಅನುಭವದ ಮೂಲಕವೇ ಪ್ರಾರಬ್ಧಕರ್ಮದ ಅಂಟು ತೊಳೆದುಕೊಳ್ಳುತ್ತಾರೆ-

'ಪ್ರಾರಬ್ಧಕರ್ಮಣೋಽನ್ಯಸ್ಯ ಜ್ಞಾನಾದೇವ ಪರಿಕ್ಷಯಃ ।' (ಸ.ಸಂ. 4-2)

ಪ್ರಾರಬ್ಧಕರ್ಮವು ಹರಿಶರಣರಿಗೆ ದುಃಖದ ತೀವ್ರತೆಯನ್ನು ನೀಡಲಾರದು. ಬ್ರಹ್ಮಸೂತ್ರ ಹಾಗೂ ಭಾಗವತಗ್ರಂಥವು ಈ ಸತ್ಯವನ್ನು ಸಾರಿವೆ- **'ಉಪಮರ್ದಂ ಚ'** (ಬ್ರ.ಸೂ. 3-4-16), **'ನ ವೈ ಜನೋ ಜಾತು ಕಥಂಚನಾವ್ರಜೇತ್ ಮುಕುಂದಸೇವ್ಯನ್ಯವದಂಗಸಂಸೃತಿಮ್'** (ಭಾಗ. 1.5.19).

ಅಪರೋಕ್ಷಜ್ಞಾನವನ್ನು ಪಡೆದ ನಂತರವೂ ಜ್ಞಾನಿಗಳು ಅನಾಯಾಸವಾಗಿ ಒದಗಿ ಬಂದ ಸಂಪತ್ತಿನಿಂದ ಸಮಾಜೋಪಯೋಗಿ ಕಾರ್ಯಗಳನ್ನು ಮಾಡಿ ಪುಣ್ಯವನ್ನು ಗಳಿಸಬಹುದಾಗಿದೆ.

ಇದರಂತೆ ಪಾಪಕಾರ್ಯಗಳನ್ನು ಅಪರೋಕ್ಷಜ್ಞಾನಿಗಳು ಮಾಡುವುದು ಕಂಡಿದೆ. ಬ್ರಹ್ಮಹತ್ಯಾ-ಸುರಾಪಾನ-ಪರಸ್ತ್ರೀಸಂಗ ಮೊದಲಾದ ಮಹಾಪಾತಕ ಮಾಡಿದರೆ ಇದರಿಂದ ಅವರು ಅಶುಚಿಯಾಗಲೀ ಸಂಭಾಷಣೆಗೆ ಅನರ್ಹರಾಗಲೀ ಆಗುವುದಿಲ್ಲ. ದೇಹಾಂತರಪ್ರಾಪ್ತಿಗೆ ಈ ಪಾಪವು ಕಾರಣವಾಗುವುದಿಲ್ಲ. ಸಾಮಾನ್ಯವಾಗಿ ಅಪರೋಕ್ಷಜ್ಞಾನಿಗಳಿಗೆ ನಿಷಿದ್ಧ ಕಾರ್ಯದಲ್ಲಿ ಪ್ರವೃತ್ತಿಯಾಗುವುದಿಲ್ಲ- **'ಕದಾಚಿದಪಿ ನಾಧರ್ಮೇ ಬುದ್ಧಿರ್ವಿಷ್ಣುದೃಶಾಂ ಭವೇತ್ ।'** (ಗೀ.ಭಾ.) ಆದರೆ ಪ್ರಾರಬ್ಧ-ಪ್ರಮಾದಗಳಿಂದ ಅವರಿಂದ ನಿಷಿದ್ಧಕಾರ್ಯಗಳು ಸಂಭವಿಸುವವು.

ಈ ಪಾಪಕಾರ್ಯಗಳನ್ನು ಅಲ್ಪ-ಮಹತ್-ಅತಿಮಹತ್ ಎಂದು ವಿಂಗಡಿಸಲಾಗಿದೆ. ಪಾಪಕರ್ಮಗಳಲ್ಲಿ ಮೂರು ಬಗೆ ಇರುವಂತೆ ಅಧಿಕಾರಿಗಳಲ್ಲಿಯೂ ಉತ್ತಮ-ಮಧ್ಯಮ-ಅಧಮರೆಂಬುದಾಗಿ ತ್ರೈವಿಧ್ಯವಿದೆ.

ಉತ್ತಮಾಧಿಕಾರಿಗಳಾದ ದೇವತೆಗಳಿಗೆ 'ಅಲ್ಪಪಾಪ'ವು ಸರ್ವಥಾ ಹಾನಿಕಾರಕ ವಲ್ಲ. ಆದರೂ ಅಶುಭಕರ್ಮಗಳನ್ನು ಮಾಡದಿರುವುದರಿಂದ ಆನಂದದಲ್ಲಿ ಹೆಚ್ಚಳ ಇದೆ-

'ಅಶುಭಾಭಾವಜೋನ್ಮಾಹೋ ಮಹಾಧೀಕಾರಿಣಾಮಪಿ ।
ಅಶುಭೇ ಕೃತೇ ನ ಭವತಿ ತಾರತಮ್ಯಾಚ್ಚ ಸ ಸ್ಮೃತಃ ॥' (ಭಾ.ತಾ. 5.6.5)

ದೇವತೆಗಳು ಮಹತ್ತರವಾದ ಬ್ರಹ್ಮಹತ್ಯಾದಿ ಪಾಪಗಳನ್ನು ಮಾಡಿದಲ್ಲಿ, ಅದರಿಂದ ದುಃಖ ಸಂಭವಿಸುವುದು. ಇದರ ಹಿನ್ನೆಲೆಯಲ್ಲಿ ಪ್ರಬಲ ಪ್ರಾರಬ್ಧಕರ್ಮದ ಅಸ್ತಿತ್ವವನ್ನು ಅರಿಯಬೇಕು-

'ಈಷತ್‌ಪ್ರಾರಬ್ಧಾನರ್ಥಸೂಚಕಂ ಚ ತದ್ ಭವತಿ ಮಹಚ್ಚೇತ್ ವೃತ್ರಹತ್ಯಾದಿವತ್ ।' (ಗೀ.ಭಾ. 3.18)

ದೇವತೆಗಳಿಂದ ತಮಗಿಂತ ಮೇಲಿನ ಕಕ್ಷೆಯ ದೇವತೆಗಳ ದ್ರೋಹ (ಅಪಚಾರ) ಕೆಲವೊಮ್ಮೆ ಸಂಭವಿಸುವುದು. ಚಂದ್ರ ಹಾಗೂ ಸುಗ್ರೀವನು ತಮಗೆ ಪೂಜ್ಯಳಾದ ಸ್ತ್ರೀಯನ್ನು ಉಪಭೋಗಿಸಿದ ಕಾರಣ ಅವರಿಗೆ 'ಸ್ವೋತ್ತಮದ್ರೋಹ'ವಾಯಿತು. ಇದರಂತೆ, ಋಷಿಗಳು ದೇವತೆಗಳಿಗೆ ಶಾಪ ಕೊಡುವುದು. ದೇವತೆಗಳು ತಮಗಿಂತ ಮೇಲಿನ ಕಕ್ಷೆಯ ದೇವತೆಗಳಿಗೆ ಶಾಪ ಕೊಡುವುದು, 'ಸ್ವೋತ್ತಮದ್ರೋಹ'ಕ್ಕೆ ಉದಾಹರಣೆಯಾಗಿ ಕಾಣಬಹುದು. ಇಂತಹ ಪ್ರಸಂಗಗಳಲ್ಲಿ ನಾವು ಸೂಕ್ಷ್ಮ ಪ್ರಮೇಯವನ್ನು ಇಲ್ಲಿ ಅರಿಯಬೇಕು.

ದೇವತೆಗಳು ತಮ್ಮ ಯೋಗ್ಯತೆಗಿಂತ ಮಿಗಿಲಾದ ಸಾಧನೆ ಮಾಡುವುದಿದೆ. ಇದರಿಂದ ಅವರಿಗೆ ಮೇಲಿನ ಕಕ್ಷೆಯವರ ಆನಂದವನ್ನು ಮುಕ್ತಿಯಲ್ಲಿ ನೀಡ ಬೇಕಾಗುವುದು. ಇಂತಹ ಪ್ರಸಂಗದಲ್ಲಿ ಪರಮಾತ್ಮನು ಉತ್ತಮ ದ್ರೋಹ ವನ್ನು ನಿಮಿತ್ತ ಮಾಡಿ, ಯೋಗ್ಯತೆಗಿಂತ ಹೆಚ್ಚಿಗೆ ಸಂಗ್ರಹವಾದ ಪುಣ್ಯವನ್ನು ಕಳೆದು ಅವರ ಸಾಧನೆ-ಯೋಗ್ಯತೆಗಳಿಗೆ ಅನುಗುಣವಾಗಿ ಆನಂದವನ್ನು ಕರುಣಿಸುವನು. ಅವರ ಯೋಗ್ಯತೆಗೆ ತಕ್ಕ ಆನಂದವು ದೊರಕದಿರುವ ಸಂಭವವಿರುವುದಿಲ್ಲ-

ಪ್ರಾಪ್ತಹ್ರಾಸೋ ಭವೇತ್ ಕ್ವಾಪಿ ಮಹತಾ ತು ವಿಕರ್ಮಣಾ ।
ಚಂದ್ರಸುಗ್ರೀವಯೋರ್ವೈವ ಸ್ವೋಚ್ಚದಾರಪರಿಗ್ರಹಾತ್ ।
ಪ್ರಾಪ್ತಹಾನಿರಭೂನ್ನೈವ ಕ್ಲೃಪ್ತಹಾನಿಃ ಕಥಂಚನ ॥

(ಬ್ರ.ಸೂ.ಅನು. 3.4.3)

ಮಧ್ಯಮಾಧಿಕಾರಿಗಳಾದ ಋಷ್ಯಾದಿಗಳಿಗೆ ಮಹದಪರಾಧವು ಇಲ್ಲಿ ದುಃಖದಾಯಕವಾಗಿದ್ದು ಮುಕ್ತಿಯಲ್ಲಿ ಕಿಂಚಿತ್ ಆನಂದಹ್ರಾಸಕ್ಕೆ ಕಾರಣ ವಾಗುವುದು.

'ಆಧಿಕಾರಿಕಜೀವಾನಾಮೇವಮನ್ಯೇಷು ಚ ದ್ವಯಮ್ ।'

(ಭಾ.ತಾ. 5.6.5)

ಆದರೆ ಮನುಷ್ಯೋತ್ತಮರು 'ಸ್ವೋತ್ತಮದ್ರೋಹ'ವನ್ನು ಮಾಡಿದಲ್ಲಿ ನಿರ್ದಿಷ್ಟವಾದ ಆನಂದವನ್ನು ಮುಕ್ತಿಯಲ್ಲಿ ಪೂರ್ಣವಾಗಿ ಪಡೆಯಲಾರರು. ಅಲ್ಪಪ್ರಮಾಣದ ಹ್ರಾಸ (ಕೊರತೆ) ಉಂಟಾಗುವುದು.

'ಹ್ರಾಸೋಽಪಿ ಮಾನುಷಾದೀನಾಮಾನಂದಸ್ಯ ವಿಕರ್ಮಣಾ ।
ಭವೇನ್ಮುಕ್ತೌ ವಿಶೇಷೇಣ ಸ್ವೋಚ್ಚಾನಾಮಪರಾಧತಃ ॥'

(ಬ್ರ.ಸೂ. 3.4.3)

ಹೀಗೆ ಅಪರೋಕ್ಷಾನಂತರದ 'ಪಾಪ'ಗಳ ಲೇಪದ ಬಗ್ಗೆ ವಿವರವನ್ನು ತಿಳಿಯಬೇಕು.

ಇಲ್ಲಿಯವರೆಗೆ ಆನಂದಮಯ ಮುಕ್ತಿಪಡೆಯುವ ಸಾಧಕರ ವಿಚಾರ ನಡೆಯಿತು. ಕೇವಲದುಃಖಾನುಭವರೂಪವಾದ ಮುಕ್ತಿ ಪಡೆಯುವ ತಾಮಸರ ಪುಣ್ಯಪಾಪಗಳ ವಿಷಯದಲ್ಲಿ ಸೂತ್ರ-ಭಾಷ್ಯ-ಟೀಕೆಯಲ್ಲಿ ಬಂದ ಹಾಗೂ ಸೂಚಿತವಾದ ಅನೇಕ ವಿಷಯಗಳನ್ನು ಭಾಷ್ಯದೀಪಿಕಾಕಾರರು ಸಂಗ್ರಹಿಸಿದ್ದಾರೆ, ಜೊತೆಜೊತೆಗೆ ಜ್ಞಾನಿಗಳಿಗೆ ಅನ್ವಯಿಸಿದ ನಿಯಮ (ನ್ಯಾಯ)ಗಳನ್ನು ಹರಿದ್ವೇಷಗಳಿಗೆ (ತಮೋಯೋಗ್ಯರಿಗೆ) ಹೇಗೆ ವಿಪರೀತ ವಾಗಿ ಅನ್ವಯಿಸಿಕೊಳ್ಳಬೇಕೆಂದು ಹೃದಯಂಗಮವಾಗಿ ವಿವರಿಸಿದ್ದಾರೆ-

ಹರಿದ್ವೇಷಿಯಾದ ತಮೋಯೋಗ್ಯನಾದ ಜೀವನ ಅಪ್ರಾರಬ್ಧಪೂರ್ವ ಪುಣ್ಯವು ಹರಿದ್ವೇಷದ ಪರಾಕಾಷ್ಠೆಯನ್ನು ತಲುಪಿದಾಗ ವಿನಾಶ ಹೊಂದು ವುದು. ಬ್ರಹ್ಮಾಪರೋಕ್ಷವುಳ್ಳ ಸಾತ್ತ್ವಿಕಜೀವನಿಗೆ ಅಪರೋಕ್ಷಾನಂತರದಲ್ಲಿ 'ಪಾಪ'ಲೇಪವಾಗದಿರುವಂತೆ, ಹರಿದ್ವೇಷಿಗೆ ತನ್ನ ಯೋಗ್ಯತಾನುಗುಣವಾದ ಹರಿದ್ವೇಷದ ಮಟ್ಟವನ್ನು ತಲುಪಿದ ನಂತರ ಪುಣ್ಯಲೇಪವೂ ಆಗುವುದಿಲ್ಲ. ಈ ಅಂಶವು 'ಇತರಸ್ಯಾಪ್ಯೇವಮಸಂಶ್ಲೇಷಃ ಪಾತೇ ತು' ಎಂಬ ಸೂತ್ರದಲ್ಲಿ ನಿರೂಪಿತವಾಗಿದೆ.

'ಅಗ್ನಿಹೋತ್ರಾದಿ ತು' (4. 1. 16) ಎಂಬ ಸೂತ್ರದಲ್ಲಿ ಸುಜೀವಿಯು ಅಪರೋಕ್ಷಜ್ಞಾನಕ್ಕಿಂತ ಮೊದಲು ಮಾಡಿದ ನಿಷ್ಕಾಮಪುಣ್ಯವು ಅಪರೋಕ್ಷಜ್ಞಾನಸಾಧನವೆಂದೂ ಅಪರೋಕ್ಷಾನಂತರದಲ್ಲಿ ನಡೆಸುವ ನಿಷ್ಕಾಮಕರ್ಮವು ಮುಕ್ತಿಯಲ್ಲಿ ಅವನ ಯೋಗ್ಯತೆಗೆ ಅನುಗುಣವಾದ ಆನಂದಾಭಿವೃದ್ಧಿಗೆ ಕಾರಣವೆಂಬ ಅಂಶ (ನ್ಯಾಯ)ವನ್ನು ಹರಿದ್ವೇಷಿಯ ವಿಷಯದಲ್ಲಿ ವಿಪರೀತವಾಗಿ ಅನ್ವಯಿಸಿಕೊಳ್ಳಬೇಕು. ಹೇಗೆಂದರೆ- ಯೋಗ್ಯತಾನುಗುಣವಾದ ಪರಿಪಕ್ವದ್ವೇಷಸ್ಥಿತಿಗಿಂತ ಮೊದಲು ಮಾಡಿದ ಪಾಪಗಳು ಯೋಗ್ಯತಾನುಗುಣವಾದ ದ್ವೇಷಪರಾಕಾಷ್ಠೆಗೆ ಕಾರಣವಾಗುತ್ತವೆ. ದ್ವೇಷಪರಾಕಾಷ್ಠೆಯ ತುತ್ತತುದಿಯನ್ನು ತಲುಪಿದಾಗ ನಂತರ ಮಾಡುವ ಪಾಪಗಳ ಫಲ- ತಮಃಪ್ರಾಪ್ತಿ.

ಇದರಂತೆ 'ಅತೋಽನ್ಯದಪಿ' (4. 1. 17) ಎಂಬ ಸೂತ್ರದಲ್ಲಿ ಜ್ಞಾನಪೂರ್ವ ಕಾಲೀನಕಾಮ್ಯ ಪುಣ್ಯ ಮತ್ತು ಅಪ್ರಾರಬ್ಧವಾದ ಅನಿಷ್ಟ ಪುಣ್ಯಕ್ಕೆ ನಾಶವನ್ನು ಅಪರೋಕ್ಷಾನಂತರದ ಕಾಮ್ಯಪುಣ್ಯಕ್ಕೆ ಅಶ್ಲೇಷರೂಪವಾದ ನ್ಯಾಯವು ಹೇಳಲ್ಪಟ್ಟಿದೆ. ಇದನ್ನು ದ್ವೇಷಿಗಳ ವಿಷಯದಲ್ಲಿ ವಿಪರೀತವಾಗಿ ಅನ್ವಯಿಸಿಕೊಳ್ಳಬೇಕು. ದ್ವೇಷದ ಪರಾಕಾಷ್ಠೆಯನ್ನು ತಲುಪುವ ಮೊದಲಿನ ಕಾಮ್ಯವೂ ಅಪ್ರಾರಬ್ಧವೂ ಆದ ಅನಿಷ್ಟ ಪುಣ್ಯವು ನಾಶವಾಗುವುದಿಲ್ಲ. ಇದರಿಂದ ಅವರಿಗೆ ಉತ್ತಮಕುಲ ಜನ್ಮ ಅಧಿಕಾರ ಮುಂತಾದವು ದೊರಕುತ್ತವೆ. ಉದಾ- ದುರ್ಯೋಧನನಿಗೆ ಕುರುಕುಲದಲ್ಲಿ ಜನ್ಮ- ಅಧಿಕಾರ ಇತ್ಯಾದಿ. ಇದರಿಂದ ಶ್ರೀಕೃಷ್ಣಭೀಮರಿಗೆ ದ್ರೋಹವೆಸಗುವ ಮೂಲಕ ಪೂರ್ಣವಾದ ತಮಃಪ್ರಾಪ್ತಿಯಾಗುವುದು. ಇಷ್ಟವಾದ ಪುಣ್ಯವು ವಿನಾಶಹೊಂದುವುದು. ದ್ವೇಷಪರಾಕಾಷ್ಠೆ ತಲುಪಿದ ನಂತರ ಮಾಡುವ ಕಾಮ್ಯಪುಣ್ಯವು ಅಪ್ರಾರಬ್ಧ ಹಾಗೂ ಅನಿಷ್ಟವಾದುದು ಅವರಿಗೆ ಅಲ್ಪಕಾಲ ಸುಖ ಫಲದಾಯಕವಾಗುವುದು. ಇಷ್ಟ ಪುಣ್ಯವು ಲೇಪವಾಗದು. ಮನುಷ್ಯಾಧಮರು ತಮ್ಮ ಯೋಗ್ಯತಾನುಗುಣವಾದ ಹರಿದ್ವೇಷದ ಪರಾಕಾಷ್ಠೆ ತಲುಪಿದ ನಂತರ ಅವರು ಆಕಸ್ಮಿಕವಾಗಿ ಮಾಡುವ ಅಕಾಮ್ಯಪುಣ್ಯಕರ್ಮವು ದುಃಖಾತಿಶಯವಾಗದಂತೆ ನೋಡಿಕೊಳ್ಳುವುದು. ಕಲ್ಯಾದಿದೈತ್ಯರು ದ್ವೇಷಪರಾಕಾಷ್ಠೆ ತಲುಪಿದ ನಂತರ ಅಕಾಮ್ಯಪುಣ್ಯಕರ್ಮ ಮಾಡಿದರೆ, ಅವರ ಯೋಗ್ಯತೆ ಮೀರಿ ಮಾಡಿದ ಪಾಪವು ನಾಶವಾಗುವುದು. ಇನ್ನು

'ಯದೇವ ವಿದ್ಯಯಾ' ಎಂಬ ಶ್ರುತಿ ವರ್ಣಿಸಿದಂತೆ ಅಪರೋಕ್ಷ ಜ್ಞಾನಿಕೃತವಾದ ಪುಣ್ಯವು ಅನಂತಫಲಕಾರಣವಾಗಿದೆ. ಈ ನಿಯಮವನ್ನು ದ್ವೇಷಿಗಳ ಪಾಪದ ವಿಷಯದಲ್ಲಿ ವಿಪರೀತವಾಗಿ ಅನ್ವಯಿಸಿಕೊಳ್ಳಬೇಕು- ದ್ವೇಷಿಗಳ ಪಾಪವು ತಮಃಪ್ರವೇಶದಲ್ಲಿ ಪರ್ಯವಸಾನಗೊಳ್ಳುವುದು. ಹೀಗೆ ಮೂರು ಸೂತ್ರಗಳಲ್ಲಿ ನಿರೂಪಿತನ್ಯಾಯಗಳನ್ನು ಹರಿದ್ವೇಷಿಗಳ ವಿಷಯದಲ್ಲಿ ವಿಪರೀತವಾಗಿ ವ್ಯಾಖ್ಯಾನಿಸಿಕೊಳ್ಳಬೇಕು. ಈ ವಿಷಯಗಳು ಭಾಷ್ಯದೀಪಿಕೆಯಲ್ಲಿ ಅತ್ಯಂತ ಮನೋಜ್ಞವಾಗಿ ಮೂಡಿಬಂದಿವೆ.

ಲಯಕ್ರಮ

ಭಾಷ್ಯದೀಪಿಕಾಕಾರರು 'ಅತ್ರಾಯಂ ಗುರುಪಾದೋಕ್ತಲಯಕ್ರಮಃ' ಎಂಬುದಾಗಿ ಟೀಕೋಕ್ತಲಯಕ್ರಮವನ್ನೇ ಸರಳವಾಗಿ ವಿವರಿಸಿದ್ದಾರೆ. ಆ ಕ್ರಮವನ್ನು ಹೀಗೆ ಅರಿಯ ಬಹುದಾಗಿದೆ- ಮನುಷ್ಯೋತ್ತಮರು, ನಿರ್ಋತಿಯಲ್ಲಿ ಇವರಿಗೆ ಯಮನಲ್ಲಿ ಪ್ರವೇಶವಾಗುವುದು. ಯಮನು, ವೈವಸ್ವತಮನು ಪ್ರಿಯವ್ರತಾದಿ ಚಕ್ರವರ್ತಿಗಳು ಹಾಗೂ ಪಿತೃಗಣದೊಂದಿಗೆ ಸ್ವಾಯಂಭುವ ಮನುವಿನಲ್ಲಿ ಲಯ ಹೊಂದುವನು. ಋಭುಗಳಿಗೆ ಪೃಥಿವಿಯಲ್ಲಿ ಲಯ. ಸಾಧ್ಯರಿಗೆ ಆಕಾಶಮಾನಿಯಲ್ಲಿ ಲಯ. ಅಗ್ನಿಪುತ್ರರಿಗೆ ಅಗ್ನಿಯಲ್ಲಿ ಲಯ. ಸ್ವಾಯಂಭುವ ಮನು ಅಗ್ನಿ ಮೊದಲಾದವರು ಸೂರ್ಯನನ್ನು ಪ್ರವೇಶಿಸಿ ತಮ್ಮ ದೇಹವನ್ನು ತೊರೆಯುವರು. ಸೂರ್ಯ, ವಿನಾಯಕ ಮೊದಲಾದವರು ಬೃಹಸ್ಪತಿಯಲ್ಲಿ ಲಯ ಹೊಂದುವರು. ಭೃಗು ಮೊದಲಾದ ಋಷಿಗಳಿಗೆ ದಕ್ಷನಲ್ಲಿ ಲಯವಿದೆ. ಬೃಹಸ್ಪತಿ, ಮನು, ದಕ್ಷ,ಮರುದ್ಗಣ ಹಾಗೂ ಶಚೀದೇವಿಗೆ ಇಂದ್ರನಲ್ಲಿ ಲಯ. ಇಂದ್ರನು ಗರುಡನ ಮಡದಿಯಾದ ಸೌಪರ್ಣಿಯಲ್ಲಿಯೂ, ಅವಳು ಗರುಡನಲ್ಲಿಯೂ ಪ್ರವೇತವನ್ನು ಹೊಂದುತ್ತಾಳೆ. ಇದನ್ನು 'ಗರುಡ ಮಾರ್ಗ' ವೆಂದು ಕರೆಯಲಾಗಿದೆ.

ಇದರಂತೆ ಇನ್ನೊಂದು ಮಾರ್ಗವಿದೆ. ಗಂಧರ್ವರು ಕುಬೇರನಲ್ಲಿ, ಶತಸ್ಥದೇವತೆಗಳು ಮತ್ತು ಅಶ್ವಿನೀದೇವತೆಗಳು ವರುಣನಲ್ಲಿ, ಕುಬೇರ ಹಾಗೂ ವರುಣನು ಸೋಮನಲ್ಲಿಯೂ, ಸೋಮ ವಿಷ್ವಕ್ಸೇನ ಮೊದಲಾದವರು ಅನಿರುದ್ಧನಲ್ಲಿಯೂ, ರತಿ, ಅನಿರುದ್ಧ ಹಾಗೂ ಸನಕಾದಿಗಳು

ಕಾಮದೇವನಲ್ಲಿಯೂ, ಕಾಮದೇವನು ಶೇಷನ ಮಡದಿಯಾದ ವಾರುಣಿಯಲ್ಲಿಯೂ, ವಾರುಣಿಯು ಶೇಷನಲ್ಲಿಯೂ ಪ್ರವೇಶವನ್ನು ಪಡೆಯುತ್ತಾಳೆ. ಇದನ್ನು 'ಶೇಷಮಾರ್ಗ'ವೆಂದು ವರ್ಣಿಸಲಾಗಿದೆ. ಹೀಗೆ ಗರುಡ-ಶೇಷರನ್ನು ಸೇರಿದ ದೇವತೆಗಳ ಗುಂಪು ಅಂತಿಮವಾಗಿ ಸರಸ್ವತಿಯ ಮೂಲಕ ಬ್ರಹ್ಮದೇವರನ್ನು ಅನಂತರ ಲಕ್ಷ್ಮೀದೇವಿಯನ್ನು ಸೇರಿಕೊಂಡು ನಾರಾಯಣನ ಉದರದಲ್ಲಿ ವಿಲೀನವಾಗುವುದು. **'ವಾಙ್ಮನಸಿ ದರ್ಶನಾತ್ ಶಬ್ದಾಚ್ಚ'** (ಬ್ರ.ಸೂ. 4-1), **'ಅತ ಏವ ಚಸರ್ವಾಣ್ಯನು'** (ಬ್ರ.ಸೂ. 4-2-3), **'ಸೋಽಧ್ಯಕ್ಷೇ ತದುಪಗಮಾದಿಭ್ಯಃ'** (ಬ್ರ.ಸೂ. 4-2-4), **'ಭೂತೇಷು ತಚ್ಛ್ರುತೇಃ'** (ಬ್ರ.ಸೂ. 4-2-5) ಇತ್ಯಾದಿ ಸೂತ್ರಗಳಲ್ಲಿ ಈ ಪ್ರಮೇಯವು ಪ್ರತಿಪಾದಿತವಾಗಿದೆ.

ಸೂಕ್ಷ್ಮವಿವೇಚನೆ-

ಅಭಾವಾಧಿಕರಣ (4.4.10)ದಲ್ಲಿ ಮುಕ್ತರಿಗೆ ಭೋಗವನ್ನೊಪ್ಪಿದರೆ ಬರಬಹುದಾದ ಅನುಪಪತ್ತಿಯನ್ನು ವಿಮರ್ಶಿಸಲಾಗಿದೆ. ಅಂತಿಮವಾಗಿ ದೇಹಾಭಿಮಾನವಿಲ್ಲದ ಕನಸಿನಲ್ಲಿ ಭೋಗಾನುಭವವಿರುವಂತೆ ಮುಕ್ತಿಯಲ್ಲಿ ಜಡದೇಹವಿಲ್ಲದಿದ್ದರೂ ಭೋಗಾನುಭವ ಸಾಧ್ಯವಿದೆ. ಭೋಗಾನುಭವಕ್ಕೆ ಶರೀರದ ಅಗತ್ಯವಿದೆ. ಮುಕ್ತರಿಗೆ ಸ್ವರೂಪಭೂತವಾದ ಚಿದಾನಂದಮಯವಾದ ಶರೀರವಿದ್ದೇ ಇದೆ. ಆದ್ದರಿಂದ ಅವರಿಗೆ ಭೋಗವು ಯುಕ್ತವಾಗಿದೆ. ಆದರೂ ಶುದ್ಧಸತ್ತ್ವಾತ್ಮಕವಾದ ಜಡದೇಹಗಳನ್ನು ಮುಕ್ತರು ಸ್ವೇಚ್ಛೆಯಿಂದ ಭೋಗಕ್ಕಾಗಿ ಪಡೆಯುವುದು ಮತ್ತು ತೊರೆಯುವುದು ಇದೆ. ಆದರೆ ಜಡದೇಹವನ್ನು ಮುಕ್ತರು ಸ್ವೀಕರಿಸಿದರೂ ಅದರ ಯಾವ ವಿಕಾರಗಳೂ ಅವರಿಗೆ ಇರುವುದಿಲ್ಲ ಎಂದು ನಿರೂಪಿಸಲಾಗಿದೆ.

ಈ ಪ್ರಸಂಗದಲ್ಲಿ ಭಾಷ್ಯದೀಪಿಕಾಚಾರ್ಯರು ಮುಕ್ತರಿಗೆ ಸ್ಥೂಲವಾದ ಭೌತಿಕದೇಹದಿಂದ ಮುಕ್ತಿ ಇದೆಯೆಂದು ವಿವರಿಸುವುದರ ಜೊತೆಗೆ ಮುಕ್ತಿಯಲ್ಲಿ ಸ್ವರೂಪದೇಹಕ್ಕೆ ವೃದ್ಧಿ ಇದೆಯೆಂಬ ಅಪೂರ್ವಪ್ರಮೇಯವನ್ನು ಬೃಹದ್ ಭಾಷ್ಯದ ಮತ್ತು ಅದರ ವ್ಯಾಖ್ಯಾನವಾದ ವ್ಯಾಸತೀರ್ಥೀಯ ವಚನವನ್ನು ಉದ್ಧರಿಸಿ ನಿರೂಪಿಸಿದ್ದಾರೆ-

'ಸಂಸಾರವಸ್ಥೆಯಲ್ಲಿ ಅಣುರೂಪನಾದ ಜೀವನ ತೇಜಸ್ಸು ಅಲ್ಪ

ವಾಗಿರುತ್ತದೆ. ಆದರೆ ಮುಕ್ತಿಯಲ್ಲಿ ಅಣುವಾದ ಜೀವಸ್ವರೂಪವನ್ನು ಹೆಚ್ಚಿದ ಪರಿಮಾಣ ಮತ್ತು ತೇಜಸ್ಸುಳ್ಳದ್ದಾಗಿ ಮಾಡುತ್ತಾನೆ' (ಬ್ರಹ್ಮವೈವರ್ತ)

ಈ ಪ್ರಮಾಣ ವಚನವು ಭಾಷ್ಯದೀಪಿಕಾಕಾರರು ಹೀಗೆ ವಿವರಿಸುತ್ತಾರೆ-

ಜೀವನ ಚರಮಶರೀರದಲ್ಲಿರುವ ಸ್ಥೂಲತೆಯನ್ನು ಮುಕ್ತಿಯಲ್ಲಿರುವ ಸ್ವರೂಪದೇಹಕ್ಕೆ ಪರಮಾತ್ಮನು ಕರುಣಿಸುವನು. ಹೇಗೆ ಹತ್ತಿಯ ಉಂಡೆಯನ್ನು ಹಿಂಜಿ ಬೃಹದಾಕಾರ ನೀಡಲಾಗುವುದೋ ಹಾಗೆಯೇ ಜೀವಸ್ವರೂಪಕ್ಕೂ ಸ್ಥೂಲತೆ ಇದೆ''

ಹೀಗೆ ಹೇಳಿದಾಗ ಒಂದು ಸಮಸ್ಯೆ ಇದೆ. ಜೀವನಿಗೆ ಸ್ಥೂಲತೆಯನ್ನು ಒಪ್ಪಿದರೆ ವಿಕಾರವನ್ನು ಅಂಗೀಕರಿಸಿದಂತಾಗುವುದು. ಯಾವುದು ವಿಕಾರಿಯೋ ಅದು ಅನಿತ್ಯವಾಗಿದೆ. ಆದ್ದರಿಂದ ಜೀವಸ್ವರೂಪವೂ ಅನಿತ್ಯ ವಾಗುವ ಪ್ರಸಕ್ತಿ ಇದೆ.

ಈ ಸಂದೇಹವನ್ನು ನ್ಯಾಯಸುಧೆ- ಗೀತಾಭಾಷ್ಯ ಪ್ರಮೇಯದೀಪಿಕೆಯ ಆಧಾರದಿಂದ ನವಿರಾಗಿ ಪರಿಹರಿಸಿದ್ದಾರೆ-

'ಜೀವನ ಸ್ವರೂಪದಲ್ಲಿ ವಿಕಾಸವನ್ನು ಒಪ್ಪಿದರೂ ಜೀವನಿಗೆ ಅನಿತ್ಯತ್ವ-ಪ್ರಸಕ್ತಿ ಇರುವುದಿಲ್ಲ. ಜೀವನಲ್ಲಿರುವ ಯಾವದ್ ಧರ್ಮಭಾವಿಯಾದ (ಅವಿಭಾಜ್ಯವೂ ನಿತ್ಯವೂ ಆದ) ಧರ್ಮಗಳಿಗೆ ವಿನಾಶ ಒಪ್ಪಿದರೆ ಮಾತ್ರ ಜೀವನಿಗೆ ಅನಿತ್ಯತ್ವ ಬರುವ ಸಂಭವವಿದೆ. ಆದರೆ ಪರಮಾತ್ಮನು ತನ್ನ ಅಚಿಂತ್ಯಶಕ್ತಿಯಿಂದ ಜೀವಸ್ವರೂಪದಲ್ಲಿ ವಿಕಾಸನೀಡಿ ಭೋಗವನ್ನು ನೀಡುವನೆಂಬ ಪಕ್ಷದಲ್ಲಿ ಯಾವುದೇ ಜೀವನ ಸಹಜಧರ್ಮಕ್ಕೆ ವಿನಾಶವನ್ನು ಒಪ್ಪಿದಂತಾಗುವುದಿಲ್ಲ. ಆದ್ದರಿಂದ ಜೀವನಿಗೆ ಅನಿತ್ಯತ್ವ ಪ್ರಸಕ್ತಿ ಇರುವುದಿಲ್ಲ.

ಹೀಗೆ ಸೂಕ್ಷ್ಮವಾದ ಉತ್ತರಪ್ರಸ್ಥಾನದ ಕೃತಿಗಳ ವಿಷಯಗಳನ್ನು ನಿರೂಪಿಸಿ ಓದುಗರ ಚಿಂತನೆಯಮಟ್ಟವನ್ನು ವಿಶದಗೊಳಿಸುತ್ತಾರೆ.

ಹೀಗೆ, 'ಸ್ವಾಪ್ಯಯಸಂಪತ್ಯೋರನ್ಯತರಾಪೇಕ್ಷಮಾವಿಷ್ಕೃತಂ ಹಿ' (4.4.16) ಮೊದಲಾದ ಸೂತ್ರಗಳಲ್ಲಿ ಬಹುಮುಖವ್ಯಾಖ್ಯಾನದ ಜೊತೆಗೆ ಸೂಕ್ಷ್ಮವಿವೇಚನೆ ಕಾಣಬಹುದಾಗಿದೆ.

ವಿರೋಧ ಪರಿಹಾರ

'ಪ್ರತ್ಯಕ್ಷೋಪದೇಶಾದಿತಿ ಚೇನ್ನಾಧಿಕಾರಿಕಮಂಡಲಸ್ಥೋಕ್ತೇಃ' (4.4.19) ಸೂತ್ರ ವ್ಯಾಖ್ಯಾನಪ್ರಸಂಗದಲ್ಲಿ ಭಾಷ್ಯಕಾರರು 'ಆತ್ಮತ್ವರೂಪ ಏಕಗುಣೋಪಾಸಕರು ಇಲ್ಲಿಯೇ ಮುಕ್ತಿ ಹೊಂದುವರು, ಇವರಿಗೆ ಬ್ರಹ್ಮನಾಡಿ ಅಥವಾ ಅದರ ಪ್ರಭೇದವಾದ ನಾಡಿಗಳಿಂದ ಉತ್ಕ್ರಮಣ ವಿಲ್ಲ''ಎಂದಿದ್ದಾರೆ.

ಇಲ್ಲಿ ತುಂಬ ಶಂಕೆಗಳು ಮೂಡುತ್ತವೆ ಮುಕ್ತಿಯೆಂದರೆ ಎಲ್ಲರೂ ಶ್ವೇತದ್ವೀಪ-ಅನಂತಾಸನ-ವೈಕುಂಠಲೋಕಗಳಿಗೆ ಹೋಗುವರೆಂದು ಭ್ರಮೆ ಸಾಮಾನ್ಯ ಜನರಿಗಿರುತ್ತದೆ. ಭಾಷ್ಯದೀಪಿಕಾಚಾರ್ಯರು ಈ ಪ್ರಸಂಗದಲ್ಲಿ ಅನೇಕ ಪ್ರಮಾಣಗಳನ್ನು ಉಲ್ಲೇಖಿಸಿ ಆಚಾರ್ಯರ ಆಂತರಂಗವನ್ನು ತೆರೆದಿಟ್ಟಿದ್ದಾರೆ-

ಆತ್ಮತ್ವರೂಪವಾದ ಏಕಗುಣೋಪಸಕಾರದ ಕೆಲವು ಜೀವರು ಶ್ರೀಹರಿಯನ್ನು ಉಪಾಸಿಸಿ, ಸಾಕ್ಷಾತ್ಕರಿಸಿಕೊಂಡು, ಪ್ರಾರಬ್ಧಕರ್ಮವನ್ನು ಅನುಭವಿಸಿ ಭೂಲೋಕದಲ್ಲಿಯೇ ಭೌತಿಕದೇಹದಿಂದ ಬಿಡುಗಡೆ ಪಡೆದು ಇಲ್ಲಿಯೇ ಸ್ವರೂಪ ಸುಖವನ್ನು ಅನುಭವಿಸುತ್ತಾರೆ. ಬ್ರಹ್ಮನಾಡೀ ಅಥವಾ ಇತರನಾಡಿಗಳಿಂದ ಅವರಿಗೆ ಉತ್ಕ್ರಮಣವಿಲ್ಲ.

ಹಾಗಾದರೆ, 'ತದೋಕೂಗ್ರಜ್ವಲನಂ'(4.2.17) ಎಂಬ ಸೂತ್ರ ವಿರೋಧಬರುವುದಲ್ಲವೆ? ಇಲ್ಲಿ ನಾಡಿಯಮೂಲಕ ಜೀವನಿಗೆ ಉತ್ಕ್ರಮಣವನ್ನು ವರ್ಣಿಸಲಾಗಿದೆ.

ನಿಜ; ಆದರೆ-

'ಕೇಚಿತ್ತು ಮಾನುಷಾ ಮುಕ್ತಿಮನುತ್ಕ್ರಮ್ಯೈವ ದೇಹತಃ ।
ದೇಹಪಾತೇ ತು ದೇಹಸ್ಯ ದೋಷಾನ್ ಭುಕ್ತ್ವೈವ ಸರ್ವತಃ ॥
ಮರಣೋಚ್ಛ್ವಾನತಾದೀಂಸ್ತು ಸ್ವಕೀಯಾರಬ್ಧಕರ್ಮಜಾನ್ ।
ದೇಹೇ ಜೀರ್ಣೇ ತು ಗಚ್ಛಂತಿ ದೃಷ್ಟ್ವಾ ವಿಷ್ಣುಮನುಜ್ಞಯಾ ॥
ಪುನರತ್ರೈವ ತಿಷ್ಠಂತಿ ನಿತ್ಯಾನಂದೈಕಭೋಗಿನಃ ॥'

ಎಂಬ ಬೃಹಾದರಾಣ್ಯಭಾಷ್ಯೋದಾಹೃತಪ್ರಮಾಣವು ಏಕಗುಣೋಪಾಸಕರಿಗೆ ಭೂಲೋಕದಲ್ಲಿಯೆ ಮೌಕ್ತಾನಂದವನ್ನು ಸಮರ್ಥಿಸುತ್ತಿದೆ. ಆದ್ದರಿಂದ

'ತದೋಕ್ಕ್ರೋಗ್ರಜ್ವಲನಂ' (4.2.17) ಎಂಬ ಸೂತ್ರದ ವಿವರಣೆಯು ಏಕಗುಣೋಪಾಸಕರನ್ನು ಹೊರತುಪಡಿಸಿ ಬೇರೆ ಜೀವರನ್ನು ಗಮನದಲ್ಲಿರಿಸಿ ಹೊರಟಿದೆ ಎಂದು ವಿರೋಧಪರಿಹಾರವನ್ನು ಅರಿಯಬೇಕು.

ಏಕಗುಣೋಪಾಸಕರು, ಪ್ರಲಯಕಾಲದಲ್ಲಿ ಎಲ್ಲರಂತೆ ಲಿಂಗದೇಹ ಭಂಗವನ್ನು ಹೊಂದಿ ಶ್ರೀಹರಿಯ ಉದರ ಪ್ರವೇಶಿಸಿ ನಂತರ ಸೃಷ್ಟಿಯಾದ ಮೇಲೆ ಶ್ವೇತದ್ವೀಪ ಪತಿಯಾದ ವಾಸುದೇವನನ್ನು ಕಂಡು ನಂತರ ಭೂಲೋಕದಲ್ಲಿಯೇ ಮೌಕ್ತ ಸುಖವನ್ನು ಅನುಭವಿಸುವರು.

ಇನ್ನು ಕೆಲವರು ಭಾಷ್ಯವಚನಕ್ಕೆ ಹೀಗೆ ವ್ಯಾಖ್ಯಾನಿಸುತ್ತಾರೆ- 'ಒಮ್ಮೆ ಬ್ರಹ್ಮನಾಡೀ ಪ್ರಭೇದ ನಾಡಿಯ ಮೂಲಕ ಉತ್ಕ್ರಾಂತಿಯನ್ನು ಪಡೆದು ಲಿಂಗಶರೀರಭಂಗ- ಹರಿಯ ಶರೀರಪ್ರವೇಶ- (ಲಯಕಾಲದಲ್ಲಿ) ಪರವಾಸುದೇವದರ್ಶನ ಮಾಡಿಕೊಂಡು ಒಮ್ಮೆ ಭೂಮಿಗೆ ಬಂದ ನಂತರ ಮತ್ತೆ ಎಲ್ಲೂ ಹೋಗುವುದಿಲ್ಲ.

ಕೆಲವರು ಆತ್ಮತ್ವವೆಂಬ ಒಂದೇ ಗುಣೋಪಾಸಕರಿಲ್ಲ ಎಲ್ಲರೂ ಸತ್ (ನಿರ್ದೋಷ) ಚಿತ್(ಜ್ಞಾನಮಯ) ಆನಂದ-ಆತ್ಮಾ (ಒಡೆಯ=ಸ್ವಾಮಿ) ಎಂಬ ನಾಲ್ಕು ಗುಣೋಪಾಸಕರೇ ಆಗಿರುತ್ತಾರೆ. ಆತ್ಮತ್ವಗುಣೋಪಾಸನೆಯನ್ನು ಮಾತ್ರವೇ ಹೇಳಿದ ಕಡೆಯಲ್ಲಿ ಉಪಲಕ್ಷಣಯಾ (ಅಜಹಲ್ಲಕ್ಷಣಯಾ) ಸತ್ ಚಿತ್ -ಆನಂದವೆಂಬ ಮೂರು ಗುಣಗಳನ್ನೂ ತೆಗೆದುಕೊಳ್ಳಬೇಕೆಂದು ಅಭಿಪ್ರಾಯಪಡುತ್ತಾರೆ. ಆದರೆ, ಆತ್ಮತ್ವರೂಪ ಏಕಗುಣೋಪಾಸಕರನ್ನು ಸಮರ್ಥಿಸುವ ಟೀಕಾ ಹಾಗೂ ಆನಂದಮಾಲಾ ಗ್ರಂಥದ ವಿರೋಧವು ಈ ಪಕ್ಷದಲ್ಲಿ ಅಪರಿಹಾರ್ಯ. ಆನಂದಮಾಲಾಕಾರರಾದ ತ್ರೈವಿಕ್ರಮಾರ್ಯದಾಸರು ಹೀಗೆ ಹೇಳಿದ್ದಾರೆ- 'ಅಥ ಚತುರ್ಗುಣೋಪಾಸ್ತೇರಶಕ್ಯತ್ವೇ ಆನಂದಾದೀನಾಂ ಆತ್ಮತ್ವಗುಣೈಕೀಕಾರೇಣಾಪಿ ಕಥಂಚಿದುಪಾಸ್ತಿರಸ್ತಿ।' ಇಲ್ಲಿ ಆನಂದಮಾಲಾಕಾರರು ಚತುರ್ಗುಣೋಪಾಸನೆಯಲ್ಲಿ ಅಶಕ್ತರಾದವರಿಗೆ ಏಕಗುಣೋಪಾಸನೆಯನ್ನು ಸಮರ್ಥಿಸಿದ್ದಾರೆ.

ಈ ಹಿನ್ನಲೆಯಲ್ಲಿ ಆತ್ಮತ್ವರೂಪಏಕಗುಣೋಪಾಸಕರನ್ನು ಒಪ್ಪಿ ಅವರಿಗೂ ಒಮ್ಮೆ ಶ್ವೇತದ್ವೀಪಗಮನವನ್ನು ಒಪ್ಪಲೇಬೇಕು. ಈ ಪ್ರಸಂಗದಲ್ಲಿ ಭಾಷ್ಯದೀಪಿಕೆಯಲ್ಲಿ ಅನೇಕ ಸೂಕ್ಷ್ಮವಿಷಯಗಳು ಚರ್ಚಿತವಾಗಿವೆ.

ಈ ನಾಲ್ಕನೆಯ ಅಧ್ಯಾಯದ ಕೊನೆಯಲ್ಲಿ ಸಮಗ್ರ ಅಧ್ಯಾಯಾರ್ಥವನ್ನು ಒಂದು ಪುಟದಲ್ಲಿ ಸುಂದರವಾಗಿ ಸಂಗ್ರಹಿಸಿರುವ ಅವರ ಕೌಶಲ ಅಸಾಧಾರಣವಾದುದು.

ಈ ಭಾಷ್ಯದೀಪಿಕೆ ಹೆಸರಿಗೆ ತಕ್ಕಂತೆ ಭಾಷ್ಯದ ಪ್ರತಿಪದಾರ್ಥದ ಮೇಲೆ ಬೆಳಕು ಚೆಲ್ಲುವುದರ ಜೊತೆಗೆ ಭಾಷ್ಯಕಾರರ ಅಂತರ್ಯವನ್ನು ಹೃದಯಂಗಮವಾಗಿ ವಿವರಿಸಿದೆ. ಇದರ ಅಧ್ಯಯನ - ಅಧ್ಯಾಪನಗಳು ವಿದ್ವಾಂಸರಿಗೆ ಮುದ ನೀಡುವಲ್ಲಿ ಸಂದೇಹವಿಲ್ಲ.

ಪೂರ್ಣಪ್ರಜ್ಞ ವಿದ್ಯಾಪೀಠದಲ್ಲಿ ಅನ್ನ-ವಸ್ತ್ರಗಳನ್ನು ನೀಡಿ, ಅನುಪಮ ಕೃಪೆಯಿಂದ ಶ್ರೀಸುಧಾಗ್ರಂಥವನ್ನು ಪಾಠ ಮಾಡಿ ಇಲ್ಲಿ ಸೇವೆ ಸಲ್ಲಿಸುವ ಅವಕಾಶ ಕಲ್ಪಿಸಿದ ಪರಮಪೂಜ್ಯ ಗುರುಗಳಾದ ಶ್ರೀವಿಶ್ವೇಶತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳವರಿಗೆ ಭಕ್ತಿಪೂರ್ವಕ ಸಾಷ್ಟಾಂಗ ಪ್ರಣಾಮಗಳನ್ನು ಅರ್ಪಿಸುತ್ತಿದ್ದೇನೆ.

ಸಂಶೋಧನ ಮಂದಿರದ ಅಧ್ಯಕ್ಷರೂ, ಪೂಜ್ಯ ಗುರುಗಳೂ ಆದ ಪ್ರೊ। ಡಿ. ಪ್ರಹ್ಲಾದಾಚಾರ್ಯರಿಗೆ ನನ್ನ ಗೌರವಪೂರ್ವಕ ನಮಸ್ಕಾರಗಳು.

ಈ ಕೃತಿಯನ್ನು ಹೊರತರುವಲ್ಲಿ ಎಲ್ಲ ಹಂತದಲ್ಲಿಯೂ ಪ್ರೀತಿಯಿಂದ ಸಹಕಾರವನ್ನು ನೀಡಿ ಮಾರ್ಗದರ್ಶನ ಮಾಡಿದ ಸಂಶೋಧನ ಮಂದಿರದ ನಿರ್ದೇಶಕರಾದ ಡಾ। ಎ.ವಿ. ನಾಗಸಂಪಿಗೆಯವರಿಗೆ ನನ್ನ ಗೌರವದ ವಂದನೆಗಳು.

ವಿ। ಕಡ್ಡಿ ಬದರೀನಾರಾಯಣಾಚಾರ್ಯರು 4ನೇ ಅಧ್ಯಾಯ' ಸೂತ್ರದೀಪಿಕೆಯ ಸಂಶೋಧಿತ ಭಾಗವನ್ನು ಇದರೊಡನೆ ಮುದ್ರಿಸಲು ನೀಡಿ ಉಪಕರಿಸಿದ್ದಾರೆ. ಅವರಿಗೆ ನನ್ನ ಗೌರವದ ವಂದನೆಗಳು. ಅಕ್ಷರ-ಸಂಯೋಜನೆ ಕಾರ್ಯವನ್ನು ನೆರವೇರಿಸಿದ ಶ್ರೀ ಅಂಜನಪ್ರಸಾದ್ ಹಾಗೂ ವಿ। ವ್ಯಾಸರಾಜ ಜೋಶಿಯವರಿಗೆ ನನ್ನ ವಂದನೆಗಳು.

ಈ ಕೃತಿಯ ಯಥಾಮತಿ ಸಂಶೋಧನೆಯನ್ನು ನಡೆಸಿದ್ದೇನೆ. ವಿದ್ವಾಂಸರು ಹಂಸಕ್ಷೀರನ್ಯಾಯದಿಂದ ಈ ಪ್ರಯತ್ನವನ್ನು ಅಭಿನಂದಿಸುವರೆಂದು ನಂಬುತ್ತೇನೆ.

ವಿ। ವೆಂಕಟರಮಣ ಉಪಾಧ್ಯಾಯ

विषयानुक्रमणिका

विषयः पृ.सं.

चतुर्थाध्याये प्रथमः पादः

१. आवृत्त्यधिकरणम्
श्रवणमननादीनाम् आवृत्तिः कर्तव्या १

२. आत्माधिकरणम्
विष्णुः मम स्वामी इत्युपासना कर्तव्या ५

३. नप्रतीकाधिकरणम्
नामादिप्रतिमायां ब्रह्मदृष्टिः न कर्तव्या, किन्तु तत्स्थत्वेनैव ८

४. ब्रह्माधिकरणम्
ब्रह्म सर्वोत्कृष्टम् इति उपास्यम् ११

५. आदित्याधिकरणम्
परमात्मनोऽवयवे आदित्यादिजनकत्वोपासना देवैरेव कार्या १३

६. आसीनाधिकरणम्
आसीनस्सन् उपासनां कुर्यात् १६

७. आप्रायणाधिकरणम्
आमोक्षम् उपासना अस्ति २२

८. तदधिगमाधिकरणम्
परमात्माऽपरोक्षे जाते पूर्वतनयोः अनारब्धयोः अनभीष्टयोश्च
पुण्यपापयोः नाशः, उत्तरयोः अनारब्धयोः अनभीष्टयोः
पुण्यपापयोरसम्बन्धः भवति २५

अथ द्वितीयः पादः

१. वाङ्मनसाधिकरणम्
उमा रुद्रे विलीयते, सर्वे देवाः स्वोत्तमेषु श्रुत्युक्तक्रमेण
विलीयन्त इति निरूपणम् ३७

विषयः	पृ.सं.
२. मनःप्राणाधिकरणम्	
मनोऽभिमानी रुद्रः मुख्यप्राणे विलीयते	३९
३. अध्यक्षाधिकरणम्	
मुख्यप्राणः परमात्मनि विलीयते	४०
४. भूताधिकरणम्	
अधमदेवतानां भूताभिमानिषु लयः	४३
५. नैकस्मिन्नधिकरणम्	
अग्नौ न सर्वेषां लयः	४४
६. समनाधिकरणम्	
लक्ष्म्याः लयो नास्ति	४७
७. पराधिकरणम्	
सर्वे देवाः क्रमात् परमात्मनि विलीयन्ते	५७
८. अविभागाधिकरणम्	
मुक्ताः भगवदधीनाः भगवदिच्छाऽनुसारेणैव कामयन्ति	५८
९. तदोकोऽधिकरणम्	
मुक्तियोग्यानां मनुष्याणां देहादुत्क्रमणकाले हृदयस्य नाडीस्थप्रकाशद्वारेण निष्क्रमणं भवति	६०
१०. योग्यधिकरणम्	
ज्ञानयोगिनः ब्रह्मप्राप्तिः कर्मयोगिनः चन्द्रप्राप्तिः गतिस्मरणानुसारेण भवति	६९
अथ तृतीयः पादः	
१. अर्चिराद्यधिकरणम्	
ब्रह्मप्राप्तिमार्गः अर्चिरादिः	७२

विषयः पृ.सं.

२. वायुशब्दाधिकरणम्

अर्चिर्मार्गेण गतस्य वायुलोकः प्राप्य इति निरूपणम् ७४

३. तटिदधिकरणम्

संवत्सराभिमानिलोकप्राप्त्यनन्तरं तटिल्लोकप्राप्तिः

तदनन्तरं वरुणलोकप्राप्तिः ७५

४. आतिवाहिकाधिकरणम्

पूर्वोक्तवायुलोकः आतिवाहिकनामकवायुलोकः ७७

५. वैद्युताधिकरणम्

ब्रह्मप्राप्तिमार्गे मुख्यवायुलोक एव अन्तिमप्राप्यः ८०

६. कार्याधिकरणम्

वायुः व्याप्तोपासकान् परं ब्रह्म नयति,

अन्यांस्तु कार्यं ब्रह्म नयति ८२

अथ चतुर्थः पादः

१. सम्पद्याधिकरणम्

जीवः परमात्मानं प्राप्य तम् अविहाय स्वस्वरूपेण

सर्वान् भोगान् अनुभवति ९२

२. मुक्ताधिकरणम्

ब्रह्म प्राप्य तदविहायैव मुक्तः भोगभाक् भवति ९४

३. आत्माधिकरणम्

मुक्तप्राप्यः परंज्योतिः परमात्मैव ९५

४. अविभागाधिकरणम्

परमात्मनि प्रविष्टः जीवः परमात्मभुक्तभोगानेव अनुभवति ९६

विषयः	पृ.सं.
५. ब्राह्माधिकरणम्	
परमात्मनि प्रविष्टः सायुज्ययोग्यमुक्तजीवः	
स्वस्वरूपदेहेन परमात्मदेहेनापि भोगाननुभवति	९७
६. सङ्कल्पाधिकरणम्	
मुक्तः स्वसङ्कल्पमात्रेण भोगाननुभवति	१०३
७. अनन्याधिपत्यधिकरणम्	
मुक्तानां स्वाधमा अधिपतयः न सन्ति	१०४
८. अभावाधिकरणम्	
मुक्ताः शुद्धसत्त्वात्मकदेहेन चिद्रूपदेहेन वा भोगाननुभवन्ति	१०६
९. जगद्व्यापाराधिकरणम्	
मुक्ताः जगत्सृष्ट्यादिव्यतिरिक्तान् कामाननुभवन्ति	११६
१०. स्थित्यधिकरणम्	
मौक्तानन्दे प्रायः वृद्धिह्रासौ न स्तः ।	
भगवदुपासना तु सुखरूपिणी न साधनभूता	१२७
११. अनावृत्त्यधिकरणम्	
पुनरावृत्तिरहितो मुक्तः	१३३
सूत्रदीपिका	१३९
परिशिष्टम्- १	
ब्रह्मसूत्रानुक्रमणिका	१६१
परिशिष्टम्- २	
श्रीविजयीन्द्रतीर्थकृतब्रह्मसूत्रन्यायसङ्ग्रहः	१६६
परिशिष्टम्- ३	
श्रीधीरेन्द्रयतिविरचितः विषयवाक्यसङ्ग्रहः	१६८

विषयः	पृ.सं.
परिशिष्टम्- ४	
श्रीसुधीन्द्रतीर्थविरचिता श्रीमद्ब्रह्मसूत्राधिकरणरत्नमाला	१७०
परिशिष्टम्- ५	
एतद्ग्रन्थोदाहृतप्रमाणवचनानां वर्णानुक्रमसूचिका	१७३
परिशिष्टम्- ६	
अद्वैत-विशिष्टाद्वैत-द्वैतदर्शनानुसारेण अधिकरणसूत्रसङ्ख्यासूचिका	१८१

सङ्केताक्षरसूची

आ.श्रौ.	-	आपस्तम्बश्रौतसूत्रम्
ऋ.	-	ऋग्वेदः
ऐ.आ.	-	ऐतरेयारण्यकम्
ऐ.भा.	-	ऐतरेयभाष्यम्
ऐ.भा.द्वि.प्र.	-	ऐतरेयभाष्यद्वितीयप्रघट्टके प्रथमाध्यायान्ते
कठ.	-	कठोपनिषत्
केन.	-	केनोपनिषत्
केन.भा.	-	केनभाष्यम्
कौ.	-	कौषीतक्युपनिषत्
गी.ता.	-	गीतातात्पर्यनिर्णयः
गी.भा.	-	गीताभाष्यम्
छां.	-	छान्दोग्योपनिषत्
छां.भा.	-	छान्दोग्यभाष्यम्
जै.सू.	-	जैमिनिसूत्राणि
तै.	-	तैत्तिरीयोपनिषत्
तै.आ.	-	तैत्तिरीयारण्यकम्
तै.भा.	-	तैत्तिरीयभाष्यम्
तै.सं.	-	तैत्तिरीयसंहिता
तं.सं.	-	तन्त्रसारसङ्ग्रहः
प्र.	-	पट्प्रश्नोपनिषत्
वृ.भा.	-	वृहदारण्यकभाष्यम्
ब्र.सू.	-	ब्रह्मसूत्राणि
ब्र.सू.अनु.	-	ब्रह्मसूत्रानुव्याख्यानम्
भ.गी.	-	भगवद्गीता

भाग.	-	भागवतम्
भा.ता.	-	भागवततात्पर्यम्
म.ता.नि.-		महाभारततात्पर्यनिर्णयः
म.भा.	-	महाभारतम्
महा.	-	महानारायणोपनिषत्
मां.उ., मा.		माण्डूक्योपनिषत्
मुं.	-	मुण्डकोपनिषत्
वि.त.उ.व.-		विष्णुतत्त्वनिर्णयोदाहृतवचनम्
श्वे.	-	श्वेताश्वतरोपनिषत्
स.स्मृ.	-	सदाचारस्मृतिः

॥ श्रीगुरुभ्यो नमः ॥

॥ श्रीमद्भनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं

ब्रह्मसूत्रभाष्यम्

(श्रीजगन्नाथयतिविरचितभाष्यदीपिकायुतम्)

॥ अथ चतुर्थोऽध्यायः ॥

प्रथमः पादः

॥ १. आवृत्त्यधिकरणम् ॥

(श्रवणमननादीनाम् आवृत्तिः कर्तव्या)

(भाष्यम्)

फलं निगद्यतेऽस्मिन्नध्याये । कर्मनाशाख्यं फलमस्मिन् पादे । नित्यशः कार्यं सर्वथा भाव्यं साधनं प्रथमत उच्यते । प्रायिकत्वाच्चाध्यायानां पादानां च न विरोधः ।

(भाष्यदीपिका)

एतदध्यायप्रतिपाद्यं दर्शयति- **फलमिति** ॥ साध्यमित्यर्थः । ब्रह्मदर्शनेत्यादावुपस्कार्यम् । मोक्षरूपमिति शेषः । 'निगद्यते' कीदृशमिति विचार्यतेऽस्मिन् चतुर्थेऽध्याय इत्यर्थः । मोक्षस्य दर्शनसाध्यत्वं तु 'अनियमः, विद्यैव' (ब्र.सू.३.३.४८) इत्यादावेवोक्तमिति भावः । एतत्पादार्थं दर्शयति- **कर्मेति** । निगद्यत इत्यनुषज्यते । मोक्षलक्षणं हि ज्ञानफलं चतुर्विधं- कर्मक्षयोत्क्रान्तिमार्गभेदात् । तत्रास्मिन् पादे दर्शनपूर्वकालीनसञ्चितकर्मनाशाख्यं फलं निगद्यत इत्यर्थः । नन्वावृत्तिरित्यादिसूत्रे कर्मक्षयोक्त्यप्रतीतेः कथमेतत्पाद-

प्रतिपाद्यकथनमित्यत आह- **नित्यश इति**। सर्वदेवेत्यर्थः। परमादरेणेत्यप्यादा-वुपस्कार्यम्। किमर्थमेतदुच्यत इत्यत उक्तं - **सर्वथा भाव्यमिति**। सर्वप्रकार-विघ्नेऽपि यावच्छक्त्यनुष्ठेयमित्यर्थः। नित्यशः करणविशिष्टसाधनं विनाऽप-रोक्षज्ञानाभावात् तदभावे च चतुर्विधमोक्षेषु मध्ये एकस्यापि मोक्षस्याभावादस्य सर्वथा भाव्यत्वमिति भावः। तथाच यतः सर्वथा भाव्यमतो नित्यशः कार्यमिति योजना। **साधनमिति**। श्रवणाद्यावृत्त्यादिरूपज्ञानसाधनमित्यर्थः। 'प्रथमतः' सप्ताधिकरण्याम् 'उच्यते' कर्तव्यत्वेन प्रतिपाद्यते। सर्ववेदान्तनयेन गतार्थता-परिहाराय- नित्यशः सर्वथेति चोक्तम्। तथाच तत्रोक्तस्यैव साधनस्य सर्व-प्रकारविघ्नेऽपि सर्वदा परमादरेण यावच्छक्त्यनुष्ठेयत्वरूपेत्थंभावोऽत्रोच्यत इति न गतार्थतेति भावः। यदि फलाध्याये कर्मक्षयपादे च साधनमेवोच्यते तर्ह्यध्यायपादानामर्थव्यवस्थाऽभावः स्यादित्यत आह- **प्रायिकत्वाच्चेति**॥ प्रथमश्चोऽप्यर्थः। द्वितीयस्समुच्चये। तथाचाध्यायपादेष्वर्थान्तरोक्तावपि न व्यवस्थाऽभावलक्षणविरोधो भवति। कुतः ? समन्वयाध्यायानां नामादिपादानां च 'प्रायिकत्वात्' प्रायुर्येण स्वस्यैकार्थप्रतिपादकत्वादिति योजना। नचास्य पादस्य कर्मक्षये प्रायिकत्वानुपपत्तिः, अधिकरणसप्तके साधनविचारात् फलस्य चैकस्मिन्नेवाधिकरणे विचारादिति वा वाच्यम्। योऽर्थः प्रायेण कात्स्न्र्येन प्राधान्येन च यत्र प्रतिपाद्यते सोऽध्यायादिस्तदर्थक इत्यस्यार्थस्यात्र विवक्षित-त्वात्। तथाच कर्मक्षयवत् साधनस्य कात्स्न्र्येन प्राधान्येन एतत्पादविचार्यत्वा-भावान्नोक्तानुपपत्तिरिति भावः।

सू — ॐ॥ आवृत्तिरसकृदुपदेशात्॥ ॐ॥ १॥

'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' (बृ.४.४.५) इत्यादीनां नाग्निष्टोमादिवदेकवारेणैव फलप्राप्तिः, किन्त्वावृत्तिः कर्तव्या। 'स य एषोऽणिमैतदात्म्यमिदं सर्वम्' (छा. ६-८-७) इत्याद्यसकृदुपदेशात्॥ १॥

तत्र सङ्गत्यादिजिज्ञासाजननाय सूत्रमेवादौ पठति - **आवृत्तिरिति** ॥ सूत्रे आवृत्तिरिति प्रतिज्ञांशं कर्तव्येति पदाध्याहारेणावृत्तिपदसूचितपूर्वपक्षनिषेधपूर्वकं व्याचष्टे - **आत्मेति** ॥ इत्यादीनामिति । इति श्रुत्या आदीयन्ते उपादीयन्ते वाच्यतयेति इत्यादीनि तेषामित्यर्थः । श्रवणादीनामिति शेषः । यद्वा- इत्यादि-श्रुत्युक्तानां श्रवणादीनामित्यर्थः । अत्रादिशब्देनैतज्जातीयवाक्यान्तरं गृह्यते । प्राप्तिरिति प्रथमा पञ्चम्यर्थे । यत इति शेषो वा । नेत्यावर्तते, इतीति च । अग्निष्टोमादीत्यादिशब्देन दर्शपौर्णमासादिकं गृह्यते आवृत्तिरिति सावधारण-मेतत् । एकेन वाक्येनावगतस्य तत्वस्य पुनः पुनस्तेन वाक्येन अन्येन वा अवगतिः श्रवणावृत्तिः । युक्त्या मननावृत्तिरप्येवमेव । तथाच 'अग्निष्टोमादिवत् यथा सकृदनुष्ठिताग्निष्टोमादेः स्वर्गफलसिद्धिस्तथा श्रवणादीनामपि 'एकवारेण' सकृदनुष्ठानेनैव 'फलप्राप्तेः' फलसिद्धेः 'आत्मा' इत्यादिश्रुत्युक्तानां श्रवणादीनां नावृत्तिरतोऽनावृत्तिरिति पूर्वपक्षो न, किन्तु श्रवणादीनामावृत्तिरेव कर्तव्येति योजना । कुत इत्यतोऽसकृदुपदेशादिति हेत्वंशं व्याचष्टे- **स इति** ॥ इत्या-दीति । इत्यादिरूपो योऽयमसकृदुपदेशः अनेकवारमुक्तिस्तस्मादित्यर्थः । आदिशब्देन 'स आत्मा तत् त्वमसि' (छा.६-८-७)इति शिष्टवाक्यं गृह्यते । श्वेतकेतुं प्रति उद्दालकवाक्यमेतत् । प्रकृतः परदेवताख्यो विष्णुः सारत्वात् सः । नियमनात् ज्ञानरूपत्वाद् वा यः । सर्वस्येष्टत्वादविघ्नसर्वेच्छारूपत्वाद्वा एषः । सूक्ष्मज्ञानविषयत्वादतिसूक्ष्मपरिमाणत्वाद्वा अणिमा । 'इदं सर्वं' जगत् 'ऐतदात्म्यं' एतत् सत् आत्मा स्वामी यस्य तत् तथोक्तम् । यद्वा एष चासावात्मा चैतदात्मा विचित्रा हि तद्धितगतिरिति वचनात्, तस्येदमित्यर्थे ष्यञ्प्रत्ययः तद्वशमित्यर्थः । ततत्वात् तत् परमानन्दत्वतः साधुस्वरूपत्वाद्वा सत्यं साधनात् सः पूर्णगुणात्वादात्मा । तत् त्वम् अतत् त्वमिति च पदच्छेदः । तथाच त्वं 'तत्वं' तत्वतः 'अतदसि' तस्मादन्योऽसीति छन्दोगश्रुत्यर्थः । अनेनोद्दालकेन श्वेतकेतुं प्रति परतत्वस्य 'असकृत्' नवकृत्वः 'उपदेशादुपदिष्टत्वात् ज्ञानार्थं श्रवणादीनामावृत्तिः एव कर्तव्या । श्रवणादेः सकृदेव कर्तव्यत्वे किमर्थमसावसकृदुपदिशेदिति भाव इति सूत्रार्थ उक्तो भवति ।

सू— ॐ ॥ लिङ्गाच्च ॥ ॐ ॥ २ ॥

'स तपोऽतप्यत ..... पुनरेव वरुणं पितरमुपससार' (तै. ३-१-२) इत्याद्यावर्तनलिङ्गाच्च ।

'नित्यशः श्रवणं चैव मननं ध्यानमेव च ।
कर्तव्यमेव पुरुषैर्ब्रह्मदर्शनमिच्छुभिः ॥'
इति वृहत्तन्त्रे ॥ २ ॥

हेत्वन्तरेण श्रवणाद्यावृत्तिं साधयत् सूत्रं पठित्वा व्याचष्टे- लिङ्गाच्चेति ॥ आदिशब्देन 'अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति' (तै. ३-२) इत्यादिकं गृह्यते । 'स तपः' इत्यतः प्रागपि 'तस्मा एतत् प्रोवाच । अन्नं प्राणं चक्षुश्श्रोत्रं मनो वाचमिति । तꣳहोवाच । यतो वा इमानि भूतानि जायन्ते' (तै. ३-१) इत्यादिकमप्युदाहरणीयम् । इत्थं हि तैत्तिरीये आख्यायिका- वरुणपुत्रो भृगुः ब्रह्माध्यापयेति पितरमुपसादितवान् । अथ वरुणस्तस्मै भृगवे अन्नमयादिरूपाष्टकमुपदिदेश । तेषां जगज्जन्मादिकारणत्वादिलक्षणान्यप्युवाच । एवं श्रुतान्नादिरूपो भृगुः पुनः-पुनस्तद्विषय एवापृच्छत् । तथैव वरुणोऽप्युपदिदेश । एवमुपदिष्टः स भृगुः 'तपः' आलोचनं 'अतप्यत' अकरोत् । स तपस्तप्त्वा अन्नमयाख्यमनिरुद्धरूपं जगज्जन्मादिकर्तृत्वलक्षणवत्तया साक्षात्कृतवान् । स भृगुरेकरूपं साक्षात्कृत्य द्वितीयमपि साक्षात्कर्तुं गुर्वनुग्रहार्थं पुनरेव वरुणं पितरम् 'उपससार' उपसादितवान् । हे 'भगवो' भगवन् प्राणमयाख्यं ब्रह्म साक्षात्कर्तुमिति शेषः । 'अधीहि' अनुज्ञां देहि अनुजानीहीति वाच्ये विनयप्रदर्शनायैवमुक्तिः । एवं भृगुणोक्तो वरुण उवाच । किमिति ? 'तपसा' ज्ञानानुसन्धानरूपालोचनेन ब्रह्म विजिज्ञासस्व 'तपो ब्रह्म' ज्ञानरूपं ब्रह्मेति तपसो ब्रह्मज्ञानहेतुत्वात् तपो ब्रह्मेत्यभेदोपचार इति ग्रन्थान्तरे । इत्याद्यावर्तनलिङ्गादिति । एवमादिवाक्यबोध्यं यदनुज्ञा-

प्रार्थनाऽऽवर्तनादिरूपं श्रवणावर्तनलिङ्गं तस्मादित्यर्थः । चशब्दो न केवलं उपदेशाख्यगुरु-व्यापाराद्धेतोरावृत्तेः कर्तव्यतासिद्धिः, किन्तु श्रुतस्य पुनरालोचनेनापरोक्षितत्वरूपशिष्यव्यापाराख्यलिङ्गदर्शनादपीति हेतुसमुच्चये । लिङ्गाच्चेत्यस्यावृत्तिः कर्तव्येति पूर्वेणान्वयः । अस्य श्रवणादित्रितयावृत्तिसाधकत्वाद् योगविभागः । यद्यपि श्रौतलिङ्गदर्शनबलान्मननिदिध्यासनयोरेवावृत्तिः सिद्ध्यति, न श्रवणादीनां, त्रयाणाम् । तथापि श्रुतान्नमयादीनां जगज्जन्मादिकारणत्वेन यद् ब्रह्मत्वं प्रागुक्तम्, तस्य 'तपो ब्रह्म' इत्यनेन सर्वत्र तद्घटकसार्वज्ञोक्त्योपपादनस्य श्रवणाद्यावर्तने लिङ्गत्वं सम्भवत्येव । नचान्नमयरूपे तपश्शब्दोक्तसार्वज्ञेन ब्रह्मत्वानुपपादनात् कथमेतदष्टरूपाणां श्रवणाद्यावर्तनलिङ्गत्वमिति वाच्यम् । तत्रालिङ्गत्वेऽपि तदितररूपेषु लिङ्गत्वसम्भवेन ब्रह्मविषयकश्रवणाद्यावृत्तावस्य लिङ्गत्वाविरोधात् । नच भृगुकर्तृकश्रवणादेरेकरूपविषयत्वाभावात् कथमियमावृत्तिरिति वाच्यम् । एकैकरूपविषयेऽपि सामान्यविशेषाभ्यां द्विश्श्रवणादिप्राप्तेः ।

॥ इत्यावृत्त्यधिकरणम् ॥ १ ॥

॥ २. आत्माधिकरणम् ॥

(विष्णुः मम स्वामी इत्युपासना कर्तव्या)

सू–ॐ ॥ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ॐ ॥ ३ ॥

आत्मेत्युपदेश उपासनं च मोक्षार्थिभिः सर्वथा कार्यमेव । 'नान्यं विचिन्तय आत्मानमेवाहं विजानीयामात्मानमुपास आत्मा हि ममैष भवति'इति ह्युपगच्छन्ति । 'आत्मेत्येवोपास्व आत्मेत्येव विजानीहि नान्यं किञ्चन विजानथ आत्मा ह्येवैष भवति' इति ग्राहयन्ति च ।

अत्राधिकरणे आत्मत्वोपास्तेर्नित्यशः कार्यत्वं समर्थ्यते । आत्मत्वं न सर्वथा सदोपास्यमिति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति- **आत्मेति** ॥ अत्रात्मशब्दः

प्रकारार्थः, इतिशब्दश्चावर्तते । तत्राद्यो रूढ्या विष्णुपरः । द्वितीयः आदत्ते स्वीयतया भृत्यानिति स्वामिवाची । उपदेशः उपासनं च कार्यमिति शेषः इति भावेनात्मेति प्रतिज्ञांशम् 'आत्मेत्युपासनम्' इति स्मृत्यनुसारेण व्याचष्टे- **आत्मेति** ॥ सूत्र इवात्राप्यात्मेत्यावर्तते । तत्रैको रूढोऽन्यः स्वामि-वचनः । उपदेशश्चेति चशब्दान्वयः । न केवलं तथोपासनमावश्यकं किन्तु तथोपदेशश्च कार्य इति चशब्दार्थः । मोक्षार्थिभिरिति सौत्रतुशब्दस्यार्थान्तरोक्तिः। अनेनात्मत्वोपास्तेरवश्यकर्तव्यत्वे तस्या एव मोक्षसाधनत्वात् तां विना मोक्षासिद्धेरिति हेतुरुक्तो भवति- **सर्वथेति** ॥ सर्वप्रकारविघ्नेऽपि सदा कार्यमित्यर्थः । तुशब्दस्यार्थः- **एवेति**, नत्वकार्यमित्येवकारार्थः । कुतः सर्वथा कार्यत्वमित्यतो हेत्वन्तरप्रतिपादनाय प्रवृत्तम् आत्मेत्युपगच्छन्ति ग्राहयन्ति चेत्यंशं श्रुत्युदाहरणपूर्वकं व्याचष्टे- **नेति** ॥ इतीति । इति श्रुत्येत्यर्थः । 'हि' यतः । **उपगच्छन्तीति** । उपासते गुरूपदेशेन जानन्ति चेत्यर्थः । उक्तं हि सुधायाम् उपगच्छन्तीत्येतत् ज्ञानार्थं उपासनार्थं चेति । अत एव श्रुतौ विजानीयामुपास इत्युभयोक्तिः । सन्त इति सिद्धमिति च शेषः । तथाच 'हि' यतो 'न' इति श्रुत्या सन्त आत्मेत्युपगच्छन्तीति सिद्धम्, आत्मत्वस्योपास्यत्वं सिद्धमिति यावत् । अतो मोक्षार्थिभिरात्मा विष्णुरात्मा स्वामीत्युपासनं सर्वथा कार्यमेवेति योजना । श्रुत्यर्थस्तु- अहं परमात्मनोऽन्यं न विचिन्तये । परमात्मानमेवात्मेति विजानीयाम् । परमात्मानमेवात्मेत्युपासे । नचैतदविद्यमानोपासनमित्याह - **आत्मेति** ॥ 'एषः' विष्णुः 'मम' उपासकस्यात्मा स्वामीति हि यतः प्रसिद्ध इति । एवमरे शिष्य आत्मा स्वामीत्येवोपास्व, आत्मेत्येव विजानीहि, विष्णोरन्यं नात्मेति 'विजानथ' विजानीथाः । नचायं मिथ्योपासनोपदेशः, 'हि' यतः 'एषः' विष्णुः आत्मा स्वामी भवति खल्विति । अत्रापीत्यनन्तरं श्रुत्येति ग्राहयन्ति चेत्यनन्तरम् इति सिद्धमिति च शेषः । योजना तु पूर्ववदेव । ग्राहयन्तीत्यस्योपदिशन्तीत्यर्थः । सन्तः शिष्यानिति शेषः । चशब्द उपदिशन्तिग्राहयन्त्योः समुच्चये, तुशब्दसूचितहेतुसमुच्चये चेति ध्येयम् ।

'आत्मेत्युपासनं कार्यं सर्वथैव मुमुक्षुभिः ।
नानाक्लेशसमायुक्तोऽप्येतावन्नैव विस्मरेत् ॥'
इति भविष्यत्पर्वणि ।

यदात्मत्वोपासनस्य मोक्षसाधनत्वं तुशब्दार्थत्वेनोक्तं मोक्षार्थिभिरित्यनेन, तत् कुतो ज्ञायत इत्यत आह - **आत्मेति** ॥ 'आत्मा' स्वामीत्युपासनं 'सर्वथा' सर्वप्रकारेण यावच्छक्ति सदा कार्यमेव । 'एतावत्' आत्मत्वमात्रं वा न विस्मरेदित्यर्थः ।भविष्यत्पर्वणीत्यस्योक्तत्वादिति शेषेणात्मेति प्रतिज्ञावाक्येनान्वयः ।

'आत्मा विष्णुरिति ध्यानं विशेषणविशेष्यतः ।
सर्वेषां च मुमुक्षूणामुपदेशश्च तादृशः ॥
कर्तव्यो नास्य हानेन कस्यचिन्मोक्ष इष्यते ॥'
इति ब्राह्मे ॥ ३ ॥

केचित्तु- विष्णुरात्मतया जीवत्वेनोपास्यः । कुतः ? यतः 'अहं ब्रह्माऽस्मि' इत्युपगच्छन्ति 'तत् त्वमसि' इत्यादिना ग्राहयन्ति च शिष्यानित्यहंग्रहे प्रत्यगर्थस्य जीवात्मत्वग्रहणमेतदधिकरणप्रतिपाद्यतया वर्णयन्ति । तदयुक्तमिति भावेनाह- **आत्मेति** ॥ कर्तव्यमिति विपरिणामेनाकृष्यते । तथाच विष्णुः 'आत्मा' स्वामीति ध्यानं कर्तव्यम् । कथम् ? 'विशेषणविशेष्यतः' भावप्रधानः सावधारणश्च । मुमुक्षूणामिति तृतीयार्थे षष्ठी । तथाच सर्वैरपि मुमुक्षुभिर्विष्णुरात्मा स्वामीति विशेषणविशेष्यभावेनैव ध्यानं कर्तव्यम् । नतु विष्णोर्जीवात्मत्वविधानेन । न केवलं ध्यानं, किन्तु तादृशः आत्मा विष्णुरिति विशेषणविशेष्यभावोपेत उपदेशश्च कर्तव्यः । 'अस्य' आत्मत्वस्योपासनस्य 'हानेन' त्यागेनास्याकरणे कस्यापि मोक्षो नेतीष्यते प्रामाणिकैरिति स्मृत्यर्थः । ब्राह्म इत्यनन्तरं अर्थान्तरं दूषितमिति वाक्यशेषः ।

॥ इत्यात्माधिकरणम् ॥

॥ ३. नप्रतीकाधिकरणम् ॥

(नामादिप्रतिमायां ब्रह्मदृष्टिः न कर्तव्या, किन्तु तत्स्थत्वेनैव)

सू — ॐ ॥ न प्रतीके नहि सः ॥ ॐ ॥ ४ ॥

'नाम ब्रह्मेत्युपासीत' (छा. ७-१-५) इत्यादिना शब्द-भ्रान्त्या न प्रतीके ब्रह्मदृष्टिः कार्या। किन्तु तत्स्थत्वेनैवोपासनं कार्यम्।

अत्राधिकरणे ब्रह्मज्ञानार्थिनो विष्णुप्रतीकैक्योपासनवर्जनमावश्यकमिति प्रतिपाद्यते। 'नाम ब्रह्म' (छा.७.१.५) इति श्रुतेर्भगवत्प्रतिमारूपं नामवागादिकं ब्रह्मतयोपास्यमिति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति- नेति ॥ अत्र प्रतीक इति विषयसप्तमी। सुधोक्तरीत्या पूर्वसूत्रादात्मेतीति पदद्वयमुत्तरसूत्राद् दृष्टिपदं च, यद्वा- उत्तरसूत्राद् ब्रह्मदृष्टिपदमेवात्र सम्बध्यत इति भावेन न प्रतीक इति प्रतिज्ञांशं कर्तव्येति पदाध्याहारेण व्याचष्टे- **नाम ब्रह्मेत्युपासीत इत्यादिनेति** ॥ आदिशब्देन 'वाचं ब्रह्मेत्युपास्ते'(छा.७.२.१) इत्यादीनि गृह्यन्ते। जातयेति शेषः। कर्तव्यैत्यनन्तरमितीत्यनुवर्तते। तथाच इत्यादिना वाक्येनैकविभक्तिकत्व-रूपसामानाधिकरण्यबलेन जातया अस्मिन् वाक्ये ऐक्योपासनं विधीयत इति शब्दविषयभ्रान्त्या मूलभूतया 'प्रतीके' नामवाङ्मनःसङ्कल्पादि-शब्दितोपास्वाहापर्जन्यमित्रादिरूपप्रतिमाविषये 'ब्रह्मदृष्टिः' ब्रह्मत्वोपास्तिः कर्तव्येति यत् पूर्वपक्षिणोक्तं न तद् युक्तमिति योजना। आत्मेत्यनुक्त्वा ब्रह्मेत्युक्त्या प्रतीके आत्मेति दृष्टिर्जीवदृष्टिर्न कार्येति परव्याख्यानं निरस्तं भवति। 'सः' प्रसिद्धो 'यः' अधिकारी नामोपारूपप्रतीकं ब्रह्मेत्युपास्ते, 'अस्य' तस्याधिकारिणो नाम्नो 'यावद्गतं' व्याप्तिस्थानं तत्र 'कामचारो' यथेष्टसञ्चारो भवतीति पूर्वपक्षे श्रुत्यर्थः। सिद्धान्ते तु नाम्नि ब्रह्मास्तीत्युपास्त इत्यर्थः। ननु यद्यभेदोपासनं न युक्तं तर्हि कथमुपासनं कार्यम्। नच न कार्यमेवेति वाच्यम्। श्रुत्यप्रामाण्यप्रसङ्गादित्याशङ्कते- **किन्त्विति** ॥ परिहरति- तत्स्थत्वे-

नेति । अनेन सूत्रं प्रतीक इत्यावर्तते । अधिकरणत्वं च सप्तम्यर्थः । ब्रह्मदृष्टिरित्यत्रापि सम्बध्यते । आत्मेति दृष्टिरिति वा । किन्त्विति लभ्यते। तथाच किन्तु प्रतीकाधिकरणे ब्रह्मदृष्टिः कर्तव्येति प्रतिज्ञाशेषो दर्शितो भवति । कुतो नेत्यतस्तद्धेतुत्वेन 'हि' यतः 'सः' आत्मा विष्णुः प्रतीकं न भवतीति सूत्रखण्डो योजनीय इति सिद्धत्वादन्यत्र व्याकृतत्वाच्चात्र स न व्याकृतः ।

ब्रह्मतर्के च –

'नामादिप्राणपर्यन्तमुभयोः प्रथमात्वतः ।
ऐक्यदृष्टिरिति भ्रान्तिरबुधानां भविष्यति ॥
नामादिस्थितिरेवात्र ब्रह्मणो हि विधीयते ।
सर्वार्था प्रथमा यस्मात् सप्तम्यर्था ततो मता ॥' इति ॥ ४ ॥

तत्स्थत्वेनैवोपासनं कार्यम्, नत्वभेदेनेत्युक्तार्थे स्मृतिं चाह - **ब्रह्मतर्के चेति ॥** अयमर्थ उक्त इति शेषः । न केवलमस्माभिरिति चार्थः । **नामादीति ॥** नामशब्दादीत्यर्थः । आदिशब्देन वाङ्मनःसङ्कल्पचित्तध्यानविज्ञानबलान्नाप्तेज-आकाशस्मराशाशब्दा गृह्यन्ते । 'प्राणपर्यन्तं' प्राणशब्दपर्यन्तम् 'उभयोः' नामादिब्रह्मपदयोः । यद्यपि नामादिशब्दाः सर्वानुगतब्रह्मशब्दाश्च बहव इति द्विवचनानुपपत्तिः । तथापि प्रत्येकवाक्यविवक्षया राशिद्वयविवक्षया वा तदुपपत्तिः । **प्रथमात्वत इति** । प्रथमाविभक्त्यन्तत्वादित्यर्थः। केचित्तु- ननु छान्दोग्ये 'नामोपास्व,(छा.७.१.४) वाचमुपास्व' (छा.७-२-१) इत्यादि-विधिवाक्यं, 'स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य कामचारो भवति (छा.७.१.५) वाचं ब्रह्मेत्युपास्ते यावद् वाचो गतं तत्रास्य' (छा.७-२.२) इत्यादिफलवाक्यं च श्रूयते। तत्र चोभयोः द्वितीयान्तत्वमेव, न प्रथमान्तत्वं तत् कथमेतदिति चेत्- न, यतो 'नाम ब्रह्मेत्युपासीत' इति शाखान्तरीयपाठाभि-प्रायेणेदं वचनम् । छान्दोग्यानुसारेण तु 'प्रथमात्वतः' इत्येतद् द्वितीयात्वादित्य-स्योपलक्षकम् । द्वितीयात्वेऽपि देवदत्तं सिंहं विद्धीत्यादौ विधिबलेनैक्य-

प्रतीतेः । यथोक्तं तत्वप्रदीपे प्रथमात्वत इति सन्निकृष्टोपलक्षणं, प्रथमात्वात् द्वितीयात्वादित्यर्थः । शाखान्तरे प्रथमात्वादितीत्याहुः । तन्न, भाष्यपुस्तकेषु शाखान्तरपाठस्यादर्शनात्, तत्वप्रदीपरीत्या शाखान्तरपाठस्य स्मृत्यभिप्रेतत्वेऽपीह भाष्ये तदुपादाने नियामकाभावाच्च, फलवाक्यगतनपुंसकनामब्रह्मपदयोरिति-शब्दशिरस्कयोः प्रथमान्तत्वेन तयोर्विषयत्वे सति सम्भवति द्वितीयान्तत्व-माश्रित्याक्षेपस्य तदज्ञानमूलत्वाच्च । यथोक्तं छान्दोग्यव्यासतीर्थीये- 'नाम ब्रह्मोपास्व' इत्याद्युक्ताः द्वितीयाः 'स यो नाम ब्रह्मेत्युपास्ते:' (छा.७.१.५) इत्याद्युक्ताः प्रथमाश्च सप्तम्यर्थतया व्याख्याता इति । तस्मात् छान्दोग्यस्थ-फलवाक्यानुसारेणैवैतद्वचनम् । परन्तु प्रथमात्वत इत्येतदजहत्स्वार्थलक्षणया द्वितीयात्वत इत्यस्याप्युपलक्षकम् । तत्वप्रदीपोऽप्युभयोपलक्षकत्वाभिप्रायः । तथाचोपलक्षणापक्षे फलवाक्ये उभयोः प्रथमात्वेन द्वितीयात्वाभावेऽपि विधिवाक्ये ब्रह्मपदानुवर्तनेनोभयोर्द्वितीयात्वं सम्पाद्य द्वितीयात्वत इत्येतत्परतया योजनीयमिति सिद्ध्यति । अनेन 'वाचं ब्रह्म' इत्यादिवाक्यमपि गृहीतं भवति । शाखान्तरे प्रथमात्वादिति तत्वप्रदीपस्तु शाखान्तरीयविधिवाक्य इत्यर्थकः । 'मनो हि ब्रह्म मन उपास्व' (छा.७-३-३) इत्यत्रत्यश्रुतिवत् 'नाम हि ब्रह्म, वाग्वि ब्रह्म' इत्यपि शाखान्तरे पाठोऽस्तीति तदभिप्रायको वा भवतीति न तद्विरोधः । **अन्ये तु**- उपलक्षणां विना 'प्रथमयोः पूर्वसवर्णः' इत्यत्रेव 'प्रथमात्वतः' इत्यस्य प्रथमा च द्वितीया च प्रथमे तयोः भावः प्रथमात्वम्, तत इत्यर्थ इत्याहुः । **एके तु** - 'मनो हि ब्रह्म मन उपास्व' (छा.७.३.१) इति मनआख्यप्रतीकविषयवाक्ये मनो हि ब्रह्मेति मनोब्रह्मपदयोः प्रथमान्तत्वदर्शनात् तद्वाक्यबलेन 'नाम हि ब्रह्म, वाग्वि ब्रह्म' इत्यादिवाक्यानां सर्वत्रोहे क्रियमाणे नामादिपदानां ब्रह्मपदस्य च सर्वत्र प्रथमान्तत्वमस्तीति भावेन 'नामादिप्राणपर्यन्तमुभयोः प्रथमात्वतः' इत्युक्तम् । एवमेव शाखान्तरपाठोऽप्यस्तीति सम्प्रदायविद इत्याहुः । 'प्रथमात्वत' इत्यनन्तरं निमित्तादिति शेषः । उभयोरैक्यदृष्टिरिति। अभेदोपास्तिरित्यर्थः । अत्र कर्तव्यतयोच्यत इति शेषः । भ्रान्तिरित्यस्य भविष्यतीत्यनेनान्वयः ।

सामानाधिकरण्यबलेन तथा भ्रान्तिसम्भवादिति भावः। भ्रान्तौ मूलकारणमाह 'अबुधानाम्'– अज्ञानामिति। ननु कस्मादियं भ्रान्तिरबुधानां कल्प्यते, बुधानामेवं प्रमैव किं न स्यादित्यत आह - **नामादीति** ॥ नामादौ स्थितिरवस्थानम् 'अत्र' 'नामब्रह्म' इत्यादिवाक्येषु 'ब्रह्मणो' विष्णोः 'हि' यतः 'विधीयते' अभिधीयते।' नाम्' इति प्रथमाया 'वाचम्' इति 'प्राणम्' इति द्वितीयायाश्च तर्हि का गतिरित्यत आह– **सर्वार्थेति** ॥ प्रथमेति द्वितीयाया अप्युपलक्षकम्। तथाच यस्मात् प्रथमा 'सर्वार्था' सर्वविभक्त्यर्थका तथा द्वितीया प्रथमा-व्यतिरिक्तसर्वार्था 'ततः' तस्मात् 'सप्तम्यर्था' सप्तमीविभक्त्यर्था अधिकरण-त्वार्थका मतेति योजना। इति ब्रह्मतर्क इत्यन्वयः।

॥ इति नप्रतीकाधिकरणम् ॥

॥ ४. ब्रह्माधिकरणम् ॥

(ब्रह्म सर्वोत्कृष्टम् इति उपास्यम्)

सू — ॐ ॥ ब्रह्मदृष्टिरुत्कर्षात् ॥ ॐ॥ ५ ॥

ब्रह्मदृष्टिश्च सर्वथा कार्यैव परमेश्वरे। उत्कृष्टत्वात्।

अत्राधिकरणे ब्रह्मत्वोपास्तेरावश्यकत्वं समर्थ्यते। ब्रह्मत्वस्यैव सदा विशिष्यो-पासने कारणाभावान्न ब्रह्मत्वं सर्वथोपास्यमिति पूर्वपक्षे सिद्धान्तयत् सूत्रं पठति-**ब्रह्मेति** ॥ अत्रात्मेति सूत्रात् परमेश्वरवाची सप्तम्यन्ततया विपरिणतः आत्म-शब्दोऽनुवर्तते। एवं तुशब्दोऽपि सर्वथेत्यर्थकस्सन् गुणान्तरोपासनादस्य विशेष-द्योतकोऽवधारणार्थश्चार्थकश्च। कार्येति शेष इति भावेन ब्रह्मदृष्टिरिति प्रतिज्ञांशं व्याचष्टे- **ब्रह्मदृष्टिरिति** ॥ चः समुच्चये। एवकारो भिन्नक्रमः। तथाच न केवलमात्मदृष्टिः। किन्तु 'परमेश्वरे' भगवत्येव 'ब्रह्मदृष्टिः' सर्वोत्कृष्टत्वोपास्तिश्च कार्येत्यर्थः। सा च परोक्तरीत्या न प्रतीके कार्या 'नहि सः' इति पूर्वन्यायेन निरस्तत्वात् किन्तु भगवत्येवेति भावेनाह - **परमेश्वर इति** ॥ उभयोपास्तिप्रकारस्तु वक्ष्यते। कुत इत्यत उत्कर्षादिति हेतुं व्याचष्टे - **उत्कृष्टत्वादिति** ॥ परमेश्वरस्येति

विपरिणामेनानुषङ्गः । यद्वा- ब्रह्मत्वस्येति शेषः । अथवा ब्रह्मदृष्टेरिति विपरिणामेनान्वयः । ननु सूत्रे उत्कर्षादित्युक्तम्, भाष्ये चोत्कृष्टत्वादिति तदेवोक्तम् । तत् कथमनेन हेत्वर्थनिर्णयः कथञ्च हेतुसद्भाव इति चेदुच्यते, यथा आत्मदृष्टिस्तथा ब्रह्मदृष्टिः ब्रह्मत्वोपास्तिश्च परमेश्वर एव कार्येति प्रतिज्ञा । तत्र हेतुः - **उत्कर्षादिति** । तस्यार्थः परमेश्वरस्योत्कृष्टत्वादिति भगवतो ब्रह्मत्वोपास्त्या उत्कृष्टत्वसिद्धेः । ब्रह्मत्वोपास्तौ उपासकेन कृतायां भगवदुत्कृष्टत्वोपास्तिरेव कृता स्यादिति फलितार्थः । ननु ब्रह्मत्वोपासनेऽपि कथमुत्कृष्टत्वमनेनोपासितमिति चोद्येऽपि उत्कृष्टत्वादित्येतदेवोत्तरम् । सर्वोत्कृष्टत्वस्यैव ब्रह्मशब्दप्रवृत्तिनिमित्तत्वादित्यर्थः । तदपि कुतः ? 'उत्कृष्टत्वात्' ब्रह्मत्वे सर्वगुणान्तर्भावेन ब्रह्मपदप्रवृत्तिनिमित्तब्रह्मत्वस्यान्तर्भावितसर्वगुणत्वेनोत्कृष्टत्वरूपत्वादित्यर्थः । तथा च ब्रह्मत्वोपासनमुत्कृष्टत्वोपासनं भवत्येवेति भावः । ननु तथापि कुतो गुणान्तरपरित्यागेनास्योपासनमित्यतोऽप्याह- **उत्कृष्टत्वादिति** ॥ गुणान्तरोपासनेभ्योऽस्यैवोपासनस्योत्कृष्टत्वादतिशयेनोत्कृष्टप्रसादहेतुत्वादिति ॥

'ब्रह्मदृष्ट्या सदोपास्यो विष्णुः सर्वैरपि ध्रुवम् ।
महत्त्ववाची शब्दोऽयं महत्त्वज्ञानमेव हि ।
सर्वतः प्रीतिजनकमतस्तत् सर्वथा भवेत् ॥'

सूत्रार्थे स्मृतिं चाह - **ब्रह्मेति** ॥ 'धान्येन धनवान्' इतिवदत्राभेदे तृतीया । तथाच विष्णुः सर्वैर्ब्रह्मदृष्ट्या सर्वोत्कृष्टत्वोपासनेन 'उपास्यो' विषयीकर्तव्य इत्यर्थः । अनेन ब्रह्मदृष्टिरित्यंशो व्याख्यातः । अत्र हेतुमाह– **महत्त्वेति** ॥ 'अयं शब्दो' ब्रह्मशब्दः । यत इति शेषः । अनेन हेत्वंशो व्याकृतः। गुणान्तरपरित्यागेनास्यैव उपासने कारणमाह- **महत्त्वेति** ॥ ज्ञानमुपासनं 'हि' यतः । 'सर्वतो' लक्ष्म्यादिसर्वेभ्यो महत्त्वज्ञानमित्यन्वयः । यद्वा- सर्वतो गुणान्तरोपासनादाधिक्येनेति शेषः । भवेदित्यतः प्राक् कार्यमित्युपस्कार्यम् । तथाचेत्थं योजना- यतोऽयं शब्दो महत्त्ववाची 'हि' यस्मान्महत्त्वज्ञानमेव

सर्वतः प्रीतिजनकम्, अतस्तन्महत्त्वज्ञानं सर्वथैव कार्यं भवेत्, यत एवमतो विष्णुः सदोपास्य इति।

'आत्मेत्येव यदोपासा तदा ब्रह्मत्वसंयुता।
कार्यैव सर्वथा विष्णोर्ब्रह्मत्वं न परित्यजेत्॥'
इति च ब्रह्मतर्के॥ ५॥

आत्मत्वोपासनवत् ब्रह्मत्वोपासनं विनाऽपि मोक्षासम्भवाच्चैतत् कार्यमिति भावेन चशब्दज्ञापितार्थे प्रमाणमाह - **आत्मेति॥** यदा विष्णोरात्मेत्युपासा विष्णुधर्मिकात्मत्वप्रकारकोपासना मोक्षसिद्ध्यर्थमधिकारिणा कार्यैव, तां विना मोक्षाभावादिति भावः। तदा ब्रह्मत्वोपासनाभावेऽपि मोक्षाभावात् तदर्थं 'ब्रह्मत्वसंयुता' तत्प्रकारिकाऽप्युपासना 'सर्वथा' सर्वप्रकारविघ्नेऽपि कार्यैवेति योजना। अस्मिन् पक्षे न चतुर्गुणनियमः। एतदेव विवृणोति - **ब्रह्मत्वमिति॥** ब्रह्मत्वोपासनमित्यर्थः। अनेन ब्रह्मदृष्टिं विना मोक्षाभावेनोत्कृष्टसाधनत्वादात्मनि ब्रह्मदृष्टिः कार्येति सूत्रस्य वृत्त्यन्तरं दर्शितं भवति। ननु ब्रह्मत्वस्याप्यवश्योपास्यत्वे चतुर्गुणोपासनानियमभङ्गः स्यादित्यतो वाऽऽह - **आत्मेति॥** अस्मिन् पक्षे यदा आत्मेत्युपासा प्रवर्तते तदा 'ब्रह्मत्वसंयुता' सर्वोत्कृष्टस्वामी विष्णुरित्यात्मत्व-विशेषणत्वेन ब्रह्मत्वविषयिणी कार्येति योजना। ब्रह्मतर्के चेति। अयमर्थ उक्त इति शेषः। न केवलमस्माभिरिति चार्थः।

॥ इति ब्रह्माधिकरणम्॥ ४॥

॥ ५. आदित्याधिकरणम्॥

(परमात्मनोऽवयवे आदित्यादिजनकत्वोपासना देवैरेव कार्या)

सू— ॐ॥ आदित्यादिमतयश्चाङ्ग उपपत्तेः॥ ॐ॥ ६॥

'चक्षोः सूर्यो अजायत' (ऋ.१०.९०.१३) इत्याद्युपासनं

च देवानां कार्यमेव। स्वोत्पत्तिस्थानत्वात् स्वाश्रयत्वान्मुक्तौ तत्र लयस्यापेक्षितत्वाच्चोपपन्नं तेषां तथोपासनम्।

अत्राधिकरणे विष्ण्वङ्गाश्रितत्वेन देवतोपासनमावश्यकमिति साध्यते। आदित्यादिभिर्देवैः स्वस्वोत्पत्त्यङ्गाश्रितत्वेनोपासनं सदा सर्वथा न कार्यम्, तेषां सदा तत्र स्थित्यभावात्, गुणान्तरेषु सत्सु भगवदङ्गाश्रितत्वेन विशिष्य स्वचिन्तने कारणविशेषाभावाच्चेति पूर्वपक्षे सिद्धान्तयत् सूत्रं पठति- **आदित्यादीति**॥ अत्रादित्यादिमतय इति प्रतिज्ञांशं व्याचष्टे- **चक्षोरिति**॥ इत्यादीति। इत्यादिनेत्यर्थः। उक्तमिति शेषः। यद्यप्यत्रोपासनं नोक्तम्। तथाप्युक्तरुपासनार्थत्वादमृत इति फलोक्तेश्चार्थादुपासनमुक्तमिति भावः। उपासनमित्यतः प्राक् अङ्ग इत्युपस्कार्यम्। विषयसप्तमीयम्। तथा च स्वाश्रयत्वेन भगवदङ्गोपासनमित्यर्थः। अनेन मतिशब्दो ज्ञानविशेषरूपोपासनोपलक्षक इत्युक्तं भवति। न केवलं पूर्वोक्तमिति चार्थः। **देवानामिति**॥ देवैरित्यर्थः। कार्यमित्यनेन सूत्रे कार्या इति शेषो दर्शितः। चशब्दस्यार्थः- **एवेति**॥ को विशेषहेतुरित्यतः प्रवृत्तस्य उपपत्तेरित्यस्यार्थमाह- मुक्तौ तत्र 'लयस्य' प्रवेशस्य अपेक्षितत्वादिति। नन्वप्रयोजकोऽयं हेतुरिति चोद्योत्तरत्वेनापि- उपपत्तेरिति हेतुर्योज्यः। उपासनस्य फलसाम्येन कार्यत्वादिति तदर्थः। ननु मुक्तौ तत्र लयोऽसिद्ध इत्यतोऽपि- उपपत्तेरित्याह। तदर्थः- स्वोत्पत्तिस्थानत्वादिति स्वशब्द उपासकपरः। यतः यस्योत्पत्तिस्तत्र तस्य लयनियमान्नासिद्धिरिति भावः। ननु सूर्यादिदेवानां विविधस्थानेषु चरणेन सदा भगवच्चक्षुराद्याश्रितत्वाभावात् तदभावेऽपि तथोपासनेऽन्यथोपासनप्रसङ्गादेतदयुक्तमित्याशङ्कोत्तरत्वेनाप्युपपत्तेरित्येतद् व्याचष्टे- **स्वाश्रयत्वादिति**॥ अङ्गानामिति शेषः। तथाच नित्यं रूपान्तरापेक्षया अङ्गानां स्वाश्रयत्वान्नोक्तानुपपत्तिरिति भावः। चशब्दो हेतूनां समुच्चये। निगमयति- **उपपन्नमिति**॥ युक्तमित्यर्थः। 'तेषां' देवानां 'तथा' स्वाश्रयत्वेन भगवदङ्गोपासनमित्यर्थः। तथाचायं सूत्रार्थः- न केवलं ब्रह्मदृष्टिः, किन्तु 'अङ्गे' भगवदङ्गविशेषविषये आदित्यादिभिर्देवैः 'आदित्यादिमतयः' आदित्या-

द्याश्रयत्वेनेश्वराङ्गोपासना अपि कार्या एव । को विशेषहेतुः ? - उपपत्तेः । मुक्तौ तत्तदङ्गेषु प्रवेशस्यापेक्षितत्वादिति हेतोः । नचाप्रयोजकता । 'उपपत्तेः' उपासनस्य फलसाम्येन कार्यत्वात् । नच मुक्तौ तत्र प्रवेशस्यासिद्धिः । 'उपपत्तेः' स्वोत्पत्तिस्थानत्वात् । नचान्यथोपासनप्रसङ्गादेतदयुक्तम् । 'उपपत्तेः' नित्यं रूपान्तरेणाङ्गानां स्वाश्रयत्वादिति ।

नारायणतन्त्रे -

'आधिव्याधिनिमित्तेन विक्षिप्तमनसोऽपि तु ।
गुणानां स्मरणाशक्तौ विष्णोर्ब्रह्मत्वमेव तु ॥
स्मर्तव्यं सततं तत्तु न कदाचित् परित्यजेत् ।
अत्र सर्वगुणानां च यतोऽन्तर्भाव इष्यते ॥'

अतीताधिकरणसहितेतदधिकरणार्थं स्मृतिं चाह – **नारायणेति** ॥ अयमर्थ उक्त इति शेषः । आधिर्मानसी व्यथा । व्याधी रोगः । एतदुपलक्षितैर्विघ्न-हेतुभिरित्यर्थः । **विक्षिप्तमनस** इति । अन्यव्यासक्तमनस इत्यर्थः । पुंस इति शेषः । कर्तरि षष्ठीयम् । अशक्तावपीत्यन्वयः । तुशब्दो विशेषार्थः । अन्योऽव-धारणे । स्मरणं ध्यानम् । विष्णोर्गुणानां स्मरणाशक्तावित्यन्वयः । विष्णोरित्येतद् ब्रह्मत्वमित्यनेनापि सम्बध्यते । 'तत्' ब्रह्मत्वं तदुपासनमिति यावत् । 'चो' यतः 'अत्र' ब्रह्मत्वे सर्वगुणानां ज्ञानानन्दादिविष्णुधर्माणाम् 'अन्तर्भावः' तद्रूपत्वमिष्यते प्रामाणिकैस्तो ब्रह्मत्वं 'सततं स्मर्तव्यम्' उपासितव्यमित्यर्थः ।

'स्वोत्पत्त्यङ्गं च देवानां विष्णोश्चिन्त्यं सदैव तु ।
तेषां तत्र प्रवेशो हि मुक्तिरित्युच्यते बुधैः ।
तदाश्रिताश्च ते नित्यं ततश्चिन्त्यं विशेषतः ॥' इति ॥ ६ ॥

एवमतीताधिकरणार्थोपयुक्तांशमुदाहृत्य एतदधिकरणोपयुक्तं स्मृत्यंश-मुदाहरति- **स्वोत्पत्त्यङ्गं चेति** ॥ 'देवानां' देवैर्विष्णोः स्वोत्पत्त्यङ्गं च सदैव

चिन्त्यम् । स्वाश्रयत्वेनेति शेषः । न केवलं ब्रह्मत्वादीति चशब्दार्थः । अत्र हेतुमाह- **'तेषां' देवानामिति** ॥ 'तत्र' अङ्गेषु 'हि' यतः । नचान्यथोपासनमेतदित्याह- **तदाश्रिताश्चेति** ॥ 'ते' देवाः 'नित्यं' रूपान्तरेणाङ्गाश्रिता एवेत्यर्थः । 'ततः' तदाश्रितत्वात् 'विशेषतो' विशिष्य सर्वथा देवाश्रयाङ्गं देवैश्चिन्त्यमित्यर्थः । इति नारायणतन्त्र इत्यन्वयः ।

॥ इत्यादित्याधिकरणम् ॥ ५ ॥

॥ ६. आसीनाधिकरणम् ॥

(आसीनस्सन् उपासनां कुर्यात्)

सू — ॐ ॥ आसीनः सम्भवात् ॥ ॐ ॥ ७ ॥

सर्वदोपासनं कुर्वन्नप्यासीनो विशेषतः कुर्यात् । तदा विक्षेपाल्पत्वेन सम्भवात् ॥ ७ ॥

अत्राधिकरणे आसनादिनियमः साध्यते । प्रयोजनाभावान्नासनं सर्वथाऽपेक्षितमिति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति- **आसीन इति** ॥ अत्र पूर्वस्माच्चशब्दोऽनुवर्तते । स चाप्यर्थोऽवधारणे च । जिज्ञासुरुपासनं कुर्यादिति च शेष इति भावेन प्रतिज्ञांशं व्याचष्टे - **सर्वदोपासनं कुर्वन्निति** ॥ 'सर्वदा' स्थितिगत्यासनादिसर्वकालेषु 'उपासनं' सामान्यस्मरणादि कुर्वन्निति । जिज्ञासुरिति शेषः । अपिशब्दो हेतुवाक्ये सम्बध्यते । आसीन इति सावधारणम् । तेनानुवृत्तचशब्दो व्याख्यातः । 'विशेषतः' सर्वथा कुर्यादिति । अत्रापि उपासनमिति सम्बध्यते । अत्रोपासनं वस्तुतो ध्यानम् । तथाचेत्थं प्रतिज्ञावाक्ययोजना - उपासनं कुर्वन् जिज्ञासुः 'आसीनः' उपविशन्नेवोपासनं विशेषतः 'सर्वथा' सर्वप्रकारविघ्नेऽपि कुर्यादिति । आसीनस्योपासने सर्वदोपासनाऽभावः स्यादिति शङ्कावारणाय – **सर्वदोपासनं कुर्वन्नित्याह** । तथाचाधिकारी सर्वदोपासनं कुर्वन्नेव भवेत् । तच्च आसीन एव कुर्यादित्यर्थः । कुत इत्यतः सम्भवादिति हेतुं तदाशब्दाध्याहारेण व्याचष्टे- **तदेति** ॥

सावधारणमेतत्। तस्येति शेषः। तथाच यद्यपि उपासनस्यैव ज्ञानसाधनत्वम्। तथापि तस्य 'तदैव' आसने सत्येव 'सम्भवात्' योगात्, अन्यथाऽसम्भवादिति योजना। कुत इत्यतोऽनुवृत्तचशब्दसूचितं हेतुसाधकहेतुं दर्शयति – **विक्षेपेति** ॥ तस्येत्यत्रापि सम्बध्यते। तथाच तस्यासीनस्यैव विक्षेपस्य चित्तविक्षेपस्य अल्पत्वेन अबहुत्वेनेत्यर्थः। उक्तोपासनविरोधिबहुचित्त-विक्षेपाभावादन्यस्य च तन्नियमादिति फलितार्थः। तत्वप्रदीपे तु सर्वदोपासनं कुर्वन्नयं नाविशेषतः, किन्तु आसीनो विशेषतः कुर्यादित्युक्तम्।

सू — ॐ ॥ ध्यानाच्च ॥ ॐ ॥ ८ ॥

'स्मरणोपासनं चैव ध्यानात्मकमिति द्विधा।
स्मरणं सर्वदा योग्यं ध्यानोपासनमासने ॥'

ननु सर्वदोपासनं कुर्वन्नासीन एवेत्यनेन सर्वदोपासनं कार्यम्, आसनं चापेक्षितमित्युक्तम्। तत्र युज्यते। विरुद्धत्वेनोभयोरेकदा समावेशायोगात्। तत्रान्यतरस्मिन् त्याज्ये श्रुतिविहितत्वात् सर्वदोपासनमुपादायासनमेव त्यज्यते, तद्विधायकश्रुत्यभावादतो नासनमावश्यकमित्याशङ्कां परिहरत् सूत्रमुपन्यस्यति-**ध्यानाच्चेति** ॥ अत्र ध्यानादिति भावप्रधानो निर्देशः। उपासनविशेषस्येतिशेषः। चशब्दोऽनुक्तसमुच्चये, विरोधाभावसमुच्चये चेति भावेन सप्रमाणकं सूत्रं व्याचष्टे-**स्मरणेति** ॥ स्मरणं विच्छेदेन मनोवृत्तिः। यथोक्तं तत्वप्रदीपे- स्मरणं विच्छेदेन मनसो वृत्तिरिति। स्मरणेति भिन्नपदं लिङ्गव्यत्ययः छान्दसः। लुप्तविभक्तिको वा निर्देशः। उपासनमिति शेषो वा। चः समुच्चये। एवकारो न्यूनसङ्ख्याव्यव-च्छेदकः। तथाच उपासनं स्मरणोपासनं ध्यानात्मकं चेति द्विधैवेत्यर्थः। 'सर्वदा' स्थितिगत्यासनादिष्वपि। ध्यानोपासनमिति कर्मधारयः। 'आसने' उपवेशने सत्येव। योग्यमित्यनुषज्यते ॥

नैरन्तर्यं मनोवृत्तेर्ध्यानमित्युच्यते बुधैः।
आसीनस्य भवेत् तत्तु न शयानस्य निद्रया ॥

स्थितस्य गच्छतो वाऽपि विक्षेपस्यैव सम्भवात् ।
स्मरणात् परमं ज्ञेयं ध्यानं नास्त्यत्र संशयः ।
इति नारायणतन्त्रे । अतो ध्यानत्वाच्च ॥ ८ ॥

ध्यानस्वरूपप्रदर्शनपूर्वकं तस्यासनसापेक्षत्वमन्वयव्यतिरेकाभ्यामुपपादयति- **नैरन्तर्यमित्यादिना** ॥ नैरन्तर्यमविच्छेदः । 'तत्' ध्यानम् । तुशब्दोऽवधारणार्थः । आसीनस्यैवेत्यन्वेति । तद्व्यावर्त्यमाह- **नेति**॥ निद्रया शयानस्येत्यन्वयः । गच्छत इति षष्ठी । वाशब्दो विकल्पार्थः । [1]एवकारः सम्भवादेवेत्यन्वेति । तर्हि सुशकेन सार्वकालिकेन स्मरणेनैवालं, किं ध्यानेनेत्यत आह - **स्मरणादिति** ॥ 'परमं' अधिकम् 'अत्र' आधिक्यविषये । **नारायणतन्त्र इति** ॥ यतोऽभिहितमिति शेषः । **ध्यानत्वादिति** । तस्य उपासनस्येति शेषः । चशब्दः आसनस्यावश्यकत्वमविरोधश्चेति साध्यसमुच्चये । तथाचेत्थं योजना- यतः उपासनं स्मरणं ध्यानात्मकमिति द्विधा भवति । यतश्च स्मरणोपासनं सर्वदा योग्यम् । यतश्च सर्वदोपासनविधिः सर्वदोपासनं कुर्वन्नित्युक्तिश्च तद्विषयो भवतीति शेषः । यतो ध्यानं मनोवृत्तेर्नैरन्तर्यमुपासनविशेषः । तच्चासनाभावे चित्तविक्षेपप्राप्तेरासने सत्येव युज्यते । यतश्च स्मरणाद् ध्यानमधिकमिति नारायणतन्त्रेऽभिहितम् । अतस्तस्यासनसापेक्षतयोच्यमानस्योपासनस्य ध्यानत्वात् तद्रूपत्वान्नासननियमसदोपासनयोर्विरोधः । अत एव ध्यानस्यासनमन्तरेणासम्भवादासनस्यावश्यकत्वं च सिध्यतीति । अत्र सर्वत्र विषयानुक्तिः । प्रकृतिसिद्धत्वात् परमात्मा हि प्रकृतः ।

सू — ॐ ॥ अचलत्वं चापेक्ष्य ॥ ॐ ॥ ९ ॥

---

१. 'अपिः समुच्चये । कुतो नेत्यत आह- **विक्षेपस्येति** ॥ मनोविक्षेपस्येत्यर्थः' इत्यन्तं मुद्रितपुस्तके न विद्यते ।

'अचलं चेच्छरीरं स्यान्मनसश्चाप्यचालनम् ।
चलने तु शरीस्य चञ्चलं च मनो भवेत् ॥'

इति ब्रह्माण्डे ॥ ९ ॥

ननु ध्यानार्थमपि नासनमावश्यकम्। नचैवं चित्तविक्षेपापरिहारः। इन्द्रियाणां विषयेभ्य उपसंहाररूपप्रत्याहारादिना चित्तविक्षेपपरिहारादित्याशङ्कां परिहरत् सूत्रं पठति- **अचलत्वं चेति** ॥ अत्र मनसो देहस्य भवतीति पदत्रयमध्याहार्यम्। सूत्रपदानामावृत्तिश्च। आसीन इत्यनुवर्तते। उपासनं विशेषतः कुर्यादिति च प्रकरणाल्लभ्यते। अचलत्वमिति प्रथमान्तं द्वितीयान्तं च। साधनसमुच्चये चशब्दः। यद्वा- तत्वप्रदीपरीत्याऽनिद्रत्वं चकारार्थः। तथाच यतो मनसः 'अचलत्वं' विक्षेपाभावो न केवलं प्रत्याहारादिना भवति, किन्तु देहस्याचलत्वं चापेक्ष्य भवति। देहस्याचलत्वं चासनमपेक्ष्य भवति। अत आसीन एवोपासनं कुर्यादिति सूत्रवृत्तिमभिप्रेत्य सूत्रार्थे स्मृतिमुदाहरति- **अचलमिति** ॥ 'चेत्' यदि अचालनमचलनं स्यादित्युभयत्र सम्बध्यते। चोऽन्वयव्यतिरेकसमुच्चये। अपिः धर्मिसमुच्चये। तुः विशेषे। हिः प्रसिद्धौ। ब्रह्माण्ड इत्यनन्तरं सूत्रार्थोऽभिहित इति शेषः।

सू — ॐ ॥ स्मरन्ति च ॥ ॐ ॥१० ॥

'समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥'

(भ.गी. ६.१३) इत्यादि ॥

स्मृतिभिरपि आसनस्यावश्यकत्वं समर्थयत् सूत्रमुपन्यस्य ताः स्मृतीरुदाहरति- **स्मरन्ति चेति** ॥ कृष्णादयोऽपि स्वयमेतमर्थं बुद्ध्वा तद्विषये 'समं कायम्' इत्यादिग्रन्थं कुर्वन्तीति सूत्रार्थः। यथोक्तं भागवततात्पर्ये - 'स्मरणं' ग्रन्थकृतिः 'स्मरन्ति च' इत्यादेरिति। 'समम्' इति गीतास्मृतेरयमर्थः- आसने उपविश्य

'कायशिरोग्रीवं' कायश्च शिरश्च ग्रीवा चेति द्वन्द्वस्तत एकवद्भावः। तत् समं यथा भवति तथा धारयन् अत एवाचलं धारयन् 'स्थिरः' स्थिरमनाः अचञ्चलमना भूत्वा स्वकीयनासिकाग्रमेव सम्प्रेक्ष्य 'दिशो' दिगवस्थितविषयान् 'अनवलोकयन्' अपश्यन् 'अथात्मविशुद्धये' आत्मनः स्वस्य पापनिवृत्त्यर्थमानन्दवृद्ध्यर्थं वा समाधियोगं 'युञ्ज्यात्' कुर्यादिति। इत्यादीति। आदिशब्देन स्मृत्यन्तराणि गृह्यन्ते। अत एव सूत्रे बहुवचनम्। इत्यादि स्मरन्तीत्यन्वयः। 'सम्प्रेक्ष्य नासिकाग्रं स्वम्' इत्यनेन दृष्टेरचलत्वं चापेक्ष्य आसीनो भवेदिति पूर्वसूत्रस्य, यतस्तथा स्मरन्तीत्युत्तरसूत्रस्य चार्थान्तरमुक्तं भवति। यद्यप्यस्यां स्मृतावासनस्यावश्यकत्वं नोक्तम्। तथाऽप्यस्याः 'उपविश्यासने युञ्ज्यात्' (भ.गी.....) इत्यनेन सम्बन्धाद् विवक्षितार्थसिद्धिः। नच 'उपविश्यासने' इत्यस्यैव विषयत्वात् कथं प्रमाणत्वेनोपन्यास इति वाच्यम्। तत्रोक्तायास्समतया धारणार्थत्वादिति युक्तेरेवात्र प्रमाणत्वेनोपन्यासात्।

सू — ॐ ॥ यत्रैकाग्रता तत्राविशेषात् ॥ ॐ ॥ ११ ॥

देशकालावस्थादिषु यत्रैकाग्रता भवति तत्रैव स्थातव्यम्।

नन्वासनादिनियतिवत् देशकालादिनियतिरप्यङ्गीकार्या।

'पर्वताग्रे नदीतीरे ....' इति स्मृतेः।

'ब्राह्मे मुहूर्ते उत्थाय वार्युपस्पृश्य माधवः।
दध्यौ प्रसन्नकरण आत्मानं तमसः परम्॥' (१०.७८.४)

इति भागवतवचनात्।

'ब्राह्मे मुहूर्ते चोत्थाय धर्मार्थानुपचिन्तयेत्।'

इति मनुस्मृतेश्चेत्याशङ्कां निवारयत् सूत्रं पठति - **यत्रेति**॥ अत्र ध्यानादित्यस्य षष्ठ्यन्ततया विपरिणामेन अनुवृत्तिं भवतीति शेषं चाभिप्रेत्य यत्रेति प्रतिज्ञांशं व्याचष्टे - **देशेति**॥ यत्र तत्रेत्यनुवादः. देशकालावस्थादिष्विति व्याख्यानम्। अवस्था आसनम्। आदिशब्देन भोगो गृह्यते। 'एकाग्रता' एकविषयता।

ध्यानस्येति शेषः। स्थातव्यमित्येतत् तस्मिन्नेव देशे स्थातव्यं तस्मिन्नेव काले ध्यातव्यं तदेवासनं ग्राह्यं तदेव भोग्यं भोक्तव्यमिति सर्वेषां स्मृत्युक्तानामुपलक्षकम्। अनेन सूत्रे तत्रेति सावधानं ध्यानं कार्यमिति शेष इत्युक्तं भवति।

'तमेव देशं सेवेत तं कालं तामवस्थितिम्।
तानेव भोगान् भुञ्जीत मनो यत्र प्रसीदति॥
नहि देशादिभिः कश्चिद् विशेषः समुदीरितः।
मनःप्रसादनार्थं हि देशकालादिचिन्तना॥'
इति वाराहे॥ ११॥

अविशेषादिति हेत्वंशस्य स्मृत्यैव व्याख्यानात् तमव्याख्याय समग्रसूत्रार्थे स्मृतिमाह - **तमेवेति॥** अत्र देशकालादीनां किमासनादिवत् ध्यानोपयोगितयाऽऽवश्यकत्वम्, उत पृथगेव ज्ञानोपयोगित्वादिति विकल्प्याद्यस्य दूषणमाह- **तमेवेति॥** अवस्थितिरासनम्। अत्र हेतुमाह - **नहीति॥** यतः 'देशादिभिः' नियतदेशकालादिना 'कश्चिद् विशेषः' अतिशयो नास्ति ध्याने इति शेषः। अतस्तदेव देशादिकं सेवेत नतु नियतमित्यर्थः। द्वितीयस्य दूषणमाह- **नहीति॥** अस्मिन् पक्षे ज्ञाने इति शेषः। तथाच ज्ञाने देशादिभिः केवलैर्न कश्चिद् विशेष इत्यर्थः। तत्र हेतुः- मनःप्रसादनार्थमिति। प्रसादनं तृप्तिरचाञ्चल्यं वा। तदर्थं तत्सम्पादनार्थमित्यर्थः। 'हि' यतः 'चिन्तना' मार्गणं यद्वा- 'चिन्तना' विचारः योगशास्त्र इति शेषः। उक्तं हि तत्वप्रदीपे- 'या तु योगशास्त्रे हरिक्षेत्रदिनादिदेशकालविशेषादिचिन्ता क्रियते सा हरेर्विशेषाभिव्यक्तिहेतुत्वेन तेषां मनःप्रसादकरत्वेनैव, नान्यविशेषहेतोः' इति। अतोऽन्यथासिद्धत्वात् न देशादेः ज्ञानोपयोगित्वमिति भावः। नच देशकालादिवदासनस्याप्यनियतत्वे 'आसीनः' इति तन्नियमोक्तिविरोध इति वाच्यम्। वीरासनमेव पद्मासनमेव ध्यानोपयोगीति विशेषनियमस्यैवात्र निषेधात्। उपवेशनार्थमासनसामान्यनियमस्यानिषेधात्। तस्यैव पूर्वमभिहितत्वात्। नच 'पर्वताग्रे' इत्याद्युक्तिविरोधः।

प्रायेण मनःप्रसादनार्थत्वेन तदुक्तिसम्भवात् । वाराहे इत्यनन्तरमुक्तत्वादिति शेषः । अस्य पूर्वेणान्वयः ।

॥ इत्यासीनाधिकरणम् ॥ ६ ॥

॥ ७. आप्रायणाधिकरणम् ॥

(आमोक्षम् उपासना अस्ति)

सू – ॐ ॥ आ प्रायणात् तत्रापि हि दृष्टम् ॥ ॐ ॥ १२ ॥

यावन्मोक्षस्तावदुपासनादि कार्यम् ।

अत्राधिकरणे ध्यानस्य प्रायणान्तत्वं समर्थ्यते । साधनस्य कार्यपर्यन्तमेवानुष्ठेयत्वात् ज्ञानपर्यन्तमेव ध्यानमावश्यकं, नतु मुक्तिपर्यन्तमपीति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति- **आ प्रायणादिति** ॥ अत्राङ् मर्यादायाम् । टीकारीत्या प्रायणं चरमशरीरोत्क्रमणं, तत्वप्रदीपरीत्या तु प्रायणं प्रकर्षेणायनं नारायणं प्रति गमनं मोक्षस्तत्पर्यन्तमित्यर्थ इत्याशयेनाप्रायणादित्यंशं व्याचष्टे– **यावन्मोक्ष इति** ॥ उपासनादि कार्यमिति शेषोक्तिः । कार्यमिति सावधारणं, मुमुक्षूणामिति शेषः । उपासनं ध्यानम् । आदिपदेन श्रवणादिर्गृह्यते । तत्वप्रदीपरीत्याऽर्चनादिकं वा । तत्रायं विवेकः– ज्ञानात् पूर्वं तावच्छ्रवणादियुतध्यानं कर्तव्यम्, आनन्दातिशयार्थं ज्ञानानन्तरमपि प्रायेण केवलं ध्यानं कर्तव्यम् । नच श्रवणादिनाऽपि तत्सिद्धिः । ध्यानस्य प्रधानसाधनत्वेन तदयोगात् । सम्यक् ध्यानाभावे[1] श्रवणादीति ।

'स यो ह वै तद् भगवन् मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत' (प्र.५-१) इति हि श्रुतिः ।

ननु ध्यानस्य ज्ञानफलकत्वेन तत्पर्यन्तमनुष्ठानेऽपि तदनन्तरमपि मुक्तिपर्यन्तं तदनुवर्तनीयमिति कुतो ज्ञायत इत्यतो ज्ञानात् पूर्वं ध्यानस्य कर्तव्यत्वे विवादाभावात्

---

१. ध्यानालाभे' इति पाठान्तरम् ।

तत् सिद्धवत्कृत्य तदुत्तरं तस्य कार्यत्वे श्रुतिप्रमाणसूचकतया दृष्टं हीत्येतद् व्याचष्टे - **स इति** ॥ 'हि' यतः । इति षट्प्रश्नश्रुतिरस्तीत्यर्थः । अस्य यावन्मोक्ष इत्यनेनान्वयः । हे 'भगवन्' पूज्य 'एतत्' एतेषु ज्ञानिमनुष्येषु स यः कश्चित् 'प्रायणान्तं' प्रायणपर्यन्तं यावच्छरीरादुत्क्रमणं तावदिति यावत् । 'ओंकारं' ओमित्याक्रियमाणं तद्वाच्यं परमात्मानं 'अभिध्यायीत' प्रणवेन सर्वदा हरिं चिन्तयेदिति यावत् । 'सः' पुरुषस्तेन ध्यानेन कतमं लोकं प्राप्नोतीति श्रुत्यर्थः । पिप्पलादं प्रति शैब्यवाक्यमेतत् ।

'सर्वदैनमुपासीत यावद् विमुक्तिर्मुक्ता अपि ह्येनमुपासते' इति सौपर्णश्रुतिः ।

कैमुत्येनापि ध्यानस्य मुक्तिपर्यन्तत्वं साधयितुं सूत्रखण्डः- **तत्रापीति** ॥ तत्रापिः कैमुत्ये । तथाच मुक्तावपि ध्यानं कुर्वन्ति सन्तः, किमु ततः पूर्वमिति तस्यासिद्धिपरिहारार्थमपि दृष्टं हीत्यंशो योज्य इत्याशयेन तत्सूचितश्रुतिं दर्शयति- **सर्वदेति** ॥ ज्ञानात् पूर्वं तदुत्तरं चेत्यर्थः । अस्योत्तरावधिमाह- **यावद् विमुक्तिरिति** ॥ एवं कैमुत्योपयुक्तसाध्यमभिधाय तद्धेतुं कैमुत्यमाह- **मुक्ता अपीति** ॥ अपिशब्दः कैमुत्ये । हिशब्दो यत इत्यर्थे । श्रुतिश्चेत्यन्वयः । चः श्रुति-द्वयसमुच्चये । यत इति शेषः । अस्यातो यावन्मोक्ष इति साध्यवाक्येनान्वयः ।

'शृणुयाद् यावदज्ञानं मतिर्यावदयुक्तता ।
ध्यानं च यावदीक्षा स्यान्नेक्षा क्वचन बाध्यते ॥
दृष्टतत्त्वस्य च ध्यानं यदा दृष्टिर्न विद्यते ।
भक्तिश्चानन्तकालीना परमे ब्रह्मणि स्फुटा ॥
आ विमुक्तेर्विधिर्नित्यं स्वत एव ततः परम् ॥'

इति ब्रह्माण्डे ॥ १२ ॥

ज्ञानपर्यन्तं श्रवणादियुतं ध्यानं कार्यमित्यत्र स्मृतिं चाह - **शृणुयादिति ॥** अज्ञानशब्देन तन्निवृत्तिर्लक्ष्यते । तावदिति शेषः । एवमुत्तरत्रापि । मतिर्मननम् । 'अयुक्तता' विपर्ययः । युक्तायुक्तत्वसंशयो वा । एतदपि निवृत्त्युपलक्षकम् । कार्येति कार्यमिति च क्रमेण शेषः । तत्वस्येति सर्वत्रान्वीयते । श्रवणादेरिव ज्ञानस्याप्यावृत्तावेव मोक्षो नत्वावृत्त्यभाव इति न वाच्यमिति भावेनाह- **नेक्षेति ॥** 'ईक्षा' ब्रह्मदृष्टिः 'कचन' कादाचित्काऽपि 'न बाध्यते' न मोक्षासाधिका भवति तत्साधिकैव भवतीत्यर्थः । ज्ञानोत्तरं श्रवणादिरहितं केवलध्यानं प्रायेण कर्तव्यमेवेत्यत्रापि प्रमाणत्वेन स्मृतिशेषमुदाहरति- **दृष्टतत्वस्येति ॥** प्रायेण केवलमित्यध्याहार्यम् । दृष्टं साक्षात्कृतं तत्वं ब्रह्माख्यं येन स तथोक्तः तस्येत्यर्थः । न केवलं जिज्ञासोरिति चशब्दार्थः । ध्यानमित्येतदनन्तरमपि अनन्तकालीनेति पदं विपरिणामेन सम्बध्यते । तथाच 'दृष्टतत्वस्य' पुंसः 'परमे ब्रह्मणि' विषये प्रायेण केवलं ध्यानमनन्तकालीनं कर्तव्यमेव । न केवलं ध्यानमनन्तकालीनं, किन्तु 'स्फुटा' निरुपाधिका भक्तिश्चानन्तकालीना अपेक्षिता । तत्र हेतुः- 'यदा' यस्मात् दृष्टिः फलत्वेन न विद्यतेऽसिद्धत्वादिति । फलत्वे ह्यनन्तकालीनत्वं न स्यादिति भावः । अथवा - अपरोक्षज्ञानकाले वासनामयध्यानायोगादाह- **यदेति ॥** 'यदा' यस्मिन् काले 'दृष्टिः' ब्रह्मदर्शनमित्यर्थः । यद्वा- 'यदा' यस्य 'दृष्टिर्न विद्यते' तद्विच्छेदो भवति । तदा तस्यापाकरणार्थं पुनःपुनः दृष्ट्यर्थं दृष्टतत्वस्यापि मध्येमध्ये ध्यानमपेक्षितमित्यर्थः । उक्तं हि तत्वप्रदीपे- 'दर्शनवतोऽपि यदा तद्विच्छेदस्तदा तस्यापाकरणार्थं तस्य परमस्य ध्यातुर्विरिञ्चलोकं नीतस्य ततोऽप्युपदेशं प्राप्य पुनरभ्यस्यतः परं पश्यतोऽपीत्यामोक्षादुपास्तिकर्तव्यतायां प्रमाणदर्शनात्' इति । ननु ज्ञानोत्तरमपि निरवधिकध्यानं किं विहितत्वात् क्रियते अन्यथा वा ? नाद्यः निरवधिकध्यानस्य विहितत्वेन कार्यत्वे मोक्षेऽपि तथाकार्यत्वापत्त्या मुक्तस्य विधिबन्धवर्जितत्वरूपमोक्षविरोधात् । न द्वितीयः- मोक्षात् पूर्वं करणानुपपत्तेरित्यत आह- **आविमुक्तेरिति ॥** मोक्षपर्यन्तमित्यर्थः । नित्यं विधिरित्यन्वयः । विधिविहितत्वेन

करणम्। भक्तिध्यानयोरिति शेषः। 'ततः परं' मुक्तेरनन्तरं 'स्वत एव' स्वभावेनैव करणमिति शेषः। ब्रह्माण्डे विवक्षितार्थ उक्त इति शेषः। न केवलं श्रुतिद्वये इति चार्थः।

॥ इत्याप्रायणाधिकरणम् ॥ ७ ॥

॥ ८. तदधिगमाधिकरणम् ॥

(परमात्माऽपरोक्षे जाते पूर्वतनयोः अनारब्धयोः अनभीष्टयोश्च पुण्यपापयोः नाशः, उत्तरयोः अनारब्धयोः अनभीष्टयोः पुण्यपापयोरसम्बन्धः भवति)

सू— ॐ ॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ ॐ ॥ १३ ॥

ब्रह्मदर्शन उत्तराघस्याश्लेषः पूर्वस्य विनाशश्च। 'यद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते' (छा.४.१४.३) 'तद् यथेषीकातूलमग्नौ प्रोतं प्रदूयते एवं हैवास्य सर्वे पाप्मानः प्रदूयन्ते' (छा.५-२४.३) इति तद्व्यपदेशात् ॥ १३ ॥

अत्राधिकरणे प्रासङ्गिकं समाप्य कर्मक्षयाख्यफलसिद्धिः साध्यते। प्रागापादितकर्मणां भावात् न ज्ञानेन मोक्षः सम्भवतीति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति - **तदिति** ॥ अत्र सम्भवत्येव ज्ञानेन मोक्ष इति साध्याध्याहारं, तद्धेतुत्वेन 'तदधिगम उत्तरपूर्वाघयोः' इत्यस्यान्वयं, तत्साधकतया 'तद्व्यपदेशात्' इत्यस्य प्रवृत्तिं चाभिप्रेत्य सूत्रं व्याचष्टे- **ब्रह्मदर्शन इति** ॥ निमित्तसप्तम्येषा। ब्रह्मदर्शनादित्यर्थः। अनेन सूत्रे तच्छब्दो ब्रह्मदृष्टिरिति प्रकृतब्रह्मपरामर्शी। अधिगमो ज्ञानम्, निमित्तार्थे सप्तमीत्युक्तं भवति। 'उत्तरावस्य' ज्ञानोत्तरकालीनपापस्याश्लेषः फलतः। पूर्वस्येत्यनन्तरमवस्येति बुद्ध्या विवेकेनानुषज्यते। अप्रारब्धस्येति शेषः। 'विनाशः' स्वरूपतः। चः समुच्चये। भवति

यत इति शेषः। अस्याध्याहृतसाध्येनान्वयः। उत्तराघस्याश्लेषो नाम नानन्द-हासकरत्वाभावः, किन्तु पारलौकिकज्ञानोत्तरपापफलनरकादिश्लेषाभाव-रूपोऽलेपः, तथा ऐहिकज्ञानोत्तरपापफलाशुचित्वासम्भाष्यत्वादिसंश्लेषा-भावश्चेति द्रष्टव्यः। यथोक्तम्-

'ज्ञानोत्तरस्य पापस्य चतुर्थेऽलेप उच्यते।
अशुचित्वादिकं चास्य न भवेदिति तत् फलम्॥' (ब्र.सू.अनु.३.४.श्लो.८)

इत्यनुव्याख्यानसुधयोः। कुत एतदुभयं ज्ञानाद् भवतीति, तथा सति 'नाभुक्तम्' इति स्मृतिविरोधापातात्। नच तस्या अज्ञानिकर्मविषयत्वं, बाधकाभावादित्यत-स्तद्व्यपदेशादित्यंशं तस्मिन् तस्य तयोरित्यावृत्त्यभिप्रायेण व्याचष्टे - **तद्यथेति॥** इतीति। एवंरूपे छन्दोगश्रुतिद्वये इत्यर्थः। **तद्व्यपदेशादिति**। तस्य ज्ञानिनस्तयोरश्लेषविनाशयोरुक्तत्वादित्यर्थः। तथाच श्रुतिरेव बाधिकेति भावः। श्रुत्यर्थस्तु - 'तत्' तत्रार्थे वक्ष्यमाणदृष्टान्तो 'यथा पुष्करपलाशे' पद्मपत्रे 'एवं तथा 'एवंविदि' उक्तप्रकारेण ब्रह्मज्ञानिनि पापं कर्म 'न श्लिष्यते' तत्फलं नरकादिकं न प्राप्नोतीत्यर्थः। इषीका तृणविशेषः, सा च तूलमंशुश्चेति द्वन्द्वैकवद्भावे चेषीकातूलमिति भवति। 'इष्टकेषीक' इति ह्रस्वाभावश्छान्दसः। 'प्रोतं' प्रविष्टं 'प्रदूयते' प्रदह्यते एवमेव 'अस्य' ज्ञानिनः 'सर्वे' ज्ञानोत्तरकृताः 'पाप्मानः' पापानि 'प्रदूयन्ते' स्वरूपतो नश्यन्तीति।

सू— ॐ॥ इतरस्याप्येवमसंश्लेषः पाते तु॥ ॐ॥ १४॥

पुण्यस्याप्येवमसंश्लेषः पाते। तुशब्दोऽनुत्थानवाची।

एवं ब्रह्मज्ञानिनो मुक्तिसिद्ध्यर्थं ज्ञानादेवाघविनाशाश्लेषावुक्त्वा तत्समान-न्यायत्वाद् भगवद्द्वेषिपुण्यस्यापि मिथ्याज्ञानादेव विनाशाश्लेषौ तमस्सिद्ध्यर्थं वदत्सूत्रमुपन्यस्यति- **इतरस्यापीति॥** अत्रेतरस्येत्यंशब्दस्तन्त्रावृत्त्या प्रकृत-ज्ञानीतरब्रह्मद्वेषिपरः अघेतरपुण्यपरश्च। अपिः समुच्चये। एवंशब्दस्तथार्थे। समित्युक्तिः ज्ञान्यघस्य मुक्तावानन्दहासकरत्वमिव न द्वेषिपुण्यस्य तमसि सुख-

लेशरूपकार्यकरत्वमिति द्योतनाय। अत एव अश्लेष इति प्रकृतेऽपि पुनरारम्भः। पात इति सामीप्ये तादर्थ्ये वा सप्तमीत्यभिप्रेत्य सूत्रं व्याचष्टे- **पुण्यस्यापीति ॥** भगवद्द्वेषीत्यादावुपस्कार्यम्। ज्ञानिद्वेषिणोः पुण्यपापयोश्च समुच्चयेऽपिशब्दः। एवमित्यतः प्राक् यथा ज्ञानिपापस्येति लभ्यते। एवंशब्दस्तथार्थः। तथाच 'पाते' प्रत्यासन्ने तमःपतनहेतुभूतमिथ्याज्ञाने पूर्णे सति तमःप्राप्त्यर्थमिति शेषः। यद्वा पातार्थं यथा ज्ञानिपापस्य संश्लेषः 'एवं' तथा द्वेषिपुण्यस्याप्यसंश्लेषः। उपलक्षणमेतत्। विनाशश्चावश्यक इति योजना। पात इत्यनेन विनाशाश्लेषानङ्गीकारे पातो न स्यादिति हेतुः सूचितः। तेन सूत्रे न हेत्वनुक्तिदोषः। ननु पाते प्राप्तेऽपि तदनुभवानन्तरं पुण्यभोगसम्भवात् किं तदश्लेषादिनेत्याशङ्क्य तदुत्तरत्वेन तुशब्दं व्याचष्टे- **तुशब्द इति ॥** अनुत्थानं तमोऽनुत्थानम्। अनेन- यथा ज्ञानिनः 'एवं पाते तु' अनुत्थानतमःपातप्रत्यासन्ने पातार्थम् 'इतरस्य' ब्रह्मद्वेषिणोऽपि 'इतरस्य' पुण्यस्यापि असंश्लेषो विनाशश्चावश्यकः, अन्यथा पातो न स्यादिति सूत्रार्थ उक्तो भवति।

'यथाऽश्लेषो विनाशश्च मुक्तस्य तु विकर्मणः।
एवं सुकर्मणश्चापि पततस्तमसि ध्रुवम् ॥'

इति चाग्नेये ॥ १४ ॥

सूत्रार्थे- स्मृतिं चाह - **यथेति ॥** 'मुक्तस्य' जीवन्मुक्तस्य प्रत्यासन्नमुक्तस्येति वा। तुशब्दः सौत्रसंशब्दार्थको विशेषार्थः। स च प्रागेवोक्तः। 'विकर्मणो' ज्ञानोत्तरकृतस्य तत्पूर्वस्याप्रारब्धस्य च पापकर्मणः तज्जन्याधर्मस्येति यावत्। अश्लेषो विनाशश्च यथा आवश्यकः 'एवं' तथा 'ध्रुवं' निश्चितं 'तमसि पततः' प्रत्यासन्नपतनवतोऽपि 'सुकर्मणः' पुण्यकर्मणस्तज्जन्यधर्मस्य अश्लेषो विनाशश्चावश्यक इति योजना। ध्रुवमित्यनेन सौत्रतुशब्दार्थ उक्तः। द्वेषिपुण्यस्यासम्श्लेषो नाम इह लोके शुचित्वादिसम्पादकत्वाभावः। परत्र च स्वर्गादिसम्पादकत्वाभावरूपोऽलेपः। इति चाग्नेय इति। सूत्रार्थो दर्शित इति शेषः। न केवलमस्माभिरिति चार्थः।

सू– ॐ ॥ अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ ॐ ॥१५॥

अनारब्धकार्ये एव पूर्वे पुण्यपापे विनश्यतः ।

ननु ब्रह्मज्ञानिद्वेषिणोः ज्ञानादिनैव पापपुण्यक्षये ज्ञानाद्युदय एव सद्यो मोक्षादिप्रसङ्ग इत्याशङ्कां परिहरत् सूत्रं पठति - **अनारब्धकार्ये इति** ॥ अत्र न ज्ञानानन्तरमेव मुक्त्यादिप्रसङ्गदोष इति साध्याध्याहारं, तत्रानारब्धकार्ये एव पूर्वे इत्यस्य यतश्शब्दशिरस्कस्य हेतुत्वं चाभिप्रेत्य सूत्रं व्याचष्टे - **अनारब्धेति** ॥ यस्य पापस्य कार्यं दुःखं यस्य पुण्यस्य कार्यं सुखं च भोक्तुमारब्धं तदारब्धमित्युच्यते । न आरब्धमनारब्धं, अनारब्धे कार्ये ययोस्ते तथोक्ते । **पूर्वे इति** ॥ ज्ञानमिथ्याज्ञानपूर्वकालीने इत्यर्थः । अस्य विशेष्यमाह- **पुण्येति** ॥ पुण्यपापे एवेत्यन्वयः । ननु सर्वपुण्यपापे इत्येवशब्दार्थः । विनश्यतः इति सूत्रे शेषोक्तिः ।

'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्यते'
(छा. ६-१४-२) इति तदवधेः ।

ननु ज्ञानानन्तरं प्रारब्धप्रतिबन्धकसद्भावः कुतः कल्प्यत इत्यतस्तदुत्तरत्वेन तदवधेरित्यंशं श्रुत्युपलक्षकतया व्याचष्टे - **तस्येति** ॥ इतीत्यनन्तरं श्रवणादिति शेषः । तदवधेरिति भावप्रधानः । तदिति भिन्नं पदं समस्तं च श्रुतिस्थपरामर्शकोऽयम् । तथाच तस्य मोक्षस्य तदवधित्वस्य प्रारब्धकर्मनिवृत्त्यवधिकत्वस्य 'तस्य' इत्यादौ श्रवणादित्यर्थः । तथाच [१]'तावदेव' तावानेव 'चिरं' मोक्षविलम्बः । कियत्कालं ? यावत् ज्ञानी प्रारब्धेन कर्मणा 'न विमोक्ष्ये' न विमोक्ष्यते । अथ कर्मनिवृत्त्यनन्तरं ब्रह्म 'सम्पत्स्यते' मुक्तो भवतीति छन्दोगश्रुत्यर्थः । अत्र विमोक्ष्ये इति प्रथमपुरुषः, मुचेः कर्मणि लृट्प्रत्यये विमोक्ष्यते इति रूपं, तस्य व्यत्ययेन विमोक्ष्येतेत्यर्थः । तत्र 'लोपस्त आत्मनेपदेषु' इति

---

१. ज्ञानोत्तरमपि कर्मसद्भावो ज्ञायते इति वाक्यशेषः । तस्यापरोक्षज्ञानिनः ।

तलोपः । सम्पत्स्यत इति प्रथमपुरुषे तु तकारः सन्नेव । तत्वप्रदीपे तु न विमोक्ष्ये इत्यत्र पुरुषव्यत्यय एव, न लार्थव्यत्यय इत्युक्तम् ।

तुशब्दः स्मृतिद्योतकः ।

'यदानारब्धपापं स्यात् तद् विनश्यति निश्चयात् ।
पश्यतो ब्रह्म निर्द्वन्द्वं हीनं च ब्रह्म पश्यतः ।
द्विषतो वा भवेत् पुण्यनाशो नास्त्यत्र संशयः ॥'

नन्वस्यां श्रुतौ प्रारब्धकर्मसद्भावो न स्फुटं प्रतीयत इत्यतः प्रयुक्तस्य तुशब्दस्य तदवधेरित्यनेनान्वयं चार्थत्वं चाभिप्रेत्य तद् व्याचष्टे - **तुशब्द इति ॥ स्मृतिद्योतक इति** । विशेषबोधकस्मृतिसमुच्चायक इत्यर्थः । तां स्मृतिं पठति - **यदिति ॥** यथा 'निर्द्वन्द्वं' समाधिकशून्यं ब्रह्म 'पश्यतो' दृष्टवतो 'यदनारब्धपापं' प्रारब्धकार्यभिन्नं पापं स्यात् तन्निश्चयात् 'विनश्यति' विनश्यत्येव । एवं ब्रह्म 'हीनं' गुणाकृतिहीनत्वेन हीनजीवैक्येन च 'पश्यतो' जानतो ब्रह्म 'द्विषतो वा' द्विषतश्च 'पुण्यनाशो' मिथ्याज्ञानपूर्वकालीनधर्मनाशो भवेदिति योजना । केचित्तु- तमोयोग्यानामपि ब्रह्मसाक्षात्कारोऽस्त्येव, किन्तु धर्मिणि प्रत्यक्षे सति तत्र हीनत्वं दोषांश्च पश्यन्ति रामकृष्णादौ छेदादीनि च । तथाच पश्यत इत्यस्य यथाश्रुत एवार्थ इत्याहुः ।

'तस्याप्यारब्धकार्यस्य न विनाशोऽस्ति कुत्रचित् ।
आरब्धयोश्च नाशः स्यादल्पयोः पुण्यपापयोः ॥'
इति नारायणतन्त्रे ॥ १५ ॥

उक्तस्यापवादमाह- **तस्यापीति ॥** द्वेषिपुण्यस्यापीत्यर्थः । न केवलं ज्ञानि-पापस्येत्यपेरर्थः । ज्ञानिद्वेषिसम्बन्धिनोऽपि पुण्यस्य पापस्येति वा 'विनाशः' स्वरूपतः' कुत्रचित्' काले देशे च । अत एव परमद्वेषिणोऽपि प्रागधःपातात् कदाचिद् भोगान् भुञ्जते इति भावः । अपवादस्यापवादमाह- **आरब्धयोरिति॥**

आरब्धकार्ययोरल्पयोः पुण्यपापयोः 'नाशः' फलह्रासरूपोपमर्दः स्यादित्यर्थः। भोगकालस्याल्पत्वादल्पयोरित्युक्तिः॥

सू — ॐ॥ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्॥ ॐ॥ १६॥

अग्निहोत्राद्यपि तु मोक्षानुभवायैव। तुशब्दाद् ब्रह्मदर्शनवतः।

ननु ज्ञानिकृतपुण्यस्य पूर्वोत्तरस्य विनाशाश्लेषौ विद्येते न वा? आद्ये पूर्वसूत्रे अघशब्दवैयर्थ्यम्। द्वितीये मोक्षासिद्धिः, पुण्यस्यापि बन्धकत्वादित्याशङ्कां परिहरत् सूत्रमुपन्यस्यति- **अग्नीति**॥ अत्र किमकाम्यपुण्यविषयोऽयं विकल्पः? उत काम्यपुण्यविषयः? आद्ये तस्य नाशाश्लेषौ न स्त इति समाधानं, नचैवं बन्धानिवृत्तिरिति साध्योपस्कारं चाभिप्रेत्य तत्र हेतुतया- अग्निहोत्रादि तु तत्कार्यायैवेत्यंशं व्याचष्टे- **अग्निहोत्राद्यपीति**॥ ज्ञानपूर्वोत्तरकालीनाकाम्याग्निहोत्रादीत्यर्थः। आदिशब्देन सन्ध्योपासनश्राद्धादिरूपं नित्यनैमित्तिकपुण्यं गृह्यते। तुशब्दव्याख्यारूपादपिशब्दात् टीकारीत्या ध्यानादि समुच्चीयते। यद्वा- तत्वप्रदीपरीत्या द्वेषिपापं गृह्यते। उक्तं हि तत्वप्रदीपे- अपिशब्दादितरस्य द्वेषिण इतरदपि इतरविशेषायैवेति गम्यत इति। **मोक्षानुभवायैवेति**॥ मोक्षफले विवक्षिते तद्धेतुब्रह्मापरोक्षानुभवायेत्यर्थः। यद्वा- मोक्षे आनन्दातिशयानुभवायेत्यर्थः। यतो भवतीति शेषः। नतु बन्धाय भवति, न वा कार्यमजनयित्वा नाशाश्लेषौ प्राप्नोतीत्येवकारार्थः। तत्वप्रदीपरीत्या तु मोक्षे आनन्दानुभवायेत्येक एवार्थः। उपलक्षणमेतत्। मिथ्याज्ञानपूर्वकालीनं तदुत्तरकालीनं च पापमन्यथाज्ञानकार्याय भवतीत्यपि द्रष्टव्यम्। तथैव तत्वप्रदीपोक्तेः। अनेन टीकारीत्या तत्कार्यायेत्येतत् तच्च तत् कार्यं चेति कर्मधारयमाश्रित्य प्रकृतब्रह्मज्ञानाख्यकार्यायेति, तस्य कार्यमिति तत्पुरुषमाश्रित्य तस्य ज्ञानस्य कार्ये मोक्षेऽनुभवायेति द्वेधा, तत्वप्रदीपरीत्या त्वेकधा व्याख्यातं भवति। पूर्वं ज्ञानिद्वेषिणोरनुवृत्तत्वादत्राप्युभयसम्बन्धिपुण्यविषयमिदं वचनमिति

शङ्कानिवर्तकतयाऽपि तुशब्दं व्याचष्टे- तुशब्दादिति ॥ टीकारीत्या 'ब्रह्मदर्शनवतः' तद्योग्यस्येत्यर्थः । इति तमन्यस्माद् विशिनष्टीति शेषः । तथाच ब्रह्मदर्शनवतः 'अग्निहोत्रादि' तत्कृतमेवाग्निहोत्रादीत्यन्वयमभिप्रेत्य सूत्रकारः तुशब्देन द्वेषिणः सकाशात् ज्ञानिनं ब्रह्मदर्शित्वरूपव्यावर्तकधर्मेण विशिनष्टीत्यर्थः ।

'स एनमविदितो न भुनक्ति यथा वेदो वाऽननूक्तोऽन्यद् वा कर्माकृतं यदि हवा अप्यनेवंविन्महत् पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयतेऽस्माद्ध्येवात्मनो यद्यत् कामयते तत्तत् सृजते' (बृ.३-४-१५) इति तद्दर्शनात् ॥ १६ ॥

ननु ब्रह्मदर्शिकृतस्यैव पूर्वोत्तरपुण्यस्य ज्ञानमोक्षानुप्रवेशेनाबन्धकत्वं कुत इत्याशङ्कापरिहारकतया तद्दर्शनादित्येतद् व्याचष्टे - स इति ॥ इति तद्दर्शनादिति । एवंरूपायां बृहदारण्यकश्रुतावुक्तार्थस्य 'दर्शनात्' उक्तत्वादित्यर्थः। अनेन तस्यां श्रुतौ विवक्षितार्थस्य दर्शनादिति सौत्रहेत्वर्थ उक्तो भवति । श्रुतिस्तु भाक्तनये व्याख्याता ।

सू— ॐ ॥ अतोऽन्यदपीत्येकेषामुभयोः ॥ ॐ ॥ १७ ॥

मुक्तावनुभवकारणाद् यदन्यत् तत् पुण्यमपि विनश्यति । अप्रारब्धमनभीष्टं च । तथाह्येकेषां पाठ उभयोस्त्यागेन । 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्' (शाट्यायन) इति ।

काम्यपुण्यविषय इति द्वितीयपक्षोत्तरं सूत्रमुपन्यस्यति- अत इति ॥ अत्रातश्शब्दपरामृश्यं दर्शयन् सूत्रं व्याचष्टे - मुक्तावनुभवकारणादिति॥ मुक्तौ

साध्यायां तत्कारणीभूतो योऽपरोक्षानुभवः तत्कारणादित्यर्थः । यद्वा - मुक्तावतिशयानुभवकारणादित्यर्थः । अकाम्यादित्यनुक्त्वा एवमुक्तिः उक्तविधयाऽर्थद्वयलाभाय । यदिति श्रवणात् तदिति शेषः । तथाच अतो मुक्तावनुभवकारणात् ज्ञानपूर्वोत्तरकालीनाकाम्यादन्यद्यत् काम्यं पुण्यं तदपि नश्यति । न केवलं पापमित्यपेरर्थः । उपलक्षणमेतत् । न श्लिष्यते च । तत्र पूर्वं नश्यति उत्तरं न श्लिष्यत इति सूत्रांशो व्याख्यातो भवति । अतोऽन्यदपि काम्यमतः प्रारब्धादिष्टाच्चान्यदेव नश्यति, नतु सर्वमित्यपि वृत्तिमुपेत्य तल्लब्धं विशेषमाह- **अप्रारब्धमिति** ॥ अस्य पूर्वेणान्वयः । चः समुच्चये । अत्रायं विवेकः - ज्ञानात् पूर्वतनं काम्यं कर्म द्विविधं प्रारब्धमप्रारब्धं च । तत्र प्रारब्धं न नश्यति । अप्रारब्धं द्विविधमिष्टमनिष्टं च । तत्रेष्टमपि न नश्यति अनिष्टमेव नश्यति यद्यपि पुण्यकरणकाले सर्वमिष्टमेव । तथापि ज्ञानकाले तदेव किञ्चिदिष्टं किञ्चिदनिष्टं भवति । यथा वक्तृत्वाद्यापादकमिष्टं ज्ञानानन्तरमपि तदिच्छायाः सत्त्वात् । राजत्वाद्यापादकमनिष्टं तस्य ज्ञानभक्त्यादिप्रतिबन्धकत्वेन ज्ञानिनः तदिच्छाया अभावात्, मा भूदिति विपरीतेच्छाभावाच्च । सप्तजन्मसु विप्रत्वापादकं चानिष्टम् । एवं मोक्षातिशयसाधनश्रवणादिसाधनादिप्रापकं पुण्यमिष्टं स्वर्गादिसाधनमनिष्टमिति आनन्दमालोक्तमपि द्रष्टव्यम् । एवमुत्तरकालीनमपि काम्यं [1]करणानन्तरं इच्छाभावाभावाभ्यामिष्टमनिष्टं चेति द्विविधम् । तत्रेष्टस्य संश्लेषः अनिष्टस्य चाश्लेष इति । कुत एतदित्यत एकेषामुभयोरित्यंशं व्याचष्टे - **तथाहीति** ॥ तथाहीत्युक्त्या इतिशब्दः प्रकारार्थो हेत्वर्थश्चेत्युक्तं भवति । 'एकेषां' सामशाखिनां पाठ इति शेषोक्तिः । 'उभयोः' पापकाम्यपुण्ययोः । तथेत्यस्य विवरणम्- **त्यागेनेति** ॥ त्यागज्ञापकतयेत्यर्थः । सुहृदां पुण्यप्राप्त्युक्त्या ज्ञानिनस्तत्त्यागोऽवगम्यत इति भावः । इतिशब्दपरामृष्टां श्रुतिं दर्शयति- **तस्येति** ॥ 'तस्य' ज्ञानिनः । यथेति शेषः 'दायं' पित्रार्जितं द्रव्यम् 'उपयन्ति' प्राप्नुवन्ति । तथा विष्णुभक्ताः 'सुहृदः' प्रत्युपकारमनपेक्ष्योपकर्तारः 'साधुकृत्यां'

---

१. कारणानन्तरम् इति पाठान्तरम् ।

अप्रारब्धमनभीष्टं काम्यं पुण्यमेव उपयन्ति, नतु अकाम्यं प्रारब्धमिष्टं च । अकाम्यस्य ज्ञाने सुखातिशये च विनियुक्तत्वात् प्रारब्धस्य भोक्तव्यत्वात् इष्टनाशस्यापुरुषार्थत्वात् । 'पापकृत्यां' पापकर्मजनिताधर्मं उपयन्तीत्यर्थः । इत्येकेषां पाठोऽस्तीत्यन्वयः । अनेन- 'उभयोः' पापकाम्यपुण्ययोः 'त्यागेन' त्यागज्ञापकतया 'इति सुहृदः' इत्येवंरूपः एकेषां पाठोऽस्तीति हेतोः अतः 'अन्यत्' काम्यपुण्यमपि नश्यति न श्लिष्यते चेति सूत्रार्थ उक्तो भवति ।

'अनभीष्टमनारब्धं पुण्यमप्यस्य नश्यति ।
किमु पापं परब्रह्मज्ञानिनो नात्र संशयः ॥' इति पाद्मे ॥ १७ ॥

ननु तथापि काम्येऽभिहितोऽवान्तरविशेषः श्रुतौ स्पष्टं न प्रतीयत इत्यतोऽपिशब्दसूचितां स्मृतिं दर्शयति **अनभीष्टमिति** ॥ परब्रह्मज्ञानिनोऽनभीष्टमनारब्धं पुण्यमपि नश्यति । नात्र संशयः । एवं सति अस्य पापं नश्यतीति किमु वक्तव्यमित्यर्थः । पाद्म इति । अप्रारब्धमनभीष्टं च नश्यतीत्ययं विशेषः स्पष्टमुक्त इति वाक्यशेषः ।

सू— ॐ ॥ यदेव विद्ययेति हि ॥ ॐ ॥ १८ ॥

ब्रह्मदर्शिकृतमल्पमपि पुण्यं महत्तममनन्तं च भवति । 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छा.१-१-१०) इति श्रुतेः । न हास्य कर्म क्षीयते' (बृ.३-४-१५) इति च ।

अल्पमात्रःकृतो धर्मो भवेत् ज्ञानवतो महान् ।
महानपि कृतो धर्मो ह्यज्ञानां निष्फलो भवेत् ॥
इति च भारते ॥ १८ ॥

ननु ज्ञानिकृतोत्तरकालीनाकाम्यपुण्यस्य कथं मोक्षानुप्रवेशः कर्मणो

नश्वराल्पफलकत्वादित्याशङ्कां परिहरत् सूत्रं पठति - **यदेवेति ॥** अत्र अग्निहोत्रादि तत्कार्यायेति पदद्वयानुवृत्त्या लब्धं साध्यं दर्शयति - **ब्रह्मदर्शीति ॥** अपिश्चार्थ एवार्थश्च ब्रह्मदर्शिकृतमित्यनन्तरं स्वस्थाने च सम्बध्यते। तथाच ब्रह्मज्ञानिकृत-मेवाग्निहोत्रादिपुण्यं स्वरूपतोऽल्पमपि 'महत्तमम्' अतिशयितमहाफलप्रदम् 'अनन्तं' अविनाशिफलप्रदं च भवतीत्यर्थः। अतो युक्तस्तस्य मोक्षानुप्रवेश इति भावः। कुत एतदित्यतस्तत्र हेतुतया सूत्रगृहीतश्रुत्युदाहरणपूर्वकं सूत्रं व्याचष्टे- **यदेवेति ॥** 'इति श्रुतेः' इति छन्दोगश्रुतेरित्यनेन सौत्रहिशब्दो यत इत्यर्थे। इतिशब्दः श्रुतिपदार्थक इत्युक्तं भवति। श्रुतिस्तु पुरुषार्थनये व्याख्याता। सूत्रे एकश्रुत्युदाहरणमुपलक्षणम्, इतिशब्दो वा आद्यर्थ इति भावेनात्रार्थे श्रुत्यन्तरं स्मृतिं च क्रमेण दर्शयति- **न हास्येति ॥** इति च श्रुतेरित्यन्वयः। चः समुच्चये। इयं बृहदारण्यश्रुतिः भाक्तनये व्याख्याता। स्मृतौ ज्ञानवत इति तृतीयार्थे षष्ठी। एवमज्ञानामिति च। एतयोः कृतपदेनान्वयः। **'अल्पमात्रः'** स्वरूपतोऽत्यल्पः **'अल्पमात्रकृत'** इति समस्तपाठे अल्पमात्रश्चासौ कृतश्चेति विग्रहः। तदा नित्यसापेक्षत्वात् समासः। 'महान्' महाफलप्रदः 'महान्' स्वरूपतः। यद्यपि तथाऽपीत्यर्थेऽपिः उभयत्रान्वेतव्यः। इति चेति। चः समुच्चये। भारते वचनाच्चेति शेषः। हेतुत्रयस्यापि ब्रह्मदर्शीत्यनेनान्वयः। अनेन यतः ज्ञानिकृताग्निहोत्रादि स्वरूपतोऽल्पमपि 'तत्कार्याय' तच्च तत् कार्यं च तत्कार्यं तस्मै महानन्तफलायैव भवति, नत्वज्ञकर्मवदल्पास्थिरफलाय। कुतः ? 'हि' यतः 'यदेव विद्यया' इति 'न हास्य' इति श्रुतिद्वयम् 'अल्प' इति स्मृतिश्चेत्येवमाह, अतो युक्तस्तस्य मोक्षानुप्रवेश इति सूत्रार्थ उक्तो भवति। इदं त्ववधेयम्- द्वेषिणः पूर्वपुण्यस्या-प्रारब्धस्य विनाशः उत्तरस्याश्लेष इत्ययमर्थस्तावदितरस्येत्यनेनैवोक्तः। अग्निहोत्रादीत्यनेन ज्ञानिकृताकाम्यपुण्यस्य पूर्वस्य ज्ञानार्थत्वमुत्तरस्य ज्ञानकार्य-मोक्षातिशयार्थत्वमिति यो न्यायोऽभिहितः सोऽपि द्वेषिणि तद्विपरीत्येनानु-सर्तव्यः। द्वेषपरिपाकप्राक्कालीनस्याप्रारब्धस्य पापस्य द्वेषाभिवृद्धिहेतुत्वमुत्तरस्य तु साक्षात्तमोऽनुप्रवेशः। एवमतोऽन्यदपीत्यनेन ज्ञानपूर्वकालीनकाम्यपुण्यस्या-

प्रारब्धस्यानिष्टस्य च नाशस्तदुत्तरकालीनस्य तादृशस्यासंश्लेष इति यो न्यायोऽभिहितः स द्वेषिण्यपि वैपरीत्येनानुसर्तव्यः। द्वेषपरिपाकात् पूर्वतनं काम्यमप्रारब्धं पुण्यमनिष्टं चेन्न नश्यति। यथा दुर्योधनादीनां राजत्वापादकं कुरुवंशादौ जननकारणं पुण्यम्। तस्य कृष्णभीमादिमहाद्रोहद्वारा पूर्णतमोहेतुत्वात्। इष्टं चेन्नश्यति। द्वेषपूर्वोत्तरकालीनं च काम्यपुण्यमप्रारब्धमनिष्टं चेत् श्लिष्यते। इष्टं चेन्न श्लिष्यते। उत्तरस्याकाम्यस्य तु मनुष्याधमकृतस्य तमसि दुःखातिशयह्रासहेतुत्वं, कल्यादिकृतस्य तु तेषां दुःखस्य क्षुद्रत्वात् स्वयोग्याधिकपापविनाशहेतुत्वम्। एवं 'यदेव विद्यया' इत्यनेन ज्ञानिकृतोत्तरपुण्यस्य महानन्तफलत्वमिति यो न्यायोऽभिहितः सः द्वेषिपापेऽप्यनुसर्तव्यः। प्रमाणबलाद् द्वेषिपापस्यापि तमोऽनुप्रवेशोऽवश्यमङ्गीकार्य इति सूत्रत्रयन्यायो द्वेषिपुण्ये पापे चानुसर्तव्य इति।

सू — ॐ ॥ भोगेन त्वितरे क्षपयित्वाऽथ सम्पत्स्यते ॥ ॐ ॥ १९ ॥

आरब्धपुण्यपापे भोगेन क्षपयित्वा ब्रह्म सम्पत्स्यते।
अथेति नियमसूचकः।

ननु तथापि ब्रह्मज्ञानिद्वेषिणोः मुक्तितमसी न सिध्यतः उभयोरपि प्रत्येकं प्रारब्धपुण्यपापसद्भावादित्याशङ्कां परिहरत् सूत्रमुपन्यस्यति- **भोगेनेति** ॥ अत्र तुशब्दो ज्ञानिनः प्रारब्धभोगे उपमर्दं चेत्युक्तविशेषद्योतक इति भावेन सूत्रं व्याचष्टे- **आरब्धपुण्यपापे इति** ॥ अनेन इतरे इत्येतत् प्रकृतानारब्धकार्यकपुण्यपापेतरपरामर्शकमित्युक्तं भवति। 'भोगेन' कार्यद्वाराऽनुभवेन 'क्षपयित्वा' विनाश्यानन्तरम्। ब्रह्मेति शेषोक्तिः। तमो वेत्यस्याप्युपलक्षणमेतत्। 'सम्पत्स्यते' ब्रह्मदर्शीति शेषः। इतर इति च विपरिणामेनात्राप्यन्वीयते। तथाच ब्रह्मदर्शी ब्रह्म 'सम्पत्स्यते' 'इतरो' ब्रह्मद्विट् तमः 'सम्पत्स्यते' प्राप्नोतीति योजना। अतो न प्रारब्धकर्मसद्भावेन मोक्षाद्यभावः शङ्क्य इति भावः। ननु यथा ज्ञानानन्तरं

न मोक्षो नियतः, तथाचोपासनानन्तरं ज्ञानमनियतं, तथा कर्मक्षयानन्तरमपि मोक्षोऽनियत इति शङ्कानिवर्तकतयाऽथशब्दं व्याचष्टे- **अथेति** ॥ शब्द इति शेषः। अनेनाथेत्येतत् अनन्तरमेवेति व्याख्यातं भवति।

'आरब्धपुण्यपापस्य भोगेन क्षपणादनु।
प्राप्नोत्येव तमो घोरं ब्रह्म वा नात्र संशयः॥
ब्रह्मणां शतकालात्तु पूर्वमारब्धसंक्षयः।
नियमेन भवेन्नात्र कार्या काचिद् विचारणा।'
इति नारायणतन्त्रे॥ १९ ॥

कुतोऽयं नियमो ज्ञायत इत्यत आह- **आरब्धेति** ॥ 'क्षपणात्' नाशादन्वनन्तरमेवेत्येवकारान्वयः। ब्रह्म प्राप्नोति 'घोरं' असह्यदुःखं तमो वा प्राप्नोतीति 'अत्र' अर्थे न संशय इत्यर्थः। ब्रह्मदर्शी ब्रह्मद्विद्विति च शेषः। प्रत्येकमस्यान्वयः। अतो नियमः सिद्ध इति वाक्यशेषः। नन्वारब्धभोगस्य निरवधिकत्वे ज्ञानिद्वेषिणोः ब्रह्मतमःप्राप्ती अनुपपन्ने इत्यत आह- **ब्रह्मणामिति** ॥ अत्र ब्रह्मणां शतमिति षष्ठ्या अलुक्। तस्य कालो ब्रह्मणां शतकालः तस्मात् तत्समाप्तेः 'पूर्वं तु' पूर्वमेव सर्वेषां ज्ञानिनां 'आरब्धसंक्षयः' प्रारब्धनाशो भवतीत्यर्थः। शतकालानन्तरं न कस्यापि प्रारब्धानुवृत्तिः। किन्तु तत्समाप्तिपर्यन्तमेवेति भावः। 'अत्र' नियमस्य 'काचित्' कचित् 'विचारणा' व्यभिचारो नेत्यर्थः। इदमेव वाक्यं तत्वप्रदीपरीत्या ब्रह्मणामित्यस्यावृत्तिं तत्रैकस्य समासप्रवेशं चाश्रित्य ब्रह्मणामपि ब्रह्मणां शतकालात् पूर्वमेवारब्धसंक्षयो भवति, एवं ततोऽपि पूर्वं पूर्वमनन्तादीनामिति व्याख्यातं चेद् विशेषनिष्ठं च भवतीति ज्ञातव्यम्। नारायणतन्त्रे वचनादिति शेषः। अस्याप्यध्याहृतेनान्वयः।

॥ इति तदधिगमाधिकरणम् ॥ ८ ॥

॥ इति श्रीमज्जगन्नाथयतिना कृतायां श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां चतुर्थाध्यायस्य प्रथमः पादः॥

॥ अथ द्वितीयः पादः ॥

॥ १. वाङ्मनसाधिकरणम् ॥

(उमा रुद्रे विलीयते, सर्वे देवाः स्वोत्तमेषु श्रुत्युक्तक्रमेण विलीयन्त इति निरूपणम्)

देवानां मोक्ष उत्क्रान्तिश्चास्मिन् पाद उच्यते —

सू — ॐ ॥ वाङ्मनसि दर्शनाच्छब्दाच्च ॥ ॐ ॥ १ ॥

वागभिमानिन्युमा मनोऽभिमानिनि रुद्रे विलीयते । वाचो मनोवशत्वदर्शनात् । 'तस्य यावन्न वाङ्मनसि सम्पद्यते' (छा.६-१५-१) इति शब्दाच्च ।

एतत्पादार्थं दर्शयति- देवानामिति ॥ स्वपदं गतानां देवानां उत्तरोत्तर-प्रवेशात्मको देहान्मोक्षः स्वपदगदेवभिन्नानां मानुषशरीराणां ज्ञानिनां देहाद् ब्रह्मनाड्योत्क्रान्तिश्चास्मिन् चतुर्थस्य द्वितीयपादे उच्यत इति योजना । तत्राधिकार्याधिक्यक्रमात् प्रथमं देवानां लयो निगद्यते पश्चादितरेषामुत्क्रान्तिरिति भावः । नचैवं पादभेदप्रसङ्गः । चतुर्मुखादिदेवानां मनुष्याणां च ब्रह्मल्प-गुणविषयकत्वेन उपासनेऽवान्तरभेदे विद्यमानेऽप्युपासनत्वेनैकीकरणवद-त्रापि देहलयत्वेनैकीकरणसम्भवात् । तत्र प्रथमाधिकरणे वाचो मनसि लयः समर्थ्यते । तत्र न वाङ् मनसि लीयत इति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति- **वागिति** ॥ अत्र वाङ्मनश्शब्दार्थोक्तिपूर्वकं विलीयत इति पदाध्याहारेण सूत्रं व्याचष्टे- **वागभिमानिनीति** ॥ अत्रोमारुद्रपदाभ्यां लक्षणया वारुणीशेषौ सौपर्णीसुपर्णौ च प्रतिपाद्येते । लक्षणाबीजं तु उमात्ववारुणीत्वादीनामेक-द्रव्यसम्बन्धः सौपर्ण्यादीनां पदसादृश्यं चेति सुधोक्तं द्रष्टव्यम् । तत्वप्रदीपे तु उमारुद्रादीनामुपरि वारुणीशेषादिभावात् तदानीमपि तेषु पूर्वप्रसिद्धनाम-

प्रयोगोऽर्जुनादिशरीरपातेऽपि स्वर्गारोहणादिकेऽर्जुनादिशब्दप्रयोगवद् भूतपूर्वगत्या न विरुद्ध इत्युक्तम् । कुत इत्यतो- दर्शनादित्येतत् शब्दादित्यनेन पौनरुक्त्य-परिहाराय प्रत्यक्षपरतया व्याचष्टे- **वाच इति** ॥ प्रत्यक्षतयैवेत्यादावुपस्कर्तव्यम् । मनोऽनुसारेणैव वाक्प्रवृत्तेः सर्वानुभवसिद्धत्वादिति भावः । शब्दादित्येतच्छ्रुतिप्रदर्शनेन व्याचष्टे - **तस्येति** ॥ छन्दोगश्रुतिरियम् । अत्र जीवस्य मरणकाले अस्वातन्त्र्यं प्रतिपादयितुं तत्वाभिमानिदेवताव्यापारोपरमः प्रतिपाद्यते । अत एव प्रमेयदीपे 'वागिति वाक्येनोत्क्रमणे परदेवता वागादीन्याकर्षतीत्युच्यते' इत्युक्तम् । 'तस्य' म्रियमाणस्य पुरुषस्य यावत्पर्यन्तं वागभिमानिन्युमा मनोऽभिमानिनि 'न सम्पद्यते' तेन ग्रस्तव्यापारा न भवति । तावत् स्वीयान् ज्ञात्यादीन् जानाति । यदा तु वाङ् मनसि सम्पद्यते तदा न जानाति पुरुष इति श्रुत्यर्थः । यद्यपीयं श्रुतिः मरणकालीनदेवताप्रवेशविषयेति नात्रोदाहरणं युक्तं, तथापि मरणकाले देवताप्रवेशस्य प्रळये तल्लयक्रमानुसारित्वेनास्या उभयविषयत्वान्नासङ्गतिः ।

'उमा वै वाक् समुद्दिष्टा मनो रुद्र उदाहृतः ।
तदेतन्मिथुनं ज्ञात्वा न दाम्पत्याद् विहीयते ॥'

इति स्कान्दे ॥

नन्वेतच्छ्रुतिसूत्रगतौ वाङ्.मनःशब्दौ उमारुद्रपरौ कुतो ज्ञायेते इत्यतः स्मृतेरेवेत्याह- **उमेति** ॥ अत्राप्युमापदेन वारुणी सौपर्णी च रुद्रपदेन च शेषः सुपर्णश्चोच्यते । उमाविवक्षायां तु तस्याः रुद्रद्वारा भारत्यां लयो ज्ञातव्यः । वैशब्दः प्रसिद्धौ । 'तत्' श्रुत्युक्तं 'एतत्' उमारुद्राख्यं वाङ्मनसाख्यं च 'मिथुनं' द्वन्द्वं 'दाम्पत्यात्' जायापतिभावात् । एवं ज्ञातुर्वैधुर्यं न भवेदिति भावः । स्कान्द इति । वाक् उमा मनो रुद्र इत्युक्तं यत इति वाक्यशेषः ।

सू — ॐ ॥ अत एव च सर्वाण्यनु ॥ ॐ ॥ २ ॥

अत एव च शब्दात् सर्वाणि दैवतानि यथाऽनुकूलं विलीयन्ते

'अग्नौ सर्वे देवा विलीयन्ते अग्निरिन्द्रे इन्द्र उमायां उमा रुद्रे विलीयते एवमन्यानि दैवतानि यथाऽनुकूलम्' इति हि गौपवनश्रुतेः ॥ २ ॥

अस्त्वेवं वाचो लयनिर्णयः । तथापि न सर्वदेवानां मोक्षो युज्यते । लया-निश्चयादित्याशङ्कां परिहरत् सूत्रं पठति– **अत एवेति** ॥ अत्र अत इति पदमनूद्य तदर्थमाह- अत इति 'शब्दात्' श्रुतेः । शब्दादेवेत्यन्वयः । न तत्र मानान्तरं गवेषणीयमित्येवार्थः । एवप्रयोगो नियामकानां बाहुल्याल्लयानिश्चय इति शङ्कानिरासार्थः । चशब्दोऽप्यर्थः । सर्वाणीत्यतः परं सम्बध्यते । न केवलं वागिति चशब्दार्थः । तत्वप्रदीपे तु चशब्दादिन्द्रियाणि चेत्युक्तम् । दैवतानीति सूत्रे शेषोक्तिः । अन्वित्यस्यार्थमाह यथाऽनुकूलमिति । स्वनियम्यनियामक-भावानुसारेणेत्यर्थः । विलीयन्त इति पूर्वत्राध्याहृतपदस्यात्र विपरिणामेनानु-षङ्गोक्तिः । कोऽसौ शब्द इत्यतस्तमुदाहरति – **अग्नाविति** ॥ अत्रोमारुद्रपदाभ्यां सौपर्णीसुपर्णावुच्येते । अग्नेरिन्द्रे लयः सूर्यद्वारेणैव, नतु साक्षादिति ज्ञातव्यम् । विलीयत इति सर्वत्र सम्बध्यते । श्रुतेरित्यनन्तरं यत इति शेषः । हिशब्दः श्रुतेः प्रसिद्धत्वद्योतकः। शब्दात् श्रुतेरिति सामानाधिकरण्यम् ।

॥ इति वाङ्मनसाधिकरणम् ॥

॥ २. मनःप्राणाधिकरणम् ॥

(मनोऽभिमानी रुद्रः मुख्यप्राणे विलीयते)

सू — ॐ ॥ तन्मनः प्राण उत्तरात् ॥ ॐ ॥ ३ ॥

'मनः प्राणे' (छा. ६-१५-१) इत्युत्तरवचनान्मनोऽभिमानी रुद्रः प्राणे वायौ विलीयते । 'वायोर्वा व रुद्र उदेति वायौ विलीयते तस्मादाहुर्वायुर्देवानां श्रेष्ठः' इति च कौण्डिन्य-श्रुतिः ॥ ३ ॥

अत्राधिकरणे मनसः प्राणे लयः समर्थ्यते। न प्राणे मनो लीयते, अविशेषात् इति पूर्वपक्षे सिद्धान्तयत् सूत्रं पठति- **तन्मन इति**॥ अत्र शब्दादित्यस्यानुवृत्त्या उत्तरादिति हेतुवाक्यं व्याचष्टे- **मन इति**॥ इत्युत्तरवचनादिति। एवंरूपात् 'वाङ् मनसि सम्पद्यते' इति पूर्वनयोदाहृतवाक्यापेक्षयोत्तराद् वाक्यादित्यर्थः। तन्मन इति समासनिविष्टतच्छब्दस्य पूर्वनयोक्तवाग्लयाधिकरणत्वविशेषितपरत्वेन स्पष्टार्थत्वात् तं विहाय तन्मनः प्राण इति प्रतिज्ञांशं व्याचष्टे- **मन इति**॥ विलीयत इति शेषोक्तिः, श्रुतौ सम्पद्यत इत्यनुवृत्तपदार्थकथनं वा। सावधारणमेतत्। अत्र प्राणवायुपदाभ्यां व्याख्येयव्याख्यानरूपाभ्यां चतुर्मुखो ग्राह्यः। मनोरुद्रपदाभ्यां शेषो गरुडश्च। तयोश्च वाणीद्वारा चतुर्मुखे लयो बोध्यः। एवं श्रुतावपि वायुरुद्रशब्दौ मनःप्राणशब्दौ व्याख्येयौ। ननु प्राणादनुत्पन्नस्य मनसः कथं प्राणे लय इत्यतोऽनुवृत्तं शब्दादित्येतच्छ्रुत्यन्तरपरतयाऽपि व्याचष्टे– **वायोरिति**॥ वावेत्यवधारणे। 'उदेति' उत्पद्यते, तस्मादुत्पन्नत्वादेव वायौ विलीयते रुद्रः। तस्मादित्युत्तरत्रापि सम्बध्यते। 'तस्मात्' रुद्रोत्पत्तिलयहेतुत्वादाहुर्वृद्धाः 'देवानां' रुद्रादीनाम्। श्रुतिरित्यनन्तरं यत इति शेषोऽस्य मनः प्राण इति सिद्धमित्युपस्कृतेनान्वयः। अस्मिन् पक्षे प्राणे इति निमित्तसप्तमीति ध्येयम्॥

॥ इति मनःप्राणाधिकरणम्॥ २॥

॥ ३. अध्यक्षाधिकरणम्॥

(मुख्यप्राणः परमात्मनि विलीयते)

सू— ॐ॥ सोऽध्यक्षे तदुपगमादिभ्यः॥ ॐ॥ ४॥

स प्राणः परमात्मनि विलीयते। 'सर्वे प्राणमुपगच्छन्ति प्राणः परमुपगच्छति प्राणं देवा अनुप्राणन्ति प्राणः परमनुप्राणिति तस्मादाहुः प्राणस्य प्राण इति' 'प्राणः परस्यां देवतायाम्'।

अत्राधिकरणे प्राणशब्दोक्तचतुर्मुखस्येश्वरे लयः समर्थ्यते। तदधीनत्वानिश्चयान्न परमात्मनि प्राणो लीयत इति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति - **स इति**॥ सोऽध्यक्षे इति प्रतिज्ञायां स इत्यनुवादेन प्राण इति व्याख्यानं कृतम्। 'प्राणो' हिरण्यगर्भः। अध्यक्षे इत्यस्य 'अध्यक्षोऽधिपतिः श्रेष्ठो यदक्षाण्यस्य चोपरि' इति गीतातात्पर्योदाहृतवचनानुसारेणैतज्जगदधि-कृत्याक्षाणि यस्य सोऽध्यक्ष इति विग्रहाश्रयेणार्थं दर्शयति– **परमात्मनीति**॥ विलीयत इति शेषोक्तिः। सावधारणमेतत्। कुत इत्यतस्तत्राध्यक्षपदसूचितं तस्य तदधीनत्वादिति हेतुमभिप्रेत्य, ननु तन्निश्चयोपायाभाव इत्यतः प्रवृत्तस्य तदुपगमादिभ्य इति हेतुवाक्यस्य तस्मिन् प्राणे तेषां देवानामुपगमो लयः तस्मिन् अध्यक्षे तस्य प्राणस्योपगमो वा, आदिपदेन सर्वेषां प्राणानुप्राणनं तत्र लयः प्राणस्य अध्यक्षानुप्राणनं तत्र लयो भोगश्च ग्राह्यः, तदसिद्धिशङ्कायामुपगमादीत्यनेन तत्प्रतिपादकश्रुतिस्मृतयो ग्राह्या इत्यर्थमभिप्रेत्य तादृशश्रुतिस्मृत्युदाहरणेन तदुपगमादिभ्य इत्यंशं व्याचष्टे- **सर्व इति**॥ देवा इत्यत्रापि सम्बध्यते। ईश-लक्ष्मीव्यतिरिक्तसर्वदेवा इत्यर्थः। अन्यथा 'प्राणः परम्' इत्युत्तरवाक्यविरोधः। 'उपगच्छन्ति' प्राप्नुवन्ति 'प्राणो' हिरण्यगर्भः। 'परं' परमेश्वरम् 'उपगच्छति' तत्र लीयत इति यावत्। 'देवाः' शेषादयः 'प्राणमनुप्राणन्ति' प्राणमनुसृत्य चेष्टां कुर्वन्ति। 'परं' परमात्मानं 'तस्मात्' प्राणचेष्टाप्रवर्तकत्वात्। इत्याहु-रित्यत्रापि परमिति सम्बध्यते। अत्र 'न प्राणः किञ्चिदाश्रितः, सोऽन्यं कथमुपाश्रयेत्' इत्यादिप्राणस्वातन्त्र्यश्रुतीनां सावकाशत्वप्रदर्शनाय 'सर्वे प्राणमुपगच्छन्ति', 'प्राणं देवा अनुप्राणन्ति' इत्यंशोदाहरणम्। तथाच 'सर्वे प्राणमुपगच्छन्ति' इति श्रुत्युक्तन्यायेन भगवदितरस्वातन्त्र्ये श्रुतितात्पर्यमिति भावः। 'प्राणः परस्यां देवतायाम्' इति श्रुत्यन्तरं, 'परस्यां' विष्ण्वाख्यदेवतायां 'प्राणः' चतुर्मुखो लीयत इत्यर्थः।

'मुक्ताः सन्तोऽग्निमाविश्य देवाः सर्वेऽपि भुञ्जते।
अग्निरिन्द्रं तथेन्द्रश्च वायुमाविश्य सोऽपि तु॥

आविश्य परमात्मानं भुङ्क्ते भोगांस्तु वाह्यकान् ।
नह्यानन्दो निजस्तेषां परैर्लभ्यः कथञ्चन ॥
किमु विष्णोः परानन्दो न ते विष्णाविति (विष्णविति) श्रुतेः'॥

मुक्ताः सन्त इति श्रुतिः ॥ अग्नेरधमास्तत्र लययोग्याः सर्वे देवाः 'मुक्ताः' कर्मक्षयं प्राप्ताः सन्तोऽग्निं प्रविश्य तत्र स्थितान् भोग्यान् स्वयोग्यानन्दादीन् 'भुञ्जते' अनुभवन्तीत्यर्थः । अपिरभिव्याप्तौ, अग्निरपीति वा । अग्नेरिन्द्रप्रवेशः परम्परया । तथाशब्द उपमायाम् । चः समुच्चये । 'वायुं' विरिञ्चिमाविश्येति पूर्वोक्तसौपर्णिसुपर्णवाणीद्वारेणेति द्रष्टव्यम् । 'सः' वायुः । अपिः समुच्चये । तुशब्दो हिरण्यगर्भस्येतरदेवेभ्यः सर्वाङ्गप्रवेशाख्यविशेषार्थः । अवधारणे वा तुः । 'बाह्यकान् भोगान्' भुज्यन्त इति भोगाः परमात्मस्वरूपानन्दात् मुक्तान्तरानन्दाच्च बाह्यान् स्वयोग्यानन्दानित्यर्थः । बहुवचनमेकत्वार्थे । यद्वा- बाह्यप्राकृत-विषयभोगानित्यर्थः । उक्तं हि तत्वप्रदीपे । परमात्मस्वरूपादन्यं मुक्तान्तरानन्दाच्च बाह्यं स्वानन्दं भुङ्क्ते बहिर्निर्गतस्तु बाह्यविषयानपि कांश्चित् स्वयोग्यान् भुङ्क्ते इति । पुनस्तुशब्दोऽवधारणार्थः । बाह्यकानित्येतदेवोपपादयति- नहीति ॥ 'हि' यस्मात् 'तेषां' मुक्तानां मध्ये एकस्य 'निजः' स्वरूपभूत आनन्दः 'परैः' अन्यैः 'कथञ्चन' केनाप्युपायेन प्राप्यो न भवति । विष्णोः परानन्दस्तु न प्राप्य इति किमु वक्तव्यमित्यर्थः । विष्णुसम्बन्ध्यानन्दोऽन्यैर्न लभ्य इति कुतो ज्ञायत इत्यत आह- न त इति ॥ अन्यथैतच्छ्रुतिविरोधः स्यादिति भावः । व्याख्यातैषा श्रुतिर्जन्माधिकरणे । न च प्रवेशाभिधायकस्मृत्युदाहरणं प्रकृतासङ्गत-मिति वाच्यम् । 'मुक्तौ लये यद्वत्' इत्यनुव्याख्यानोक्तरीत्या मुक्तौ भोगार्थं प्रवेशक्रमस्य लये प्रवेशक्रमस्य च समनियतत्वेन सङ्गतत्वात् ॥

'प्राणस्य तेजसि लयो मार्गमात्रमुदाहृतम् ।
सर्वेशितुश्च सर्वादेस्तस्यान्यत्र लयः कथम् ॥'
इत्यादिश्रुतिस्मृतिभ्यः ॥ ४ ॥

ननु 'प्राणः परस्याम्' ( ) इति श्रुतौ प्राणस्य परमात्मनि लय उक्तः। स नोपपद्यते 'प्राणस्तेजसि' (छा. ६-१५-१) इति श्रुतिविरोधादित्यतः स्मृत्यन्तरमुदाहरति– **प्राणस्येति** ॥ प्राणस्य 'तेजसि' लक्ष्म्यां लयो नाम 'मार्गमात्रं' तत्प्राप्तिमात्रम्, ननु जीर्णभाव इति 'उदाहृतम्' उक्तमभियुक्तैरित्यर्थः। कुतोऽमुख्यार्थकल्पनेत्यत आह - **सर्वेशितुरिति** ॥ 'तस्य' प्राणस्य 'सर्वादेः' सर्वोत्पत्तिकारणात् 'सर्वेशितुः' विष्णोरन्यत्र कथं साक्षाल्लयः अयोग्यत्वात् तस्य साक्षात् परमात्मनि लययोग्यत्वादिति भावः। इदं च श्रुतिस्थप्राणशब्दस्य हिरण्यगर्भवाचित्वमाश्रित्योक्तम्। उक्तं हि सुधायाम्– प्राणशब्दस्य हिरण्यगर्भवाचित्वपक्षे भाष्योक्तमिति द्रष्टव्यमिति। यदातु प्राणशब्दो वायुवाची तदा तस्य 'तेजोऽभिधां तु श्रियमाप्य विष्णुमग्रे ततः पुत्रतयैव वायुः' इत्यनुव्याख्यानोक्तरीत्या साक्षादेव तेजस्येव देहलयो न परमात्मनि, तस्य च चतुर्मुखत्वेन पुनर्जननात् 'विलीनो हि प्रकृतौ संसारमेति' (सौपर्णश्रुतिः) इति श्रुतेरिति ध्येयम्। **इत्यादिश्रुतिस्मृतिभ्य इति**। श्रुती च[1] स्मृती चेति विग्रहः। आदिशब्दोक्तश्रुतिस्मृतिविवक्षया बहुवचनम्। श्रुतिस्मृतिभ्य इत्यस्य प्राणः परमात्मनि लीयते इति सिद्धमिति साध्येनान्वयः।

॥ इत्यध्यक्षाधिकरणम् ॥ ३ ॥

॥ ४. भूताधिकरणम् ॥

(अधमदेवतानां भूताभिमानिपु लयः)

सू— ॐ ॥ भूतेषु तच्छ्रुतेः ॥ ॐ ॥ ५ ॥

भूतेष्वन्येषां देवानां लयः। 'भूतेषु देवा विलीयन्ते भूतानि परे न पर उदेति नास्तमेत्येकल एव मध्ये स्थाता' इति वृहच्छ्रुतेः ॥ ५ ॥

---

१. 'श्रुतिश्च' इत्येव पाठः साधुः।

अत्राधिकरणे प्राग् विशिष्योक्तेभ्योऽन्येषां देवानां पृथिव्यादिसमस्तभूतेषु लयः समर्थ्यते। 'अग्नौ सर्वे देवा विलीयन्ते' इति (गौपवन)श्रुतेरग्नावेव सर्वेषां देवानां लय इति पूर्वपक्षे सिद्धान्तवत् सूत्रमुपन्यस्यति– **भूतेष्विति** ॥ अत्र स इति विपरिणामेनानुवर्तते। देवा विलीयन्त इति प्रकरणाल्लभ्यत इति भावेन भूतेष्विति प्रतिज्ञांशं व्याचष्टे- **भूतेष्विति** ॥ पञ्चस्वपि भूतेषु तदभिमानिष्वित्यर्थः। **अन्येषामिति**। 'वाङ् मनसि' इत्याद्यधिकरणत्रये शेषसुपर्णचतुर्मुखपरमात्मसु लीयमानत्वेन उक्तेभ्यो वारुणीसौपर्णीशेषसुपर्ण-चतुर्मुखेभ्योऽन्येषां देवानामित्यर्थः। कुत इत्यतः तच्छ्रुतेरित्यंशं व्याचष्टे- **भूतेष्विति** ॥ 'देवाः' उक्तेभ्योऽन्ये देवाः 'भूतानि' पृथिव्यादीनि 'परे' परमात्मनि लीयन्त इत्यनुषङ्गः। भूतानां परमात्मनि लयस्तु आकाशोर्व्योः बृहस्पतिद्वारा भूतवायोः प्रवहस्येन्द्रद्वारा अपां सोमद्वारेत्येवं परम्परया द्रष्टव्यः। परस्यापीतरवच्चेतनत्वाल्लयमाशङ्क्याह - **न पर इति** ॥ 'नोदेति' नोत्पद्यते। 'अस्तं' लयं 'नैति' न प्राप्नोति। कुत इत्यत आह- 'एकलः' स्वतन्त्र इति। 'मध्ये' देहमध्ये हृदये 'स्थाता' विद्यमान इत्यर्थः। यद्वा- उत्पत्तिलययोर्मध्ये स्थितावेक एव स्थातेत्यर्थः। अनेन ते विशिष्योक्तेभ्योऽन्ये देवाः पञ्चस्वपि भूतेषु लीयन्ते, नैकस्मिन्नग्नावेव। कुतः? 'तच्छ्रुतेः' तस्य भूतेषु देवानां लयस्य श्रुतेः 'भूतेषु देवाः' इति श्रवणादिति सूत्रार्थ उक्तो भवति।

॥ इति भूताधिकरणम् ॥ ४ ॥

॥ ५. नैकस्मिन्नधिकरणम् ॥

(अग्नौ न सर्वेषां लयः)

सू — ॐ ॥ नैकस्मिन् दर्शयतो हि ॥ ॐ ॥ ६ ॥

नैकस्मिन् भूते सर्वेषां देवानां लयः 'पृथिव्यामृभवो विलीयन्ते वरुणेऽश्विनावग्नावग्नयो वायाविन्द्रः सोम आदित्यो बृहस्पतिरित्याकाश एव साध्या विलीयन्ते।'

अत्राधिकरणे देवानां सर्वभूतेषु लयः समर्थ्यते । नच पूर्वेण गतार्थता । अधिकाशङ्क्यैवैतदधिकरणप्रवृत्तेः । नच सन्न्यायरत्नावल्यामेकाधिकरणत्वेन व्याख्यानात् तद्विरोधः । अस्य प्रस्थानान्तरत्वेन अर्थतोऽभिन्नन्यायमूलत्वेन चाधिकरणभेदेऽप्यविरोधात् । नचानेन पूर्वस्य गतार्थता । 'भूतेषु देवाः' इति श्रुतिविशेषसूचकतया सार्थकत्वात् । 'अग्नौ सर्वे देवाः' इति श्रुतेरग्नावेव सर्वेषां लय इति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति - **नैकस्मिन्निति** ॥ अत्र पूर्वसूत्राद् भूतेष्वित्यस्य विपरिणामेनानुवृत्तिं सर्वेषां देवानां लय इति प्रकृतप्रतिज्ञाशेषं चाभिप्रेत्य नैकस्मिन्निति प्रतिज्ञांशं व्याचष्टे - **नैकस्मिन्निति** ॥ भूते तेजोभिमानिनि अग्नावेव लयो न वाच्य इत्यर्थः । कुतो नेत्यतः प्रवृत्तं दर्शयतो हीति हेत्वंशं श्रुतिद्वयोदाहरणपूर्वकं व्याचष्टे – **पृथिव्यामित्यादिना** ॥ पृथिव्यभिमानिधरायामृभुनामका देवा विलीयन्त इत्यर्थः । 'वरुणे' अबभिमानिनि अश्विनौ विलीयेते इति विपरिणामेनान्वयः । 'अग्नौ' अग्निजडाभिमानिनि देवे 'अग्नयः' अग्निपुत्रा विलीयन्त इत्यर्थः । 'वायौ' प्रधाने हिरण्यगर्भपरोऽयं शब्दः । इतिशब्दः श्रुतिस्थः आद्यर्थे । यथोक्तं तत्वप्रदीपे - इतिशब्दस्याद्यर्थत्वादिति । तथाच वायाविन्द्रः सोम आदित्यो बृहस्पतिरित्याद्याः सर्वे देवा विलीयन्त इत्यर्थः । तत्रेन्द्रस्य लयः 'इन्द्र उमायाम्' इति (गौपवन)श्रुत्युक्तक्रमेण सौपर्णीसुपर्णवाणीद्वारेण । सोमस्य चानिरुद्धकामवारुणीशेष-वाणीद्वारेण । सूर्यस्य बृहस्पतिशक्रसौपर्णीसुपर्णवाणीद्वारेण। बृहस्पतेः शक्रसौपर्णीसुपर्णवाणीद्वारेण लय इति विवेक्तव्यम् । 'आकाशे' तदभिमानिनि गणपतौ 'साध्याः' तन्नामका देवाः ।

'मृत्यवः पृथिव्यां वरुण आपोऽग्नयस्तेजसि मरुतो मारुत आकाशे विनायका विलीयन्ते' इति महोपनिषच्चतुर्वेदशिखा च दर्शयतः । अतः 'अग्नौ देवा विलीयन्ते' इति अत्र निर्दिष्टानामेव ॥ ६ ॥

एवं महोपनिषद्वाक्यमुदाहृत्य चतुर्वेदशिखावाक्यमुदाहरति- मृत्यवः

पृथिव्यामिति ॥ मारकत्वान्निमित्तात् मृत्युनामका देवाः पृथिव्यभिमानिदेवतायां लीयन्त इत्यर्थः । ऋभवः पृथिव्यामिति क्वचित् पाठः । नच ऋभुपृथिव्योः शतस्थतासाम्यात् कथमेतत् । किञ्चिन्न्यूनतादिभावात् । 'आपः' वरुणभिन्नाब्देवताः 'तेजसि' तेजोभूताभिमानिन्यग्नौ 'मरुतो' भूतवाय्वादयो मरुद्गणाः 'मारुते' हिरण्यगर्भे लीयन्ते इत्यर्थः । तत्र मरुतामिन्द्रसौपर्णीसुपर्णवाणीद्वारेण हिरण्यगर्भे लयो न साक्षादिति ध्येयम् । 'विनायकाः' गणपतिभृत्याः विनायकपुत्रा इति वा । ब्रह्मचारिवेषेण प्रच्छन्न इति तत्वप्रदीपे उक्तम् । वस्तुतो विनायकस्य गृहस्थत्वात् 'इतीति' एवंरूपेत्यर्थः । महोपनिषच्चतुर्वेदशिखा चेत्यनेन सूत्रे महोपनिषच्चतुर्वेदशिखे इति द्विवचनान्तपदाध्याहारः सूचितः । 'दर्शयतः' प्रतिपादयतः । इतीत्यत्रापि सम्बध्यते । तथाच 'इति' इत्येवं प्रत्येकं भूतेषु देवतालयं दर्शयत इत्यर्थः । अनेन सूत्रे पूर्वस्मात् तदित्येतद् विभज्यानुवर्तते । प्रत्येकं भूतेषु देवानां लीनत्वमिति तदर्थस्य दर्शनक्रियायां कर्मत्वेनान्वय इत्युक्तं भवति । ननु प्रत्येकं भूतेषु देवानां लये 'अग्नौ सर्वे देवा विलीयन्ते' इति श्रुतेः का गतिरित्यत आह- **अत इति ॥** इतीत्यनन्तरं श्रुत्या लयाभिधानमिति शेषः । 'अत्र' अनयोः । तथाच यत एवं पृथक् श्रुतिद्वये प्रत्येकं भूतेषु देवानां लयः प्रसिद्धोऽतः 'अग्नौ सर्वे देवाः विलीयन्ते' इति श्रुत्या लयाभिधानम् 'अत्र' उदाहृतश्रुतिद्वये 'निर्दिष्टानाम्' उक्तानामग्निपुत्राणामेव, न सर्वेषां देवानामित्यङ्गीकार्यमित्यर्थः । तथाच श्रुतिस्थाग्निशब्दः कृत्स्नाग्निपुत्रविषय इति न तद्विरोध इति भावः । उपलक्षणमेतत् । प्रायेण भूतान्तराप्रवेशानां सर्वेषामधमानामग्नावेव लय इति तदभिप्रायकः सर्वशब्द इत्यपि द्रष्टव्यम् । तदुक्तमनुव्याख्याने । 'विशन्ति शिष्टा अपि हव्यवाहनम्' इति । **अत्रायं गुरुपादोक्तलयक्रमः**- मनुष्योत्तमानां निर्ऋतेश्च यमे लयः । यमस्य पितॄणां वैवस्वतादिमनूनां प्रियव्रतादिचक्रवर्तिनां च स्वायम्भुवे मनौ लयः । ऋभूणां पृथिव्यां लयः । साध्यानामाकाशे लयः । अग्निपुत्राणामग्नौ लयः । अग्नेः सूर्ये लयः । सूर्यस्याकाशस्य पृथिव्याश्च गुरौ लयः । भृग्वादीनां दक्षे लयः । मनुगुरुदक्षशचीनां मरुद्गणानां चेन्द्रे लयः ।

कुबेरस्य वरुणस्य च सोमे लयः । सोमस्य विष्वक्सेनादिपार्षदानां चानिरुद्धे लयः[१] । अनिरुद्धस्य सनकादियतीनां रत्याश्च कामदेवे लयः । कामदेवस्य वारुण्याम् । वारुण्याः शेषे । शेषस्य सरस्वत्याम् । एवमिन्द्रस्य सौपर्ण्यां लयः। सौपर्ण्या गरुडे । गरुडस्य सरस्वत्याम् । एवं शेषगरुडमार्गभेदेन स्वोदर-प्रविष्टाखिलप्रपञ्चायाः सरस्वत्याः विरिञ्चे लयः । विरिञ्चस्तु लक्ष्मीं प्रविश्य नारायणे लीनो भवतीति ।

॥ इति नैकस्मिन्नधिकरणम् ॥ ५ ॥

॥ ६. समनाधिकरणम् ॥

(लक्ष्म्याः लयो नास्ति)

सू — ॐ ॥ समना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ॐ ॥ ७ ॥

देशतः कालतश्च व्याप्त्या समो ना परमपुरुषो यस्याः सा समना । संसारानुपक्रमात् स्वत एवामृत्वं तस्याः ।

अत्राधिकरणे प्रकृतेर्विष्णौ लयाभावः समर्थ्यते । विष्ण्वधीनत्वाल्लक्ष्मीः विष्णौ लीयत इति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति- **समनेति** ॥ अत्र समनेत्येतद्धेतु-गर्भं विशेषणम् । तद्बलात् प्रकृतिरिति विशेष्यं लभ्यते । इदं चावर्तते । अध्यक्ष इति चानुवर्तते इत्याशयेन समनेत्येतद् व्याचष्टे- **देशत इति** ॥ नेत्यस्य व्याख्या- **परमपुरुष इति** ॥ परमपुरुषवत् सर्वगता नित्या चेत्यर्थः । समनेत्यनन्तरं न लीयत इति वाक्यशेषः । तेनाद्यचशब्दो नञनुकर्षणार्थ इति सूचितम् । कुतो न लीयत इत्यतोऽमृतत्वञ्चानुपोष्येतद् व्याचष्टे स्वत एवामृतत्वं तस्या इति । यस्याः सा समनेत्यस्य तस्या इत्यनेनान्वयः । तथाच तस्याः समनायाश्चित्प्रकृते-

---

१. गन्धर्वाणां कुबेरे लयः । शतस्थानाम् अश्विनोः अवृभूताभिमानिनिवरुणे लयः । इति पूरणीयः ।

रमृतत्वमित्यर्थः । अनेन समनेति प्रथमा षष्ठ्यर्थेऽपीत्युक्तं भवति । यथोक्तं तत्वप्रदीपे– प्रथमायाः षष्ठ्यर्थत्वेनेति । तस्याश्चेत्यपि सम्बन्धः । अनेनाद्यश्चो न केवलं नुः किन्तु समनाया अप्यसृत्युपक्रमादमृतत्वमिति समुच्चयार्थतयाऽपि व्याख्यातः । अनुपास्येत्यर्थकस्यानुपोष्येत्यस्य प्रतिपदम्- स्वत इति, द्वितीयचशब्दस्यानुपोष्येत्यनेनान्वयमुपेत्य तदर्थमाह - एवेति ॥ 'अमृतत्वं' नित्यमुक्तत्वम् । यत इति शेषः । तेन द्वितीयश्चो यत इत्यर्थेऽपि व्याकृतः । नित्यमुक्तत्वमेव तस्याः कुत इत्याशङ्कानिवारकतयाऽसृत्युपक्रमादित्यंशं व्याचष्टे- **संसारानुपक्रमादिति** । उपक्रम उपसङ्क्रमणं सम्बन्धस्तदभावादित्यर्थः। कदाचिदपि संसाराभावादिति फलितार्थः । संसाराभावादित्यनुक्त्वाऽनुपक्रमादित्युक्त्याऽयमर्थो ज्ञायते । समनेति विशेषणप्रयोगेण असृत्युपक्रमादित्यस्यासिद्धिशङ्का परिहृता । संसारित्वे नित्यत्वस्य सर्वगतत्वस्य चायोगात् ताभ्यां तत्सिद्धिरिति भावः । नच तदधीनत्वयुक्तिविरोधः । तस्याः प्रबलयुक्तिविरोधेनाभासत्वात् । संसारित्वेन सोपाधिकत्वाच्च । अनेन- न केवलं नुः, किन्तु यतः समनायाः देशतः कालतश्च व्याप्त्या परमपुरुषसमायाः तद्वत् सर्वगतायाः नित्यायाश्च देव्या अपि 'असृत्युपक्रमात्' कदाऽपि संसारसम्बन्धाभावात् 'अनुपोष्य च' अनुपास्यैवामृतत्वमस्त्यतः समना प्रकृतिरध्यक्षे परमात्मनि न लीयत इति सूत्रार्थ उक्तो भवति । 'तेजः परस्यां देवतायाम्' (छा.६-१५-१) इति लयोक्तिस्तु गुरौ वसतीतिवत् अतिसमीपस्थित्यर्थतया योजनीयेति न तद्विरोधः । यथोक्तमेकादशस्कन्धतात्पर्ये- 'हरेरत्यन्तसामीप्यं लयो लक्ष्म्याः प्रकीर्तितः' इति ॥

बृहच्छ्रुतिश्च – द्वौ वाव सृत्यनुपक्रमौ प्रकृतिश्च परमश्च द्वावेतौ नित्यमुक्तौ नित्यौ च सर्वगतौ चैतौ ज्ञात्वा विमुच्यत इति । नैतावता साम्यम् ॥ ७ ॥

यदुक्तं प्रकृतेरीश्वरवन्नित्यत्वेन सर्वगतत्वेन चानुपक्रान्तसंसारित्वान्नित्य-

मुक्तत्वमिति, तदयुक्तं तदुभयज्ञापकाभावादित्यत आह- **बृहदिति** ॥ उक्तार्थे प्रमाणमिति शेषः । न केवलं सौत्रयुक्तिरिति चशब्दार्थः । वावेत्यवधारणे । द्वावेव निर्दिशति- **प्रकृतिरिति** ॥ चित्प्रकृतिरित्यर्थः । 'परमः' परमात्मा । चौ परस्परसमुच्चये । सृत्यनुपक्रमाविति नित्यमुक्ताविवत्र हेतुः । 'नित्यौ' देहतोऽपि नित्यौ सर्वगतौ चेति सृत्यनुपक्रमे हेतुः । पूर्ववच्चशब्दद्वयार्थः । प्रकृति-परमशब्दयोरन्यपरत्वशङ्कानिरासाय- **एतौ ज्ञात्वेति** शेषोदाहरणम् । इति बृहच्छ्रुतिरित्यन्वयः । अनेन सूत्रे श्रुतिसमुच्चयेऽपि चशब्द इत्युक्तं भवति । ननु प्रकृतेरपि नित्यमुक्तत्वाङ्गीकारे भगवता सर्वसाम्यमापतितमित्यत आह- **नैतावतेति** ॥ तस्या इत्यनुषज्यते । परमेणेति शेषः । तथाच प्रकृतिपुरुषयोः नित्यमुक्तत्वादिना साम्यमस्तीत्येतावता न सर्वधर्मेण साम्यमिति सम्बन्ध-भाष्यस्यार्थः । नेत्यनेन सूत्रे नञनुकर्षकः चशब्दोऽनुवर्तनीय इत्युक्तं भवति ।

सू — ॐ ॥ तदपीतेः संसारव्यपदेशात् ॥ ॐ ॥ ८ ॥

'समावेतौ प्रकृतिश्च परमश्च नित्यौ सर्वगतौ नित्यमुक्तौ असमावेतौ प्रकृतिश्च परमश्च विलीनो हि प्रकृतौ संसारमेति विलीनः परमे ह्यमृतत्वमेति' इति सौपर्णश्रुतेः ॥ ८ ॥

नैतावतेत्युक्तसाध्ये हेतुतया सूत्रं पठित्वा सूत्रव्याख्यानस्य श्रुत्यैव करणात् तद् विहाय सूत्रोपात्तश्रुतिमेवोदाहरति - **तदिति** ॥ एताविवत्युक्तावेव दर्शयति- **प्रकृतिश्चेति** ॥ 'नित्यौ' देहतोऽपि नित्यौ । समावेताविवत्यारभ्य नित्यमुक्ताविवत्यन्तेन नित्यमुक्तत्वादिनैव साम्यमित्यर्थे प्रमाणमुक्तं भवति, ननु सर्वसाम्यमिति प्रतिज्ञायां तद्धेतौ मोचकत्वामोचकत्वरूपविरुद्धधर्माधिकरणत्वे च प्रमाणत्वेन श्रुतिशेषमुदाहरति– **असमावेताविति** ॥ 'हि' यतः 'परमे' परमात्मनि 'विलीनः' अन्यैरदृश्य एव तं प्राप्तः 'अमृतत्वं' मुक्तिमेतीति । अनेन सौत्रतच्छब्दः परमात्मपरोऽपीत्युक्तं भवति । विलीन इत्यनेनापीतिशब्दो व्याकृतः । श्रुतेरिति व्यपदेशपदार्थोक्तिः । अनेन- तदपीतेरिति हेतौ पञ्चमी । संसारेति तन्निवृत्ते-

रप्युपलक्षकम्। अनुवृत्तचशब्देन नेति लभ्यते। तथाच तस्यां प्रकृतौ अपीतेः। लयात् संसारव्यपदेशात् 'विलीनो हि' इति श्रुतौ संसारप्राप्युक्तेः तथा तस्मिन् परमात्मनि अपीतेः अमुक्तैरदर्शनविशिष्टप्राप्तेरमृतत्वोक्तेः मोचकत्वामोचकत्व-रूपविरुद्धधर्मवतोः प्रकृतिपुरुषयोर्न सर्वधर्मेण साम्यम्, किन्तु नित्यमुक्तत्वादि-नैवैति सूत्रार्थ उक्तो भवति। यद्वा- तदपीतेरिति षष्ठी। संसारपदं करणव्युत्पत्त्या तद्धेतुपरं भावप्रधानम्। तथाच तदपीतेः संसारहेतुत्वोक्तेरित्यर्थः। संसारनिवृत्ति-रूपमुक्तिहेतुत्वस्याप्युपलक्षणमेतत् तत्वप्रदीपे तु– तदापीतेरिति पठित्वा अपीति-रविज्ञातप्रवेशः 'अविज्ञातं प्रविष्टं यदपीतमिति कीर्त्यते' इति वचनात्। आ समन्तादपीतिरापीतिः स्वपरोभयाविज्ञातप्रवेशः। तस्या इत्यर्थः। आङ्प्रश्लेषाभावे 'अप्ययोऽयं समुद्दिष्टस्तदन्येषामदर्शनम्' इति तत्वनिर्णयोदाहृतश्रुतिवचनात् प्रवेशस्यान्याविज्ञातत्वमेव प्रतीयते। पूर्वस्यानेन सावकाशत्वात्। तन्मा प्रत्यायी-त्याङ्प्रश्लेषः। तथाच तदा स्वस्याप्यविज्ञात एव प्रकृतौ प्रवेश इत्यर्थ इति व्याख्यातः। टीकाकृतोऽप्याङ्प्रश्लेषः अपीतिशब्देन चादर्शनविशिष्टा प्राप्ति-रेवाभिप्रेता, नतु प्रध्वंसः। प्रध्वंसस्तु प्रमाणान्तरगम्य इति तत्वनिर्णयटीकोक्ति-विरोधात्।

सू— ॐ ॥ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ॐ ॥ ९ ॥

सूक्ष्मत्वं चाधिकं ब्रह्मणः प्रकृतेः। ज्ञानानन्दैश्वर्यादि-प्रमाणाधिक्यं च।

सर्वतः प्रकृतिः सूक्ष्मा प्रकृतेः परमेश्वरः।
ज्ञानानन्दौ तथैश्वर्यं गुणाश्चान्येऽधिकाः प्रभोः ॥
इति च तुरश्रुतिः ॥ ९ ॥

हेत्वन्तरेण प्रकृतिपुरुषयोः सर्वसाम्यं प्रतिषेधात् सूत्रं पठति- **सूक्ष्ममिति ॥** अत्र पूर्वस्मात् तदिति विभज्यानुवृत्तमावर्तते। प्रमाणशब्दः परिमाणवाची।

तथाच यतस्तद् ब्रह्म तस्याः समनायाः प्रकृतेरपि सूक्ष्मं, न केवलमेतावत्, किन्तु 'प्रमाणतः' ज्ञानानन्दादिगुणतश्चाधिकम् । कुतः ? 'तथोपलब्धेः' तथा श्रुतेरतोऽपि न साम्यमिति सूत्रवृत्तिमभिप्रेत्य तदभिप्रेतश्रुत्युदाहरणपूर्वकं तद् व्याचष्टे- **सूक्ष्मत्वं चेति** ॥ अतिसूक्ष्मत्वं चाधिकमित्यर्थः । न केवलं मोचकत्वमिति चशब्दार्थः । 'प्रमाणाधिक्यं' परिमाणाधिक्यम् । चशब्दः सूक्ष्मत्वसमुच्चये । आधिक्यं ब्रह्मणः यत इति शेषः । अस्यातोऽपि न साम्यमिति पूर्वेणान्वयः । श्रुतौ सर्वपदं ब्रह्मादिपरं, प्रकृतिः श्रीः, प्रकृतेरिति पञ्चमी । परमेश्वर इत्यनन्तरं सूक्ष्म इति विपरिणामेनानुवर्तते । तथाशब्दः समुच्चये । ऐश्वर्यमणिमादि । 'अन्ये' बलाद्या गुणादिधर्माः । न केवलं प्रभोरीश्वरस्य सूक्ष्मत्वं प्रकृतेरधिकं, किन्तु ज्ञानादयोऽप्यधिका इति समुच्चये चशब्दः । इति चेति चशब्दः स्वोक्तिश्रुति-समुच्चये ।

सू — ॐ ॥ नोपमर्देनातः ॥ १० ॥

अतस्तस्य ये विशेषगुणास्तेषामनुपमर्देनैव साम्यम् ।

यदि प्रकृतेः न पुरुषेण सर्वसाम्यं तर्हि नित्यमुक्तत्वादिसाम्यमपि न स्यात् ब्रह्मादिवत् । तथाच लयसद्भाव इत्याशङ्कां परिहरत् सूत्रमुपन्यस्यति - **नेति** ॥ अत्र अत इत्यस्य समनेत्यादिसूत्रत्रयप्रकृतसाम्यतदभावपरत्वम् । नोपमर्देनेति नसमासः । अनुपमर्देनेत्यर्थः । तदपीतेरित्यतस्तदिति विभज्यानुवर्तते । तच्च विपरिणामेनावर्तते । साम्यमस्त्येवेति शेषः । तथाचातस्साम्यतदभावयोरेव साधितत्वात् तस्य परमेश्वरस्य ये स्वातन्त्र्याद्यसाधारणगुणास्तेषां यदसाधारण्यं तन्मात्रनिष्ठत्वं तस्य 'अनुपमर्देन' अबाधेन तस्याः प्रकृतेः तेन परमेश्वरेण तेन नित्यमुक्तत्वादिना साम्यमस्त्येवेति सूत्रार्थ इत्यभिप्रेत्य सूत्रं व्याचष्टे- **अत इति** ॥ 'विशेषगुणाः' असाधारणगुणाः स्वातन्त्र्यादयः । तेषामनुपमर्देनेत्यस्य तेषामसाधारण्यस्यानुपमर्देनेत्यर्थः । अन्यथा लक्ष्मीस्वातन्त्र्यादावपि विष्णु-स्वातन्त्र्यादेरबाधादसङ्गतत्वापत्तेः । तन्मात्रनिष्ठत्वरूपासाधारण्यस्य तु अस्त्येव बाध इति भावः । साम्यमस्तीति शेषः । अनेनैवशब्दस्यान्वयः ।

देशतः कालतश्चैव समा प्रकृतिरीश्वरे ।
उभयोरप्यवद्धत्वं तदवन्धः परात्मनः ॥
स्वत एव परेशस्य सा चोपास्ते सदा हरिम् ।
प्रकृतेः प्राकृतस्यापि ये गुणास्ते तु विष्णुना ॥
नियता नैव केनापि नियता हि हरेर्गुणाः ॥
इति भविष्यत्पर्वणि ॥ १० ॥

यदि प्रकृतेरीश्वरेण नित्यमुक्तत्वादिसाम्यं तर्ह्यस्त्येव विशेषगुणासाधारण्योपमर्दः, प्रकृतेर्नित्यमुक्तत्वे तत एव स्वातन्त्र्यप्राप्तेरित्यत आह - देशत इति ॥ 'ईश्वरे' ईश्वरेण 'उभयोः' प्रकृतीश्वरयोः 'अबद्धत्वं' नित्यमुक्तत्वमित्यर्थः । अस्तीति शेषः । अपिः यद्यपि तथाऽपीत्यर्थोऽबद्धत्वमित्यस्यानन्तरो योज्यः । नित्यमुक्तत्वादिसाम्येऽपि न स्वातन्त्र्यादि प्रकृतेरित्याह- तदवन्ध इति ॥ स चासावबन्धश्च तदबन्धः परमात्मनः परेशस्येति सामानाधिकरण्यम् । तथाच यद्यप्युभयोरबद्धत्वमस्ति, तथापि 'परमात्मनः' परमचेतनस्य 'परेशितुः' विष्णोः 'तदबन्धः' अबद्धत्वमित्युक्तोऽबन्धः 'स्वत एव' अपराधीन एव, न प्रकृतेरतो न तस्याः स्वातन्त्र्यादीत्यर्थः । अथवा- 'तदबन्धः' तस्याः प्रकृतेरबन्धः नित्यमुक्तत्वं 'परमात्मनो' हरेः सकाशादागतं, परस्य तु स्वत एवेति वैयधिकरण्येनान्वयः । प्रकृतेर्हर्यधीनाबद्धत्वे युक्तिमाह - सा चेति ॥ 'चो' यतः 'सा' प्रकृतिः 'सदा हरिमुपास्ते'सदा हरिसमीपे तिष्ठति अतो नित्यमुक्तत्वं तस्या इति भावः । यद्वा - प्रकृतेरबद्धत्वे उपासनावैयर्थ्यमित्यत उपासनं न फलार्थं, किन्तु आदरादित्युक्तन्यायेन स्वाभाविकमित्याह– सा चेति ॥ चोऽवधारणे । स्वभावत इति शेषः गुणान्तरेऽपि हर्यधीनत्वं प्रकृतेरित्याह - प्रकृतेरिति ॥ 'गुणाः' ज्ञानानन्दाद्याः विष्णुना नियताः । न केवलं प्रकृतेः, किन्तु 'प्राकृतस्य' ब्रह्मादेर्ये गुणाः 'ते तु' तेऽपि 'विष्णुना नियताः' तदधीना एवेत्यर्थः । स्वत एवेत्यत्र हेतुमाह - नैवेति ॥ हिर्हेतौ प्रमाणप्रसिद्धौ वा ।

भविष्यत्पर्वणीति वचनाच्चोद्यपरिहारादिति शेषः । अस्य तेषामनुपमर्देन साम्यं युक्तमेवेति पूर्वेणान्वयः ।

सू — ॐ ॥ अस्यैव चोपपत्तेरूष्मा ॥ ॐ ॥ ११ ॥

'द्विधा हीदमवदृश्यते ऊष्मावदनूष्मावच्च । तत्रोष्मावत्परं ब्रह्म यन्न जिघ्रन्ति न पश्यन्ति न शृण्वन्ति न विजानन्ति । अथानूष्मावत्प्रकृतिश्च प्राकृतं च यन्न जिघ्रन्ति जिघ्रन्ति च यन्न पश्यन्ति पश्यन्ति च यन्न शृण्वन्ति शृण्वन्ति च यन्न जानन्ति जानन्ति च' इति सौपर्णश्रुतेः किञ्चित्साम्योपपत्तेः ॥ ११ ॥

श्रुतिरूपयुक्त्यन्तरेण किञ्चित्साम्यं प्रतिपादयत् सूत्रं पठति- **अस्यैवेति ॥** अत्रोष्माशब्देन घ्राणनाद्यविषयत्वाद्यनुकूलसामर्थ्यमुच्यते । तेन तद्वत्त्वप्रतिपादिका श्रुतिर्गृह्यते । उपपत्तेरिति षष्ठीति भावेन तां श्रुतिमुदाहरन् सूत्रं व्याचष्टे- **द्विधा हीति ॥** हिशब्दः प्रसिद्धौ । 'इदं' चेतनजातम् । 'द्विधा' द्विप्रकारोपेतम् 'अवदृश्यते' प्रतीयते । तदेव प्रकारद्वयं दर्शयति- **ऊष्मावदिति ॥** ऊष्मावदित्या-वर्तते । इदं ऊष्मावदनूष्मावच्चेति द्विविधमित्यर्थः। प्रकारिणावेवाह- **तत्रेति ॥** तयोर्मध्ये परं ब्रह्म 'ऊष्मावत्' चक्षुराद्यगोचरत्वानुकूलसामर्थ्यवत् । ऊष्मशब्दस्य सामर्थ्यवाचित्वं च 'ऊष्मनामा स भगवान् समर्थत्वात् प्रकीर्तितः' इत्यैतरेय-भाष्योक्तिसिद्धम् । नचाकारान्तोष्माशब्दः न वर्णवाचकोष्मशब्दसमानार्थक इति वाच्यम् । किञ्चिद्वैरूप्येऽप्यर्थसाम्यसम्भवात् । केचित्तु- 'उष दाहे' इत्युक्तेः पराभितापनसामर्थ्यविशेषवत्त्वम् ऊष्मावत्त्वं, तच्च परमात्मनि 'भासस्तवोग्राः प्रतपन्ति विष्णो' इति वचनात् स्वभावतः सिद्धमित्याहुः । अन्ये तु - घ्राणाद्यविषयत्वमेवोष्मापदार्थ इत्याहुः । अत्र केचित्- नायं मतुप्, किन्तु वतिः न जिघ्रन्तीति श्रुत्यानुगुण्यात् । तथाचोष्मावत्त्वं ईषदूष्मसदृशत्वं परमात्मनः

सर्वथा प्रत्यक्षाविषयत्वात् तत्प्रतिपादिका श्रुतिरूष्मा इत्याहुः । ब्रह्मणः ऊष्मावत्त्वमुपपादयति- **यदिति** ॥ इदं च 'यत्' ब्रह्म यस्मान्न जिघ्रन्ति न शृण्वन्ति न विजानन्ति मनसा साकल्येन जनास्तस्मादूष्मावदिति व्याख्येयम् । एवमुत्तरत्रापि । यद्यपि घ्राणश्रोत्राविषयत्वं द्रव्यमात्रसाधारणं, तथापि तद्गन्धादेः घ्राणाद्यविषयत्वमादायासाधारण्यं युज्यत इति ध्येयम् । अनूष्मावद् दर्शयितुं प्रतिजानीते– **अथेति** ॥ आनन्तर्यार्थोऽयं शब्दः । उच्यत इति शेषः । प्रतिज्ञात-माह– **प्रकृतिश्चेति** ॥ 'प्रकृतिः' श्रीः 'प्राकृतं' ब्रह्मादि । प्राकृतं रुग्मिण्यादीति व्याख्यानं तु प्रकरणविरुद्धम् । चावन्योन्यसमुच्चये । 'यत्' यस्मात् 'यत्' प्रकृतिप्राकृतम् । उभयरूपत्वोपपादनाय भावाभावोक्तिः । चशब्दाः समुच्चये । सौपर्णश्रुतिश्चेति । न केवलं साम्यतदभावान्यथाऽनुपपत्तिरूपयुक्तिरिति चशब्दार्थः । अनेन सूत्रे ऊष्मा च ऊष्मावत्त्वप्रतिपादिका श्रुतिश्चेति चशब्दान्वयो दर्शितः । अस्येति पदे प्रातिपदिकार्थमाह– **किञ्चित्साम्योपपत्तेरिति** ॥ देश-कालव्याप्तिनित्यमुक्तत्वादिसाम्यस्योपपत्तेरर्थे भवतीत्यर्थः । किञ्चित्साम्योप-पादिका भवतीति यावत् । अतोऽप्यस्ति किञ्चित्साम्यमिति वाक्यशेषः ।

सू — ॐ ॥ प्रतिषेधादिति चेन्न शारीरात् ॥ ॐ ॥ १२ ॥

'असमो वा एष परो नहि कश्चिदेवं दृश्यते सर्वे ह्येतेऽणवो जायन्ते च म्रियन्ते च छिद्रा ह्येते भवन्ति अथ परो न जायते न म्रियते पूर्णश्चैष भवति' इति चतुर्वेदशिखायां साम्य-प्रतिषेधान्नेति चेन्न शारीराद्धि साम्यं प्रतिषिध्यते ॥ १२ ॥

किञ्चित्साम्यमाक्षिप्य समादधत् सूत्रमुपन्यस्यति - **प्रतिषेधादिति** ॥ अत्र पूर्वपक्षांशेन प्रकृतिपुरुषयोः किञ्चित्साम्यमिति साध्याध्याहारमभिप्रेत्य प्रतिषेधक-श्रुत्युदाहरणपूर्वकं पूर्वपक्षांशं व्याचष्टे- **असमो वेति** ॥ वैशब्दोऽवधारणे । 'परः' परमात्मा 'असम एव' नतु केनापि प्रकारेण सम इत्यर्थः । कुत इत्यत

आह- **नहीति** ॥ 'हि' यतो लोके कश्चित् पुरुषः 'एवं' परमात्मवत् न दृश्यते अत इत्यर्थः । असाम्यमेव विरुद्धधर्मोक्त्योपपादयति- **सर्व इति** ॥ 'एते' जीवाः 'अणवः' अपूर्णाः 'छिद्राः' दोषिणः परमात्मा तु देहतोऽपि न जायते न म्रियते पूर्णः सर्वगतो निर्दोष इति चशब्दार्थः । तत्वप्रदीपे तु अणुत्वप्रतियोगिभूतं सर्वगतत्वं चशब्दार्थः छिद्रत्वमपूर्णत्वमित्युक्तम् । साम्येत्यतः प्राक् 'अथ परः' इत्यादिना परमेश्वरस्यैव नित्यसर्वगतत्वादिकमुक्त्वा 'सर्वे ह्येतेऽणवः' इत्यादिनाऽन्येषां तदभावमुक्त्वा 'असमो वा' इत्यनेनेत्युपस्कृत्य योजनीयम् । **साम्यप्रतिषेधादिति** । परमेश्वरेणान्येषां किञ्चित्साम्यस्यापि प्रतिषिद्धत्वादित्यर्थः । साम्येत्यनेन सूत्रे तद्वाचकस्य अस्येत्यस्यानुवृत्तिः सूचिता । परिहारांशं व्याचष्टे- **नेति** ॥ न प्रकृतेर्भगवत्साम्यमत्र प्रतिषिद्धचत इत्यर्थः । किं तर्हीत्यतः शारीरादित्यंशं व्याचष्टे- **शारीरादिति** ॥ शरीरमात्रमधिकृत्य तदभिमानितया स्थिताच्छरीरकृतोत्पत्तिनाशयुक्ताच्चेत्यर्थः । हेतुगर्भविशेषणमेतत् । अत एव हेत्वर्थकहिशब्दः जीवादिति शेषः । **साम्यमिति** । ईश्वरस्येति शेषः । साम्यमित्यनेन सूत्रे साम्यमिति शेषः । प्रतिषिद्धचत इत्यनेन शारीरादित्यनन्तरमपि प्रतिषेधादित्यस्यानुवृत्तिश्च सूचिता । सूत्रभाष्ययोः शारीरादिति सावधारणं, नतु प्रकृतेरित्यवधारणार्थः । तृतीयार्थे पञ्चमीत्यवधेयम् ।

कुतः ?

सू — ॐ ॥ स्पष्टो ह्येकेषाम् ॥ ॐ ॥ १३ ॥

'अथातः समाश्वासमाश्वाभिधीयन्ते समासमाश्वाथ समानि ब्रह्मणो रूपाणि यैरुत्पत्तिः स्थितिर्लयो नियतिरायतिश्चैकं ह्येवैतद् भवत्यथासमाः ब्रह्मेन्द्रो रुद्रः प्रजापतिर्बृहस्पतिर्ये केच देवा गन्धर्वा मनुष्याः पितरोऽसुरा यत्किञ्चेदं चरमचरं चाथ समासमा प्रकृतिर्वाव समासमा सैषा हि नित्याऽ-

जरा तद्वशा च' इति स्पष्टो हि माध्यन्दिनायनानां समादिवादः ॥ १३ ॥

नन्वस्याः श्रुतेः सामान्यरूपत्वादत्र परमात्मनः शारीरेण साम्यं प्रतिषिध्यते, न प्रकृतेरिति कुत इत्याक्षिपति- **कुत इति** ॥ एतत्परिहाराय सूत्रं पठित्वा व्याचष्टे - **स्पष्ट इति** ॥ 'हि' यतः 'एकेषां' माध्यन्दिनायनानां समादिवादः स्पष्टोऽस्ति, अतो हरेः शारीरेणैव साम्यं प्रतिषिध्यते, न प्रकृतेरिति सूत्रार्थः । 'अथ' अनन्तरं 'अतः' प्रयोजनसत्त्वाद्धरेः प्रसादाद्वा 'समाः' सर्वधर्मैः 'समासमाः' केनचिद् धर्मेण समाः सर्वधर्मैरसमाः चेतना इति शेषः । अभिधीयन्त इत्यनुषज्यते । प्रतिधर्मिप्रदर्शनारम्भेऽथशब्दः । 'ब्रह्मणः' परब्रह्मणः 'रूपाणि' अवतारगानि मत्स्यादीनि समानीत्यन्वयः । 'यैः' रूपैः 'नियतिः' नियमनं नियम्यत्वलक्षकमेतत् । उत्पत्तिस्थितिलयोन्नियतीति समस्तपाठेऽपि 'उन्नियतिः' नियमनं, 'सर्वो द्वन्द्वः' इत्येकवद्भावः । छान्दसो नपुंसकत्वाभावः । 'आयतिः' नियमनसाध्या प्रवृत्तिर्जगतो भवतीति शेषः । उक्तमेवोपपादयति- **एकमिति** ॥ 'हि' यतः 'एतत्' अवतारजातं रूपैः 'एकम्' अभिन्नं भवतीत्यर्थः । 'असमाः' चेतनाः । 'ब्रह्मा' हिरण्यगर्भः 'प्रजापतिः' दक्षः ये केचिदन्ये देवाः 'असुराः' सुरद्विषः इत्येतेऽसमा इत्यन्वयः । यत्किञ्चेदमिति विस्तरः । 'चरं' चेतनम् । 'अचरं' अचेतनम् । समा च साऽसमा च समासमा । पूर्वं बहुवचनोक्तिः रूपबाहुल्यात् । नित्याऽजरेति साम्योपपादकम् । 'तद्वशा' ईश्वरवश्येत्यसाम्योपपादकम् । 'हि' यस्मात् । एकेषामित्यस्यार्थमाह- माध्यन्दिनायनानामिति । समादिवाद इति शेषोक्तिः । वादो वचनं, तथाच समवादोऽसमवादः समासमवादश्चेत्यर्थः । अस्य तस्मादिति शेषेण शारीराद्धि साम्यं प्रतिषिद्ध्यत इति पूर्वसाध्येनान्वयः ।

सू — ॐ ॥ स्मर्यते च ॥ ॐ ॥ १४ ॥

'मत्स्यकूर्मवराहाद्याः समा विष्णोरभेदतः ।
ब्रह्माद्यास्त्वसमाः प्रोक्ताः प्रकृतिश्च समासमा ॥'

इति वाराहे ॥ १४ ॥

न केवलं साम्यश्रुतेर्विशेषश्रुतिबलात् सङ्कोचः, किन्तु विशेषस्मृत्याऽपीत्याह सूत्रकृत्- **स्मर्यते चेति** ॥ अत्र 'साम्यादिरित्यस्याध्याहारं चशब्दस्य श्रुति-समुच्चायकत्वं पूर्वसाध्येनान्वयं चाभिप्रेत्य सूत्राभिमतस्मृत्युदाहरणेन सूत्रं व्याचष्टे- **मत्स्येति** ॥ आद्यशब्देनान्येऽप्याविर्भावा गृह्यन्ते । विष्णोः सर्वधर्मैः समा इत्यत्र हेतुः- **अभेदत इति** ॥ तुर्विशेषार्थः । चस्त्वर्थः । वाराहे पुराणे स्मर्यते चेत्यन्वयः ।

॥ इति समनाधिकरणम् ॥ ६ ॥

॥ ७. पराधिकरणम् ॥

(सर्वे देवाः क्रमात् परमात्मनि विलीयन्ते)

सू — ॐ ॥ तानि परे तथा ह्याह ॥ ॐ ॥ १५ ॥

प्राणद्वारेण सर्वाणि दैवतानि परमात्मनि विलीयन्ते ।

अत्राधिकरणे चतुर्मुखेतरदेवानां परमात्मनि लयः समर्थ्यते । न विरिञ्चेतरदेवानां परमात्मनि लयस्तदप्रतिबिम्बत्वादिति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति- **तानीति** ॥ अत्र तानीत्यनेन 'भूतेषु' इत्यत्र येषां देवानां भूतप्रवेशो निगदितस्तेषां सर्वेषां ग्रहणम् । प्राणद्वारेण लीयन्त इति शेष इत्यभिप्रेत्य सूत्रं व्याचष्टे- **प्राण-द्वारेणेति** ॥ श्रुत्यन्तरोदितद्वारान्तरप्रवेशपूर्वकं भूतवृत्त्या प्राणशब्दवाच्य-विरिञ्चद्वारेणेत्यर्थः । सर्वाणि दैवतानीत्यनेन सम्यग्दर्शी देवभाग एव सङ्गृहीतो वेदितव्यः । तथैव तत्वप्रदीपोक्तेः । अनेन ऋष्यादीनामपि प्राणद्वारा हरिप्रवेश उक्तो भवति । पर इत्यस्यार्थः परमात्मनीति । तथाचेत्थं योजना । सर्वाणि

---

१. साम्यादिमित्य..

दैवतानि परमात्मनि ' विलीयन्ते' प्रविशन्त्येव । नच 'प्रतिबिम्बो हरेः प्राणः प्राणस्यान्याः कलाः क्रमात्' इति वचनसिद्धप्राणप्रतिबिम्बत्वविरोधः । यतः प्राणद्वारेण विलीयन्ते इत्यङ्गीक्रियत इति ।

'सर्वे देवाः प्राणमाविश्य देवे मुक्ता लयं परमे यान्त्यचिन्त्ये, इति कौषारवश्रुतिः ॥ १५ ॥

नन्वत्र प्रमाणाभाव इत्यतः प्रवृत्तं तथा ह्याहेति हेत्वंशं व्याचष्टे - **सर्वे देवा इति ॥** विरिञ्चेतरदेवा इत्यर्थः । 'प्राणं' विरिञ्चदेवमित्यन्वयः । 'मुक्ताः' कर्मणः 'लयं' प्रवेशं, हिशब्दो हेतौ । श्रुतिरित्यनेनाहेत्यस्य कर्ता दर्शितः । सौत्रतथाशब्दस्तु प्राणप्रवेशद्वारा परमात्मप्रवेशपर इति सिद्धत्वान्न व्याख्यातः । श्रुतिरित्यनन्तरं यत इति शेषः । अस्यातो विलीयन्त इति साध्येनान्वयः ।

॥ इति पराधिकरणम् ॥ ७ ॥

॥ ८. अविभागाधिकरणम् ॥

(मुक्ताः भगवदधीनाः भगवदिच्छाऽनुसारेणैव कामयन्ति)

सू — ॐ ॥ अविभागो वचनात् ॥ ॐ ॥ १६ ॥

'एते देवा एतमात्मानमनुविश्य सत्याः सत्यकामाः सत्यसङ्कल्पा यथानिकाममन्तर्बहिः परिचरन्ति' इति गौपवनश्रुतिः । तत् परमेश्वरकामाद्यविभागेनैव तेषां सत्यकामत्वम् ।

अत्राधिकरणे देवादिमुक्तानामीश्वराधीनत्वं समर्थ्यते । मुक्ताः स्वतन्त्रा एव नेशाधीनाः, मुक्तत्वादेव 'एते देवाः' इति श्रुतेश्चेति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति - **अविभाग इति ॥** अत्र मुक्तानां परमात्माधीनत्वात् 'अविभागः' तदधीनत्वमेवेति साध्यवाक्यार्थमभिप्रेत्य तत्र श्रुतिसिद्धसत्यकामत्वादि-

युक्तिविरोधमाशङ्क्य तत्परिहारायाप्यविभाग इत्यंशं व्याचष्टे - **एते देवा इति ॥** श्रुतिरित्यनन्तरं यत् सत्यकामत्वं वक्तीति शेषः । आदिपदेन सङ्कल्पो गृह्यते । तथाचेत्थं योजना । 'एते' इति श्रुतिर्यन्मुक्तानां सत्यकामत्वं वक्ति, तत् तेषां सत्यकामत्वम्, उपलक्षणमेतत् । आदिशब्दस्योत्तरत्रापि सम्बन्धो वा । तथाच सत्यसङ्कल्पत्वं च यतः परमेश्वरकामाद्यविभागेनैव तदभेदेनैव तद्विषयविषयकत्वेनैव अङ्गीक्रियते, न स्वातन्त्र्येणातो न तद्विरोध इत्यतः तेषामविभाग इति । अनेन अविभाग इत्यस्य भगवत्कामादविभागस्तदविरुद्धार्थविषयकत्वं तथा तत्कामितलाभस्येश्वरकामनिमित्तकत्वादविभाग इति द्वेधाऽर्थ उक्तो भवति । 'एते' प्रकृताः सायुज्यं प्राप्ता देवाः 'एतं' हरिमनुप्रविश्य 'सत्याः' नित्याः 'सत्यकामाः' सत्याभीष्टाः 'सत्यसङ्कल्पाः' अबाधितमानसिकसङ्कल्पयुताः 'यथानिकामं' यथेच्छमीश्वरदेहान्तर्बहिः सञ्चरन्तीत्यर्थः ।

'कामेन मे काम आगाद्धृदयाद्धृदयं मृत्योः'
(तै.आ.३.१५.४) इति वचनात् ।

कुतः सत्यकामत्वश्रुतेरन्यानुसारिकामत्वरूपामुख्यार्थत्वकल्पनमित्यतो वचनादित्यंशं व्याचष्टे - **कामेनेति ॥**

'कामेन मे काम आगाद्धृदयाद्धृदयं मृत्योः ।
यदमीषामदः प्रियं तदेतूपमामभि ॥'

इति ऋङ्मन्त्रस्यायमर्थः- 'मृत्योः' संहर्तुः विष्णोः 'कामेन' इच्छया मे 'कामः' कामितं 'आगात्' आगतम् । ईशेच्छानन्तरं प्राप्तत्वात् ततस्तदागतमित्युच्यते । कथमीश्वरेच्छायाः कारणत्वमित्यतो - हृदयाद्धृदयमित्याह। 'हृदयं' ममेच्छा 'हृदयात्' ईशेच्छया भवति । भगवदिच्छानुसारिणीति यावदिति टीकारीत्या परममुक्तवाक्यमेतत् । शेषवाक्यार्थस्तु 'अमीषां' सर्वसंहारकभगवत्प्रमुखदेवानां यत् प्रियं एतन्मां प्रति प्रियमभ्युपैत्विति तत्वप्रदीपेऽभिहितः विष्णुतत्वनिर्णयटीकायां तु मृत्योः 'कामेन' इच्छानुसारेणैव मे काम आगात् । लुङ् लोडर्थे । मुक्तावा-

गच्छतु । मृत्योः 'हृदयात्' हृदयं सङ्कल्पमनुसृत्यैव मे 'हृदयं' सङ्कल्पः आगच्छतु । 'अमीषां' अमुष्य मृत्योर्यददः प्रियं तदेव मामभि आ सम्यगेतु ममापि प्रियं भवत्विति तत्त्वप्रदीपानुसारेण जीवन्मुक्तवचनतया व्याख्यातम् ।

'मुक्तानां सत्यकामत्वं सामर्थ्यं च परस्य तु ।
कामानुकूलकामत्वं नान्यत् तेषां विधीयते ॥'
इति ब्राह्मे ॥ १६ ॥

सत्यकामत्वश्रुतेरमुख्यार्थत्वे स्मृतिमप्याह – **मुक्तानामिति** ॥ तुरव-धारणे । मुक्तानां सत्यकामत्वं सामर्थ्यं चेश्वराधीनमिति शेषः । तत्र सत्यकामत्वं निर्वक्ति - **परस्य त्विति** ॥ 'तुः' एव । 'परस्य' परमात्मनः कामानुकूलकामत्वमेव तेषां सत्यकामत्वं नान्यदित्यर्थः । 'न विधीयते' नोच्यते । ब्राह्मे वचनादित्यनु-वर्तते । अस्य तत्परमेश्वरेत्यनेनान्वयः ॥

॥ इत्यविभागाधिकरणम् ॥ ८ ॥

॥ ९. तदोकोऽधिकरणम् ॥

(मुक्तियोग्यानां मनुष्याणां देहादुत्क्रमणकाले हृदयस्य नाडीस्थप्रकाशद्वारेण निष्क्रमणं भवति)

सू — ॐ ॥ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ ॐ ॥ १७ ॥

उत्क्रान्तिकाले हृदयस्याग्रज्वलनं भवति । 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते' (बृ. ६-४-२) इति श्रुतेः । तत्प्रकाशित-द्वारो निष्क्रामति । विद्यासामर्थ्यात् ।

अत्राधिकरणे प्रतीकालम्बनाप्रतीकालम्बनतदितरमनुष्याणां मुक्त्यर्थं देहोत्क्रमणस्याज्ञानिमरणविलक्षणत्वं समर्थ्यते। ज्ञानिनां देहादुत्क्रमणं पामर-मरणवदेव न विशेषोऽस्तीति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति- **तदिति** ॥ अत्र न ज्ञानिमरणस्याज्ञमरणाविशिष्टतेति साध्याध्याहारमभिप्रेत्य तत्र हेतुतया 'तदोकोऽग्रज्वलनम्' इति सूत्रांशं व्याचष्टे- **उत्क्रान्तिकाल इति** ॥ अर्थ-लब्धोक्तिरियम्। यद्वा- तन्त्रमाश्रित्य तदित्यस्यार्थोक्तिः। तस्मिन्नुत्क्रान्तिकाल इति। अत एव तत्त्वप्रदीपे तदोत्क्रान्तिकाल इति तदर्थोक्तिः। विदुष इति शेषः। तेन तच्छब्दस्य विदुष इति चार्थः। तदोकस इत्यस्य भगवदोकसो हृदयस्येत्यपि तच्छब्दार्थ इत्याशयेन ओकश्शब्दितं स्थानं दर्शयति- **हृदयस्येति** ॥ अग्रे ज्वलनं प्रकाशो भवति। अग्रं प्रकाशत इति फलितार्थः। हृदयस्याग्रज्वलनं भवतीति कुतो ज्ञायत इत्यतस्तच्छब्दसूचितश्रुतेरेवेत्याह- **तस्येति** ॥ 'तस्य' उत्क्रमिष्यतः 'एतस्य' ज्ञानिनो हृदयस्याग्रं प्रकाशते। 'ह' खलु इत्यर्थः। अत्र तस्येति मरणवैशिष्ट्यमात्रपरमिति प्रमेयदीपोक्तिः, अस्यान्यथा वैयर्थ्यापत्तेरिति भावः। 'श्रुतेः' छन्दोगश्रुतेर्वाजसनेयश्रुतेश्चेत्यर्थः। हृदयाग्रप्रवेशनेऽपि ज्ञान्युत्क्रमणस्य को विशेष इत्यतो निष्क्रामतीति पदाध्याहारेण तत्प्रकाशित इत्यंशं व्याचष्टे- **तत्प्रकाशित इति** ॥ तेन प्रकाशेन प्रकाशितनाडीद्वारः सन्नित्यर्थः। 'निष्क्रामति' देहात् ज्ञानी, अतोऽस्ति विशेष इति वाक्यशेषः। ननु ज्ञानिनः प्रारब्धकर्मवतः कथमयं विशेष इत्यतः प्रवृत्तं विद्यासामर्थ्यादित्यंशं व्याचष्टे- **विद्येति** ॥ भगवत्साक्षात्कारसामर्थ्यादित्यर्थः। तथाच प्रारब्धकर्मसद्भावेऽपि ज्ञानिनो ज्ञानसामर्थ्याद् विशिष्टोत्क्रान्तिर्युज्यते। ज्ञानस्य स्वोदयमारभ्यैव फलप्रदत्वादिति भावः।

'यंयं वाऽपि स्मरन् भावं त्यजत्यन्ते कळेवरम्।
तंतमेवैति कौन्तेय सदा तद्भावभावितः॥' (गी. ८-६)
इति स्मृतेर्विद्याशेषगत्यनुस्मरणयोगाच्च।

यदि ज्ञानिनः ज्ञानसामर्थ्यादेवमुत्क्रमणं भवति, तर्हि ज्ञानिनः ज्ञानजन्म-देहवियोगाख्यप्रथममरणमेवैवं किं न स्यादित्यतः– तच्छेषगत्यनुस्मृतियोगा-दित्यंशः प्रवृत्तः, तं व्याचष्टे– **यंयमिति** ॥ हे 'कौन्तेय' अर्जुन 'अन्ते' अन्त्यकाले यंयं वाऽपि 'भावम्' आकृतिविशेषं पदार्थं वा पूर्वकर्मानुवशात् स्मरन् 'कळेबरं' देहं त्यजति पुरुषः सः तं तं तमेव भावम् 'एति' प्राप्नोति । अन्त्यकालस्मरणे उपायमाह- **सदा तद्भावभावित** इति । भावोऽन्तर्गतं मनः तस्मिन्नाकारे पदार्थे वा भावस्तद्भावस्तद्विषयकं मनः तेन भावितोऽतिवासित इत्यर्थः । अत्र भावितत्वं संस्कृतत्वं मनोधर्मस्तेन चात्मोपचर्यत इति ध्येयम् । 'स्मृतेः' गीतास्मृतेः । विद्याशेषेति हेतुगर्भं विशेषणम् । तथाच तस्या विद्यायाः ज्ञानस्य शेषः । फलोपकार्यङ्गं शरीरत्यागकाले यत् स्वहृदयमारभ्य ब्रह्मपर्यन्तगम्यविषयानुस्मरणं तेन योगः साहित्यं तस्मादित्यर्थः । न केवलं विद्यासामर्थ्यादिति चशब्दार्थः । तथाच ज्ञानी न केवलं विद्यासामर्थ्याद् देहान्निष्क्रामति । येनातिप्रसङ्गः, किन्तु गत्यनुस्मृतियोगाच्च । नचैवं सत्युत्क्रमणे ज्ञानस्याहेतुत्वं प्राप्नोति । नचोभयोः साम्यम् । यतो गत्यनुस्मरणं विद्याशेषः । ननु भवेच्छेषः, यदि गत्यनुस्मरणं गतिप्राप्तिकारणं स्यात् । तदेव कुतः ? 'यं यं वापि' इति स्मृतेरेवेति योजना ।

'आचार्यस्तु ते गतिं वक्ता' (छा.४.१४.१) इति हि लिङ्गम् ।

ननु तथापि 'यंयम्' इति सामान्येनोक्तत्वाद् गत्यनुस्मरणं तत्प्राप्तिकारणमित्यर्थे न विशेषप्रमाणमस्तीत्यत आह - **आचार्यस्त्विति** ॥ 'आचार्यः' सत्यकामः । छान्दोग्ये उपकोसलं प्रत्यग्नीनां वाक्यमेतत् । 'इति' एवंरूपं स्मरणार्थं गति-श्रवणोत्तरभावीदं वाक्यमित्यर्थः । यद्वा- एतद्वाक्योक्तं गतिश्रवणमित्यर्थः । वक्तृत्वोक्त्या श्रोतृत्वस्याप्युक्तत्वादिति भावः । 'हि' यतः 'लिङ्गं' गतिस्मरणस्य तत्प्राप्तिसाधनत्वे ज्ञापकमस्तीत्यर्थः । अन्यथा स्मरणार्थं गतिश्रवणं व्यर्थं स्यादिति भावः । लिङ्गमित्यस्यात इति शेषेण गत्यनुस्मृतियोगाच्चेति पूर्वेणान्वयः ।

'हृदिस्थेनैव हरिणा तस्यैवानुग्रहेण तु ।
उत्क्रान्तिर्ब्रह्मरन्ध्रेण तमेवोपासतो भवेत् ॥' इति चाध्यात्मे ॥

इदं चोत्क्रमणं न गत्यनुस्मरणयुक्तेन सामर्थ्येन स्वतन्त्रेण भवति, किं तर्हि ? ज्ञानादिना प्रसन्नस्य भगवतोऽनुग्रहेणैवेति वक्तुं- हार्देत्यंशः प्रवृत्तः । तं तत्पद-सूचितस्मृत्युदाहरणेन व्याचष्टे– हृदिस्थेनेति ॥ सहयोगे तृतीया । तुरवधारणे । उपासत इति बहुष्वेकवचनम् । तथाच हृदिस्थेन हरिणा सहैव तस्यानु-ग्रहेणैवान्त्यकाले तं हरिमेव 'उपासतां' ध्यायतां प्रतीकालम्बनानाम-प्रतीकालम्बनानां च पुंसां 'ब्रह्मरन्ध्रेण' ब्रह्मनाड्योत्क्रान्तिर्भवेदित्यर्थः । यथोक्तं बृहद्भाष्ये –

'विष्णोर्लोकं परं गच्छन् निष्क्रामन् मूर्ध्न एव तु ।
तथैव ब्रह्मणो लोकं सुषुम्नाया विभेदतः ॥' (बृ.भा. ६.४.२) इति ॥

अध्यात्म इति वचनात् हार्दानुगृहीतः शताधिक एवेत्यर्थः । सिद्ध इति वाक्यशेषः । अनेन सूत्रे हृदयस्यायं हार्दस्तेनेति विग्रहः । तथाच हार्देन हृदिस्थेन हरिणा सहैव हार्देनानुगृहीतस्तस्यानुग्रहं प्राप्त एव ज्ञानी देहान्निष्क्रामतीति सूत्रखण्डार्थ उक्तो भवति ।

'शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति' (कठ, २-६-१६) इति च ॥ १७ ॥

प्रकाशितद्वारो निष्क्रामतीत्युक्तम् । तत्र नाड्यां विशेषोक्तिपरं शताधिकयेत्यंशं तत्सूचितश्रुत्युदाहरणेन व्याचष्टे– शतमिति ॥ हृदयस्य नाड्यः तत्सम्बन्धिन्यः नाड्यः 'शतं चैका च' एकोत्तरशतसङ्ख्याका भवन्ति । तासां मध्ये 'एका' नाडी 'मूर्धानमभि' प्रति 'निस्सृता' मूर्धपर्यन्तं गता । 'तया' शतोत्तरया सुषुम्नाख्यनाड्योर्ध्वं गच्छन् पुरुषोऽमृतत्वम् 'एति' प्राप्नोति । तत्रायं विवेकः-

ये प्रतीकालम्बनाः सुषुम्नाप्रभेदात् निष्क्रान्तास्ते 'अमृतत्वं' ब्रह्मलोकं, अन्ये अप्रतीकालम्बनाः 'अमृतत्वं' वैकुण्ठलोकं यान्तीति । 'अन्याः' शतं नाड्यो 'विष्वगुत्क्रमणे' तादर्थ्ये सप्तमी । लोकान्तरगमनार्थं भवन्तीति कठश्रुत्यर्थः । श्रुतिश्चेत्यनन्तरं शताधिकयेत्यर्थे प्रमाणमिति शेषः । न केवलं स्मृतिरिति चार्थः ।

सू — ॐ ॥ रश्म्यनुसारी ॥ ॐ ॥ १८ ॥

निष्क्रामति । 'सहस्रं वा आदित्यस्य रश्मय आसु नाडीष्वाततास्तत्र श्वेतः सुषुम्नो ब्रह्मयानस्सुषुम्नायामातत-स्तत्प्रकाशेनैष निर्गच्छति' इति पौत्रायणश्रुतिः ॥ १८ ॥

ननु यदि प्रकाशितनाडीद्वारो निष्क्रामति तर्ह्यज्ञानिवन्नाड्यन्तस्तमसैव गमनं स्यात् । यद्यन्तरप्यस्ति प्रकाशः, तर्हि द्वारपदवैयर्थ्यमित्याशङ्कां परिहरत् सूत्रं पठित्वा तच्छेषमात्रं पूरयति[1]- **रश्मीति** ॥ ज्ञानी नाड्यन्तराततादित्यरश्म्यनुसारी सन् ईश्वरमनुसृत्य देहान्निष्क्रामतीत्यर्थः । अतो न नाड्यन्तस्तमसोत्क्रामति, न वा द्वारपदवैयर्थ्यमिति वाक्यशेषः । द्वारप्रकाशस्य वैष्णवत्वादस्य च सौरत्वादिति भावः । नाड्यन्तराततसौररश्म्यनुसारेणोत्क्रामतीत्येतत् कुतो ज्ञायत इत्यत आह- **सहस्रमिति** ॥ वैशब्दः प्रसिद्धौ । आसु द्वैराश्येन पञ्चशतभेदभिन्नाः पुनः प्रत्येकं पञ्चशतभेदभिन्नाः सहस्रसङ्ख्याकाः तासु नाडीषु 'आततः' अन्तराश्रिताः सन्ति । 'तत्र' सहस्रसङ्ख्याकेषु रश्मिषु पूर्वोत्तरवर्गेषु मध्ये वर्णतः श्वेतो, नामतः सुषुम्नः कर्मतो 'ब्रह्मयानो' ब्रह्मप्रापको रश्मिविशेषः । शताधिकायां सुषुम्नाख्यायां नाड्यामन्तराततोऽन्योऽस्ति। तत्प्रकाशेन 'एषः' ज्ञानी जीवो देहान्निष्क्रामतीत्यर्थः । श्रुतिरित्यनन्तरमुक्तार्थे प्रमाणमिति शेषः ।

सू — ॐ ॥ निशि नेति चेन्न सम्बन्धात् ॥ ॐ ॥ १९ ॥

---

१. 'पठति' इति पाठान्तरम् ।

रश्म्यभावान्निशि ज्ञानिन उत्क्रमणं न युक्तमिति चेन्न, सर्वदा सम्बन्धाद् रश्मीनाम् ॥ १९ ॥

उक्तमाक्षिप्य समादधत् सूत्रं पठति- **निशीति** ॥ अत्राद्यनञावृत्त्या 'निशि' रात्रौ यतः सूर्यरश्मयो न सन्ति अतः तदा पर्यवसितकर्मणां केषाञ्चित् ज्ञानिनामपेक्षितमुत्क्रमणं न युक्तं, केषाञ्चित् ज्ञानिनामेवं केषाञ्चिदनेवमिति वैलक्षण्यमपि न युक्तमित्याक्षेपांशयोजनामभिप्रेत्य तमंशं व्याचष्टे- **निशीति** ॥ ज्ञानिन इति । परिसमाप्तप्रतिबन्धककर्मणो ज्ञानिन इत्यर्थः । न विलक्षणमपि कस्यचिद् युक्तमित्यपि व्याख्येयमेतत् । परिहारांशं व्याचष्टे- **नेति** ॥ निशि मृतानां ज्ञानिनां बाह्यादित्यरश्म्यभावात् सर्वेषां रश्म्यनुसारेण उत्क्रमणानुपपत्तिर्नेत्यर्थः । कुतो नेत्यतः– **सम्बन्धादिति** ॥ तद् व्याचष्टे- **सर्वदेति** ॥ 'रश्मीनाम्' अन्तस्थादित्यरश्मीनां सर्वदा नाडीसम्बन्धसत्त्वादित्यर्थः। तथाच निशि बाह्यादित्यरश्म्यभावोऽप्रयोजकः । आन्तरादित्यरश्म्यभावस्त्वसिद्ध इति भावः ।

कियत्कालम् ?

सू — ॐ ॥ यावद्देहभावित्वाद् दर्शयति च ॥ ॐ ॥ २० ॥

यावद् देहो विद्यते तावद् रश्मिसम्बन्धोऽस्त्येव ।

ननु नाडीरश्मिसम्बन्धः सर्वदाऽस्तीति कोऽर्थः । किं सदातनः ? किं वा देहपातपूर्वकालीनः ? उत यावद्देहभावी ? नाद्यः, सदा नाडीनामभावात् । न द्वितीयः, कदाचित् ज्ञानिनोऽपि तमसोत्क्रान्तिप्रसङ्गात् । न तृतीयः, यावदेहं तन्नियमे प्रमाणाभावादिति भावेन पृच्छति- **कियदिति** ॥ कियत्कालं रश्मीनां नाडीसम्बन्धोऽस्तीति विपरिणामेनान्वयः । एतत्परिहाराय सूत्रमुपन्यस्यति- **यावदिति** ॥ अत्र सम्बन्धादिति पदं षष्ठ्यन्ततया विपरिणम्य अनुवर्तते । चशब्दो न पूर्वपक्ष्युक्तदोष इति साध्यसमुच्चायक इति भावेन यावद्देहभावित्वादिति

हेतुवाक्यं व्याचष्टे - **यावदिति** ॥ अस्त्येव यत इति शेषः । अस्य अध्याहृतातो नेत्यनेनान्वयः ।

'संसृष्टा वा एते रश्मयश्च नाड्यश्च नैषां वियोगो यावदिदं शरीरमत एतैः पश्यत्येतैरुत्क्रामत्येतैः प्रवर्तते' इति माध्यन्दिनायनश्रुतिः ॥ २० ॥

नन्वत्रापि प्रमाणाभावो दोष उक्त इत्यतः प्रवृत्तं दर्शयति चेत्यंशं व्याचष्टे - **संसृष्टा इति** ॥ 'एते' आदित्यरश्मयः 'संसृष्टाः' सम्बद्धा इत्यर्थः । चावन्योन्यसमुच्चये । 'वियोगो' विभागः 'इदं' प्रमितं स्थूलशरीरं 'एतैः' रश्मिभिः 'पश्यति' नाड्यन्तर्मार्गमिति शेषः । 'एतैः' प्रकाशैः निमित्तभूतैरुत्क्रान्तौ 'प्रवर्तते' प्रयतते ततः एतैरेवोत्क्रामत्युत्क्रान्तिकाले ज्ञानीत्यर्थः । श्रुतिरिति सूत्रशेषोक्तिः। यत इति शेषः । अस्यास्त्येवेति साध्येनान्वयः ।

सू — ॐ ॥ अतश्चायनेऽपि हि दक्षिणे ॥ ॐ ॥ २१ ॥

'दक्षिणे मरणाद् याति स्वर्गं ब्रह्मोत्तरायणे ।
इत्युक्तेऽपि ज्ञानिनो दक्षिणायनोत्क्रान्तिर्युज्यते ।'

ननु व्यर्थोऽयं ज्ञानिनः रात्रौ उत्क्रमणसम्भवप्रतिपादनायासः 'दक्षिणे मरणात्' इति वचनात् मोक्षार्थं ज्ञानिनो दक्षिणायनोत्क्रान्त्ययोगात् । तद्वद् रात्रावप्युत्क्रान्त्यभावोपपत्तेरित्याशङ्कां परिहरत् सूत्रं पठति- **अतश्चेति** ॥ अत्रापिशब्दः स्मृतिसत्त्वेऽपि दक्षिणायनेऽपीति समुच्चये । चशब्दः साध्यसमुच्चये। हिशब्दो हेताविति भावेन अयनेऽपि हि दक्षिणे इति साध्यांशमुत्क्रान्तिर्युज्यत इति पदद्वयाध्याहारेण व्याचष्टे- **दक्षिण इति** ॥ 'उत्तरायणे' मरणाद् ब्रह्म यातीत्यन्वयः। उक्तं वचनं, भावे क्तः । इति स्मृतिसद्भावेऽपि दक्षिणायने उत्क्रान्तिर्युज्यत इत्यर्थः । अस्यातो न स्मृतिबलेन ज्ञानिनो दक्षिणायनोत्क्रान्त्ययोग-दृष्टान्तेन रात्रावपि तदभावो वाच्य इति चशब्दसूचितसाध्येनान्वयः ।

'शतं पञ्चैव सूर्यस्य दक्षिणायनरश्मयः ।
तावन्त एव निर्दिष्टा उत्तरायणरश्मयः ॥

ते सर्वे देहसम्बद्धाः सर्वदा सर्वदेहिनाम् ।
महर्लोकादिगन्तार उत्तरायणरश्मिभिः ॥

निर्गच्छन्तीतरैश्चापि यैरेष्टव्येतरा गतिः ।
उत्तरं दक्षिणमिति त एव तु निगद्यते ॥

नतु कालविशेषोऽस्ति ज्ञानिनां नियमात् फलम् ।
ददाति कालेऽनुगुणे फलं किञ्चद् विशिष्यते ॥
अत्युत्तमानां केषाञ्चिन्न विशेषोऽस्ति कालतः ।'
इति हि नारायणाध्यात्मे ॥ २१ ॥

कुत इत्यतः प्रवृत्तमत इति हेत्वंशं प्रकृतसम्बन्धपरामर्शकतया स्पष्टत्वात् अव्याकृत्य समग्रसूत्रार्थं स्मृत्या विशदयति- **शतमिति** ॥ सूर्यस्य दक्षिणायनरश्मयः 'शतं पञ्चैव' पञ्च शतान्येवेत्यर्थः । 'तावन्त एव' पञ्च शतान्येव ते रश्मयः । उभयेषां प्रयोजनमाह- **महर्लोकादीति** ॥ महर्लोक एव आदिर्येषां ते महर्लोकादयः तान् गन्तारः प्रतीकालम्बनाः । अतद्गुणसंविज्ञानोऽयम् । तेन जनलोकादिगन्तार इति पर्यवस्यति । यथाश्रुते 'आमेरुब्रह्मसदनादाजनान्न जनिर्भुवि' इति गीताभाष्योदाहृतवचनविरोधापत्तेः । अत्र जनलोकमारभ्यैव ततः परतः स्थितेषु जन्माद्यभावोक्तेः । उक्तं हि गीतातात्पर्ये-

'नियमाज्जन्मनोऽभावो मुक्तस्यैव तथापि तु ।
महर्लोकमतीतानां न जन्मांशलयौ विना ॥' इति ॥

अत्र न्यायदीपिका - जन्मपदं मरणस्याप्युपलक्षकम् । अंशलयावित्यंशेन

भूमौ जननं लयान्ते च तदादौ मरणं चास्तीत्यर्थ इति । जनादावल्पजननादि-भावादिति च । तथाचाल्पस्य अविवक्षितत्वात् अपुनरावृत्तित्वं युक्तम् । प्रतीकालम्बनप्राप्यसत्यलोकस्याप्रतीकालम्बनप्राप्यवैकुण्ठाद्यमुक्तस्थानरूपस्य च साक्षान्मोक्षस्य सुषुम्नानामकरश्म्येकसाध्यत्वेन रश्म्यन्तरासाध्यत्वात् महर्लोका-दीत्युक्तम् । नच 'ब्रह्मोत्तरायणे' इत्युक्तिविरोधः । जनलोकादीनामपि अपुन-रावृत्तित्वेन ब्रह्मलोकत्वात् तदेकार्थोपपत्तेः । 'इतरा' महर्लोकादिभ्योऽन्या 'गतिः' स्वर्गादिलोकान्तरप्राप्तिरूपा 'यैः' रश्मिभिः 'एष्टव्या' प्राप्या 'तैरितरैः' दक्षिणायनरश्मिभिः इतरे जनाः गच्छन्तीत्यन्वयः । उत्तरायणदक्षिणायनगत्युक्तेः प्रकृतसङ्गतिमाह– **उत्तरमिति** ॥ 'ते एव' पञ्चशते एव तयोरेकैकमेव । तथाचोत्तरायणरश्मिपञ्चशतमेव 'दक्षिणे मरणात्' इति स्मृतौ 'उत्तरम्' उत्तरायणमिति निगद्यते । दक्षिणायनरश्मिपञ्चशतमेव दक्षिणायनमिति निगद्यत इत्यर्थः, अयं च तत्वप्रदीपोक्तः । अनेन 'ते' इति नपुंसकद्विवचनं षष्ठीद्विवचनत्वेन विपरिणन्तव्यमित्युक्तं भवति । ते रश्मयो निगद्यते निगद्यन्त इतिवा एवकार-व्यावर्त्यमापातप्रतीतार्थं निषेधति– **नत्विति** ॥ स्मृतौ दक्षिणमुत्तरमिति शब्दोक्तः कालविशेषो 'नास्ति' न भवतीत्यर्थः । कुतोऽयमर्थो 'दक्षिणे मरणात्' इति स्मृतेः कल्प्य इत्यत आह- **नत्विति** ॥ उत्क्रमणायेति शेषः । तथाच ज्ञानिना-मुत्क्रमणार्थं कालनियमो नास्तीत्यर्थः । ज्ञानिनामुत्क्रान्तौ कालनियमाभावे कथं भीष्मादीनां उत्तरायणकालप्रतीक्षणमित्यत आह- **कालेऽनुगुण इति** ॥ उत्तरायणशुक्लपक्षादिकाले अनुकूले सति फलं किञ्चिदतिशिष्यत इत्यर्थः । कालेऽनुगुण इत्यत्र अहः पूर्वपक्षादि विवक्षितमिति तत्वप्रदीपोक्तिः । उक्तस्याप-वादमाह - **अतीति** ॥ 'अत्युत्तमानां' भीष्मादेरप्युत्तमानां केषाञ्चित् ज्ञानिनां सर्वकालस्याप्यतिशयितत्वात् न कालविशेषेण अतिशयो भवतीत्यर्थः । नारायणाध्यात्म इति । सूत्रार्थो विशदीकृत इति शेषः ॥

॥ इनि तदोकोऽधिकरणम् ॥ ९ ॥

॥ १०. योग्यधिकरणम् ॥

(ज्ञानयोगिनः ब्रह्मप्राप्तिः कर्मयोगिनः चन्द्रप्राप्तिः गतिस्मरणानुसारेण भवति)

सू— ॐ ॥ योगिनः प्रति स्मर्येते स्मार्ते चैते ॥ ॐ ॥२२॥

न केवलं कालादिकृते ब्रह्मचन्द्रगती स्मर्येते । किन्तु ? ज्ञानयोगिनः कर्मयोगिनश्च ।

'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ॥
धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥'

(गी. ८-२४,२५)

इत्यत्र योगीति विशेषणात् स्मरणनिमित्ते चैते गती ॥

अत्राधिकरणे गत्यनुस्मरणादेरावश्यकत्वं साध्यते । न गत्यर्थं विद्याऽनुस्मृती अपेक्षिते इति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति- **योगिन इति** ॥ अत्र योगिनः प्रति स्मर्येते इति हेतुवाक्यान्वययोग्यं पूर्वपक्षनिषेधरूपं साध्यवाक्यं दर्शयति- **न केवलमिति** ॥ नेत्यावर्तते । केवलं 'कालादिकृते' कालादिमात्रकृते इत्यर्थः । आदिपदेन अग्न्यादिग्रहणं, 'गतिः' प्राप्तिः । ब्रह्मगतिः चन्द्रगतिश्चेति विग्रहः । 'अग्निर्ज्योतिः' इत्यादेरितीत्यन्तस्य स्मर्येते इत्यनेनापि सम्बन्धः । अतस्तदर्थं ते अपेक्षिते इति शेषः । तथाचेत्थं योजना- यतः 'अग्निर्ज्योतिः' इत्यादिना ब्रह्मचन्द्रगती केवलं ज्ञानकर्मरहितकालादिकृते स्मर्येते, अतो न गत्यर्थे मोक्षाय विद्याऽनुस्मृती अपेक्षिते इति नेति । ननु ते यदि न कालादिकृते तर्हि किंहेतुके स्मर्येते इति पृच्छति- **किन्त्विति** ॥ तदुत्तरत्वेन योगिनः प्रति इति हेत्वंशं व्याचष्टे- **ज्ञानेति** ॥ यत इत्यादावुपस्कार्यम् । अस्य प्रति इति

सौत्रपदेनान्वयः। चः समुच्चये। स्मर्येते इत्यनुषज्यते इत्यत्र योगीति विशेषणादित्युपलक्षणम्। ब्रह्मविद इति विशेषणाच्चेत्यपि द्रष्टव्यम्। तथाच यतो ब्रह्मचन्द्रगती ज्ञानयोगिनः कर्मयोगिनश्च प्रति 'स्यर्येते' योगशब्दितविद्याकर्मकृते एव स्मृत्या उच्येते। कुतः 'अग्निः' इत्यत्र योगी, ब्रह्मविद इति विशेषणात्, अतो नैतत्स्मृतिबलेन गत्योः कालादिकृतत्वं मन्तव्यमिति वा। न केवलं कालादिदेवताप्रयाणकृते एते गती स्मर्येते, किन्तु ज्ञानकर्मसहितकालादिकृते एव, ज्ञानकर्मभ्यां विना कालादिदेवताप्रयाणस्यैवाभावादिति योजना। टीकाऽप्येवमेव योज्या। स्मृतावग्न्यादिशब्देन तदभिमानिदेवता गृह्यन्ते। तथा अहःशुक्लपक्षादिशब्दाः न कालवचनाः किन्तु देवतावचनाः। तथाच यत्र मार्गे प्रथममग्न्यभिमानिदेवतालोकः, अथ 'ज्योतिः' अर्चिषो लोकः, ततोऽहर्देवतालोकः, ततः शुक्लपक्षदेवलोकः, ततः 'षण्मासाः' प्रत्येकंप्रत्येकं षण्मासाभिमानिदेवतालोकाः, ततः उत्तरायणाभिमानिदेवलोकाः सन्ति। 'तत्र प्रयाताः' अग्न्यादिदेवतायुतमार्गेण गच्छन्तो 'ब्रह्मविदः' तद्दर्शिनो विष्ण्वाख्यं परब्रह्म 'गच्छन्ति' प्राप्नुवन्ति। ततो न पुनरावर्तन्त इत्यर्थः। तत्र शुक्लपक्षलोकानन्तरं पूर्णिमादेवलोको मासदेवलोकानन्तरं मेषतुलाख्यविष्वभिमानिदेवतालोकश्च ग्राह्यः। तथाचोक्तं गीताभाष्ये-

'देवेनाभिजिता शुक्लपक्षेण च सपूर्णिमा।
विषुवा चायनेनासौ पूजितः केशवं व्रजेत्॥' इति॥

एवं प्रतिज्ञातमार्गद्वये अपुनरावृत्तिमार्गमभिधाय पुनरावृत्तिसाधनमाह- धूम इति॥ यत्रादौ धूमाभिमानिदेवस्य लोकः, तदनुरात्रिदेवस्य, ततः कृष्णपक्षदेवस्य, अथ षण्मासाभिमानिनां लोकाः, तदनु दक्षिणायनदेवलोको वर्तते। 'तत्र' तेन मार्गेण 'योगी' काम्यकर्मी 'चान्द्रमसं' चन्द्रसम्बन्धि ज्योतिः प्राप्य पुनः भूमौ जायत इत्यर्थः। नचैतावता दक्षिणायने मृतस्य ज्ञानिनो ब्रह्मप्राप्त्यभावः शङ्क्यः। 'विद्वान् ब्रह्म समाप्नोति यत्र तत्र मृतोऽपि सन्' इति गीतातात्पर्योदाहृतवचनात् तत्सिद्धेः। यत्र तत्रेत्यस्य अहरादिषु रात्र्यादिषु चेत्यर्थ इति न्यायदीपिकोक्तेः। नन्वस्तु गतौ विद्यापेक्षा, तथापि तदनुस्मृतेरनुपयोग इत्यतः प्रवृत्तं

स्मार्ते इत्यंशं व्याचष्टे- **स्मरणेति** ॥ बहुव्रीहिः । च एव । 'एते' ब्रह्मचन्द्र-गती । अनेन स्मृतेरिमे स्मार्ते तथाचैते गती स्मार्ते गत्यनुस्मृतिसाध्ये एव, न तां विना भवत इति सूत्रखण्डार्थ उक्तो भवति । गती इत्यनन्तरं यत इति शेषः । अस्यातस्तदर्थं गतिस्मृतिरपेक्षितेत्युपस्कृतवाक्येनान्वयः ।

'गत्यनुस्मरणाद् ब्रह्म चन्द्रं वा गच्छति ध्रुवम् ।
अननुस्मरतः काले स्मरणं प्राप्य वै गतिः ॥'

इत्यध्यात्मे ॥ २२ ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते ब्रह्मसूत्रभाष्ये चतुर्थाध्यायस्य द्वितीयः पादः ॥

कुतः स्मार्ते एते ज्ञायेते इत्यतोऽपि प्रयुक्तस्य स्मर्येते इत्यस्य यतः स्मरणनिमित्ते स्मर्येते इत्यन्वयमभिप्रेत्य तां स्मृतिमुदाहरति- **गतीति** ॥ ब्रह्म गच्छति चन्द्रं वा गच्छतीत्यन्वयः । वा विकल्पे । ध्रुवमेव । हन्तैवं ज्ञानिनोऽपि गतिप्रकार-मभावयतो गत्यभावात् समप्रयोजकत्वं ज्ञानस्मृत्योरित्यत आह- **अननुस्मरत इति** ॥ ब्रह्मविदः ज्ञानात् पूर्वं गतिप्रकारमभावयतोऽपि ज्ञानान्तरं ज्ञात-ब्रह्मप्रसादादुत्क्रान्तिकाले स्मरणं प्राप्य गतिर्भवत्येवेति न ज्ञानसाम्यं स्मृतेः, किन्तु ज्ञानस्य प्राधान्यं तच्छेषत्वं स्मृतेरेव । 'काले' उत्क्रान्तिकाले अज्ञानादिनाऽननुस्मरतः कर्मयोगिनोऽपि जन्मान्तरे काले स्मरणं प्राप्यैव गतिर्भवेत् । नच ब्रह्मविदः उत्क्रान्तिकाले बुद्धिमोहो भ्रंशो वा शङ्कनीयः । प्रारब्धकर्मणा प्राप्तक्लेशस्यापि तावत् 'काले स्मरणं प्राप्य वै गतिः' इति वचनादेवेति तत्वप्रदीपोक्तिः । अध्यात्मे ग्रन्थे वचनादिति शेषः । अस्य स्मरणनिमित्ते चैते इति पूर्ववाक्येनान्वयः ।

॥ इति योग्यधिकरणम् ॥ १० ॥

इति श्रीमज्जगन्नाथयतिना कृतायां श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां चतुर्थाध्यायस्य द्वितीयः पादः ॥

॥ अथ तृतीयः पादः ॥

॥ १. अर्चिराद्यधिकरणम् ॥

(ब्रह्मप्राप्तिमार्गः अर्चिरादिः)

मार्गो गम्यं चास्मिन् पाद उच्यते ।

सू — ॐ ॥ अर्चिरादिना तत्प्रथितेः ॥ ॐ ॥ १ ॥

'तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षम्' (छा.५.१०.१) इत्यर्चिषः प्राथम्यं श्रूयते । 'यदा हवै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति (वृ.७.१०.१) इति वायोः ।

एतत्पादार्थं दर्शयति– **मार्गेति** ॥ ब्रह्मप्राप्तौ मार्ग इत्यर्थः । उत्क्रान्तानामिति शेषः, ब्रह्मनाड्या नाड्यन्तरेण चोत्क्रान्तानामिति तदर्थः, नतु ब्रह्मनाड्येत्येव । नाड्यन्तरोत्क्रान्तानां स्वस्वलोकप्राप्तौ मार्गान्तराभावात् । 'गम्यं' प्राप्यं कार्याकार्यब्रह्मरूपं, तेन मार्गेण गतानामिति शेषः । चः समुच्चये । 'अस्मिन्' चतुर्थस्य तृतीये । सङ्गत्यादिजिज्ञासाजननाय सूत्रमेवादौ पठति- **अर्चिरादिनेति** ॥ एतदधिकरणाङ्गसन्देहबीजं श्रुतिविरोधं दर्शयति- **तेऽर्चिषमिति** ॥ ये चेमेऽरण्ये श्रद्धा तप इत्युपासते श्रद्धातपःप्रभृत्यनुतिष्ठन्ति श्रद्धया तपःपदोक्तज्ञानस्वरूपं ब्रह्मोपासते वा ते उत्क्रान्ताः 'अर्चिषं' तन्नामकाग्निपुत्रं 'अभिसम्भवन्ति' प्राप्नुवन्ति 'अहः' तदभिमानिदेवम् 'आपूर्यमाणपक्षं' शुक्लपक्षाभिमानिदेवम् । इतीति । इति छन्दोगश्रुताविति्यर्थः । 'सर्वे वा एते उत्क्रामन्ति तेऽर्चिषमेवाभिसंयन्ति' इति श्रुत्यन्तरसमाख्यात्वद्योतनायाधिकांशोदाहरणम् । यदाऽयं 'पुरुषो' ज्ञानी प्रत्याययतीत्यर्थः । इतीत्यनन्तरं बृहदारण्यकश्रुताविति शेषः । वायोः प्राथम्यं श्रूयत इत्यनुषङ्गः । यत एवं श्रूयतेऽतः संशयः श्रुतिद्वयबलादुभयोरपि मार्गभेदेन प्राथम्यमिति पूर्वपक्षश्च प्राप्त इति वाक्यशेषः ॥

तत्रार्चिषः प्राप्तिरेव प्रथमा ।

सिद्धान्तयत् सूत्रं व्याचष्टे- तत्रेति ॥ ज्ञानिप्राप्यमार्ग इत्यर्थः । नतु वायुप्राप्तिरपीत्येवार्थः । अनेनार्चिरादिनेत्येतत् तात्पर्यतो व्याख्यातं भवति ॥

'द्वावेव मार्गौ प्रथितावर्चिरादिर्विपश्चिताम् ।
धूमादिः कर्मिणां चैव सर्ववेदविनिर्णयात् ॥
अग्निर्ज्योतिरिति द्वेधैवार्चिषः सम्प्रतिष्ठितिः ।
अग्निं गत्वा ज्योतिरेति प्रथमं ब्रह्म संव्रजन् ॥ इति ॥
एकस्मिंस्तु पुरे संस्थो द्विरूपोऽग्नेः सुतो महान् ॥'
इति ब्रह्मतर्के ॥ १ ॥

नन्वेक एव मार्गः अर्चिरादिरेवेत्येतत् कुतः इत्यतः प्रवृत्तस्य तत्प्रथितेरित्यस्य तस्यां स्मृतौ तेषां तस्य मार्गैकत्वस्य अर्चिरादित्वस्य च प्रसिद्धत्वादित्यर्थमुपेत्य तां स्मृतिं दर्शयति- **द्वावेवेति** ॥ अर्चिरादिरिति बहुव्रीहिः । तथाच 'सर्व-वेदविनिर्णयात्' सर्ववेदान्निश्चित्य विचार्य ज्ञानिनामेकः कर्मिणां चापर इति द्वावेव मार्गौ प्रथितौ' प्रसिद्धौ ज्ञानिभिर्निर्णीताविति यावत् । नत्वेकस्वयो वा । 'विपश्चिताम्' उत्क्रान्तज्ञानिनां यो मार्गः सोऽर्चिरादिरेव ज्ञेयः । काम्यकर्मिणां मार्गस्तु धूमादिरेवेति योजना । ननु 'अग्निर्ज्योतिः' इति गीतास्मृतावग्नेः प्राथम्यमुच्यते, तत् कथमत्रार्चिषो ज्योतिश्शब्दितस्य द्वितीयप्राप्यत्वेनोक्तस्य प्राथम्यमुच्यत इत्यत आह- **अग्निरिति** ॥ एकस्याग्निपुत्रस्यार्चिष एवाग्निर्ज्योतिरिति 'द्वेधा' द्विरूपेण 'सम्प्रतिष्ठितिः' सम्यगवस्थानं भवति नार्चिषोऽन्योऽग्निः । तत्र ब्रह्म संव्रजन् ज्ञानी प्रथममग्निमेत्याथ ज्योतिराप्नोति । तथापि पृथक् किं नोच्यते 'तेऽर्चिषम्' इत्यादिश्रुतावित्यत आह - **एकस्मिन्निति** ॥ 'महान्' पूज्यो अर्चिर्नामकोऽग्निर्ज्योतिर्भेदेन 'द्विरूपो' द्विविधोऽपि यत एकस्मिन् पुरे संस्थः, अतः 'तेऽर्चिषम्' इति श्रुतौ पृथक् नोच्यते । यतः प्रथमं द्विविधोऽपि क्रमेण ज्ञानिप्राप्योऽतो नार्चिषः प्राथम्यविरोधः । नन्वग्नेः सोमादनन्तरं प्राप्तिः

'सोमं वैश्वानरम्' इति वचनात्, अतः कथमेतदित्यत आह- **अग्नेः सुत इति ॥** तथाच यतोऽग्नेः सुतोऽतः 'सोमं वैश्वानरम्' इति वक्ष्यमाणविरोधोऽपि न, अस्य प्रधानाग्निपुत्रत्वादिति योजना। ब्रह्मतर्क इत्यस्य प्रथितेरिति सौत्रपदेनान्वयः। सूत्रार्थस्तु - उत्क्रान्तो ज्ञानी ब्रह्म गच्छन्नेकेनैवार्चिरादिना मार्गेण गच्छति, नतु मार्गभेदेन। मार्गस्यार्चिरादित्वमेकत्वं च कुतः सिद्धम् ? 'तत्प्रथितेः' तस्य ज्ञानिमार्गस्यार्चिरादित्वस्यैकत्वस्य च 'सर्वे वा' इति श्रुतौ 'अग्निः' इति स्मृतौ च प्रसिद्धत्वादिति।

॥ इत्यर्चिराद्यधिकरणम् ॥ १ ॥

॥ २. वायुशब्दाधिकरणम् ॥

(अर्चिर्मार्गेण गतस्य वायुलोकः प्राप्य इति निरूपणम्)

सू — ॐ ॥ वायुशब्दादविशेषविशेषाभ्याम् ॥ ॐ ॥ २ ॥

अर्चिषो वायुं गच्छति 'स वायुमागच्छति' (वृ.७-१०-१) इति सामान्यवचनात् ॥

अत्राधिकरणे वायोर्द्वितीयप्राप्यत्वं समर्थ्यते। तत्र 'द्वावेव मार्गौ' इति स्मृतेः समग्रमार्गस्यैकत्वेऽपि अर्चिःपूर्वपक्षयोर्मध्ये मार्गभेदसम्भवात्। 'स वायुमागच्छति, अर्चिषोऽहः' इति श्रुतिद्वयप्रामाण्याद् वाय्वह्नोरुभयोरधिकारिभेदेन द्वितीयप्राप्यत्वमिति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति- **वायुशब्दादिति ॥** सूत्रेऽध्याहार्यप्रतिज्ञां दर्शयति- **अर्चिष इति ॥** अनन्तरमिति शेषः। तथाचैकेनैव मार्गेण ब्रह्म गच्छन् ज्ञानी तस्मिन् मार्गेऽर्चिषोऽनन्तरं वायुमेव गच्छति। नत्वहरित्यर्थः। कुत एतदित्यतोऽत्र हेतुतया प्रवृत्तं सूत्रमविशेषविशेषाभ्यां वायुशब्दात् वायुश्रुतेरित्यन्वयमुपेत्य व्याचष्टे- **स इति ॥** सामान्येत्यविशेषपदव्याख्यानम्। 'वचनात्' बृहदारण्यकश्रुतेः। 'सः' उत्क्रान्तोऽपरोक्षज्ञानी अर्चिर्द्वारा 'वायुं' प्रवहाख्यमागच्छतीति सिद्धान्ते श्रुत्यर्थः। सामान्यश्रुतेः द्वितीयप्राप्यतानिर्पायकत्वं तु न्यायानुगृहीतत्वेन। न्यायस्तु टीकायामेव प्रदर्शितः।

'स इतो गतो द्वितीयां गतिं वायुमागच्छति वायोरहरह्न आपूर्यमाणपक्षम्' इति विशेषवचनाच्च ॥ २ ॥

ननु श्रुतेः सामान्यवचनत्वादेव प्रथमप्राप्यप्रतिपादकत्वं किं न स्यादित्याशंङ्कायां न केवलमेवंन्यायानुगृहीतसामान्यश्रुत्या वायोर्द्वितीय-प्राप्यतासिद्धिः, येनोक्तदोषः स्यात्। अपितु विशेषश्रुतितश्चेतिभावेन प्रवृत्तं विशेषेत्यंशं व्याचष्टे– स इति ॥ 'सः' ज्ञानी 'इतः' शरीरात् 'गतः' उत्क्रान्त इत्यर्थः। यद्वा- 'इतः' अर्चिषो 'गतः' तल्लोकान्निर्गत इत्यर्थः। द्वितीयां गतिमिति सामानाधिकरण्यं, 'गतिं' प्राप्य अहरागच्छतीत्यन्वयः। एवमुत्तरत्रापि। 'विशेषवचनात्' विशेषश्रुतेः। चः सामान्यश्रुतिसमुच्चये। स्पष्टः सूत्रार्थः। अत्र टीकायां पूर्वाधिकरणगुण-सूत्रत्वेनापीदं सूत्रं व्याख्यातं, तस्मिन् पक्षे 'वायुशब्दात्' वायोः द्वितीयप्राप्यत्वश्रुतेः सकाशाद् वायुशब्दस्य वायोः प्राथम्येन प्राप्यत्वश्रुतेः 'अविशेषविशेषाभ्यां' भावप्रधानोऽयं सामान्यविशेषभावाभ्यां निमित्ताभ्यां वायो द्वितीयप्राप्यत्वप्रति-पादकत्वं सम्भवतीति नार्चिःप्राथम्यश्रुतेस्तद्विरोध इति सूत्रार्थः। तदनुसारेण सामान्यवचनत्वाद् विशेषवचनत्वादिति भाष्यार्थश्च द्रष्टव्यः। एवमस्मिन् पक्षे प्रतिज्ञाभाष्यस्यापि सामान्यश्रुतेरर्चिषोऽनन्तरं वायुं गच्छतीत्यर्थ इत्युपस्कारेण व्याख्यानं द्रष्टव्यम्।

॥ इति वायुशब्दाधिकरणम् ॥ २ ॥

॥ ३. तटिदधिकरणम् ॥

(संवत्सराभिमानिलोकप्राप्त्यनन्तरं तटिल्लोकप्राप्तिः तदनन्तरं वरुणलोकप्राप्तिः)

सू — ॐ ॥ तटितोऽधि वरुणः सम्बन्धात् ॥ ॐ ॥ ३ ॥

'मासेभ्यः संवत्सरं संवत्सराद् वरुणलोकं वरुणलोकात् प्रजापतिलोकम्' इति कौण्डिन्यश्रुतिः। 'संवत्सरात् तटित-मागच्छति तटितः प्रजापतिलोकम्' इति च गौपवनश्रुतिः।

अत्राधिकरणे तटिदभिमानिलोकस्य संवत्सराभिमानिलोकानन्तरप्राप्यत्वं समर्थ्यते । तत्र सन्देहबीजं श्रुतिविगानं दर्शयति- **मासेभ्य इति** ॥ यद्यपि छान्दोग्ये 'संवत्सरादादित्यम्' इति आदित्यस्यापि संवत्सरानन्तर्यं श्रुतमस्ति । तथापि अनुक्तित उक्तेर्बलवत्त्वात् कौण्डिन्यगौपवनश्रुतिद्वयबलात् संवत्सरात् पश्चादादित्यात् पूर्वं प्रजापतेः प्राप्यत्वमविचारेणैव सिद्धमिति प्रजापतेः पूर्वं संवत्सरादनन्तरं वरुणतटितो-रुभयोरपि अधिकारिभेदेन प्राप्यत्वम्, उत संवत्सरानन्तर्यं तटित एव, न वरुणस्य, तस्य तु तटिदानन्तर्यमिति विचार्यत इति भावः । श्रुत्योर्मासससंवत्सरतटिच्छब्दास्तत्तद्देवतालोकपराः । प्रजापतिशब्दः प्रजेश्वरपरो दक्षपरो वा बोध्यः । पूर्वश्रुतौ गच्छतीति शेषः । कौण्डिन्यश्रुतिरित्यनन्तरं वरुणस्य संवत्सरादानन्तर्यं वक्तीति, गौपवनश्रुतिरित्यनन्तरं तटितः संवत्सरादानन्तर्यं वक्तीति च शेषः । यत एवं श्रुतिद्वयविरोधः संशयबीजमस्ति अतः संशय इति भावः ।

'तत्र तटितो वरुणं गच्छति । तटिता ह्यूह्यते वरुणलोकस्तटिदुपरि मुक्तामयो राजते तत्रासौ वरुणो राजा सत्यानृते विविञ्चति' इत्युपरिसम्बन्धश्रुतेः ॥ ३ ॥

सिद्धान्तयत् सूत्रं व्याचष्टे- **तत्रेति** ॥ उपरीत्यत्रापि सम्बध्यते । तथाचोत्क्रान्तो ज्ञानी सर्वोऽपि 'तत्र' स्वगम्ये मार्गे संवत्सरानन्तरं तटितमेव गच्छति । तटित उपरि तदनन्तरं वरुणं गच्छतीत्यर्थः । अनेन 'तटितोऽधि' तटित उपरि वरुणः प्राप्यो, नतु ततः प्राक्, इति सौत्रप्रतिज्ञा व्याकृता भवति । कुत एतदवगतमित्यतः सम्बन्धादित्यंशं व्याचष्टे– **तटिता हीति** ॥ 'हि' यस्मात् तटिल्लोकेन 'ऊह्यते' धार्यते वरुणलोकस्तस्मात् तदुपरि तटिदुपरिगते तत्र स्वलोके 'मुक्तामयो' वीतरोगः वरुणो राजते मुक्तामयो मौक्तिकपुरुष इत्यपि केचित् । तटित उपरि मुक्तामयोऽसौ वरुणलोको 'राजते' प्रकाशते । लोकस्य वीतरोगत्वं तत्रत्यवरुणापेक्षयेति वा । 'तत्र' वरुणलोके वरुणो राजा प्रजाकृते सत्यानृते 'विविञ्चति' विवेचयतीत्यर्थः।

उपरिसम्बन्धश्रुतेरिति। तटित इत्यनुवर्तते। अनेन सम्बन्धादित्येतच्छ्रुत्युपलक्षकं, वरुणस्येति विपरिणामेनानुवर्तते। अधीत्यन्तस्य हेतुवाक्येऽप्यन्वयः। तथाच तटितोऽधि वरुणस्य सम्बन्धश्रुतेरिति हेत्वर्थ उक्तो भवति। संवत्सरानन्तरं तटिदुपरि सम्बन्धित्वश्रुतेरित्यपि हेत्वर्थमाहुः।

॥ इति तटिदधिकरणम् ॥ ३ ॥

॥ ४. आतिवाहिकाधिकरणम् ॥

(पूर्वोक्तवायुलोकः आतिवाहिकनामकवायुलोकः)

सू — ॐ ॥ आतिवाहिकस्तल्लिङ्गात् ॥ ॐ ॥ ४ ॥

पूर्वोक्तस्त्वातिवाहिको वायुः। पूर्वगमनलिङ्गात् ॥ ४ ॥

अत्राधिकरणेऽर्चिरनन्तरप्राप्यस्य वायोरातिवाहिकत्वं समर्थ्यते। पूर्वं प्राप्यत्वेनोक्तो वायुर्मुख्य इति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति- **आतिवाहिक इति** ॥ अत्रातिवाहिक इति प्रतिज्ञांशं व्याचष्टे- **पूर्वोक्त इति** ॥ तुशब्दोऽवधारणे। तथाच योऽयं पूर्वप्राप्यतयोक्तो वायुरसौ प्रवहाख्यः 'आतिवाहिकः' अतिशयितं विष्णुं वहतीत्यतिवहो मुख्यवायुस्तस्यायं तत्पुत्रः स एवेत्यर्थः। न मुख्य इत्येवकारार्थः। प्रवहस्य प्राप्यत्वं वायुपुत्रत्वं च -

'प्रवहं वायुपुत्रं च सूर्यसोमौ च विद्युतम्।
प्राप्य प्रधानवायुं च याति तत्परमं पदम् ॥'

इति बृहद्भाष्योदाहृतप्रमाणसिद्धम्। अत एव सूत्रस्य वायुपुत्रत्वज्ञापनार्थमेव प्रवह इत्यल्पाक्षरं पदं विहायातिवाहिक इत्यधिकाक्षरपदप्रयोगः। कुत इत्यतः। प्रवृत्तं तल्लिङ्गादिति हेत्वंशं तच्च तत् लिङ्गं चेति विग्रहाश्रयणेन व्याचष्टे - **पूर्वेति** ॥ गमनं प्राप्तिः। तर्ह्यमुख्यस्यैव भवेन्न मुख्यस्येति भावः।

कुतः ?

सू — ॐ ॥ उभयव्यामोहात् तत्सिद्धेः ॥ ॐ ॥ ५ ॥

'स वायुमागच्छति' (बृ.७.१०.१) इति प्रथममुच्यते । 'उत्क्रान्तो विद्वान् परमभिगच्छन् विद्युतमेवान्तत उपगच्छति द्यौर्वाव विद्युत् तत्पतिं वायुमुपगम्य तेनैव ब्रह्म गच्छति' इत्यन्तेऽपि वायुगमनश्रुतेः । पूर्वोक्त आतिवाहिकः परो वेति व्यामोहे उत्तरे दिवस्पतिरिति विशेषणात् पूर्वत्रातिवाहिकस्यैव सिद्धेः ।

ननु तथाऽपि कथं पूर्वप्राप्यस्य वायोरातिवाहिकत्वसिद्धिः, तथा सति मुख्य-प्राप्त्यभावापातात् । अथैतद्दोषपरिहाराय उत्तरत्रापि कश्चिद् वायुः प्राप्योऽ-स्तीत्युच्यते । तथाऽप्यनिवृत्तः संशयः । किं पूर्वोक्त आतिवाहिको मुख्यो वा ? एवमुत्तरोक्त आतिवाहिको मुख्यो वेति । मुख्यस्यापि प्रथमप्राप्तेरमुख्य-स्याप्युत्तरप्राप्तेश्च सम्भवात् । नचात्र विशेषहेतुरस्ति, येन पूर्वप्राप्यस्यातिवाहि-कत्वसिद्धिरुत्तरप्राप्यस्य च मुख्यत्वसिद्धिरिति भावेनाक्षिपति- **कुत इति** ॥ पूर्वोक्तस्यातिवाहिकत्वसिद्धिरुत्तरोक्तस्य मुख्यत्वसिद्धिश्च कुत इत्यर्थः । प्राप्यत्वलिङ्गस्य सावकाशत्वसम्भवादिति भावः । एतत्परिहाराय सूत्रं पठित्वा-तत्र पञ्चम्याः सप्तम्यर्थत्वं तदित्यस्य बुद्धिस्थपरामर्शित्वं तन्त्रावृत्तिञ्चाभिप्रेत्य व्याचष्टे - **उभयेति** ॥ तुरवधारणेऽपिः समुच्चये । यथेत्यादौ तथेत्यन्ते चोपस्कर्त-व्यम् । वायुगमनमिति बुद्ध्या विविच्य प्रथममित्यत्रापि सम्बध्यते । उत्तर इति पूर्वोत्तरयोरन्वेति उक्तस्येत्युभयत्र शेषः । आतिवाहिकस्येति भावप्रधानम् । मुख्यस्याप्युपलक्षकमेतत् । श्रुतेरित्येतद् व्यामोहे हेतुत्वेनान्वेति। तथाचेत्थं योजना-यथा 'स वायुमागच्छति' इति 'प्रथमं' पूर्वं 'वायुगमनं' 'वायोः प्राप्तिः 'उच्यते' श्रूयते तथा 'अन्तेऽपि' उत्तरत्रापि 'उत्क्रान्तो विद्वान्' इति वायुगमनश्रुतेः ज्ञानिप्राप्यवायुत्वस्य उभयत्र समानत्वात् पूर्वोक्त आतिवाहिकः परो मुख्यो

वा? उत्तरे उत्तरत्रोक्तः परः आतिवाहिको वेति 'व्यामोहे' सन्देहे 'उत्तरे' उत्तरस्मिन् दिवस्पतित्वविशेषणाल्लिङ्गादुत्तरोक्तस्य मुख्यत्वस्यैव सिद्धेः पूर्वोक्तस्यातिवाहिकत्वस्यैव सिद्धेरिति। अस्य पूर्वोक्तस्त्वातिवाहिको वायुरिति पूर्वप्रतिज्ञयाऽन्वयः। केचित्तु- सूत्रे ल्यब्लोपनिमित्ता पञ्चमी व्यामोहं निराकृत्येति। भाष्येऽपि व्यामोह इति प्रथमान्तम्। तस्य नञाऽध्याहृतेनान्वय इत्याहुः। अनेन- 'उभयव्यामोहात्' यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति' 'उत्क्रान्तो विद्वान्' इत्युभयविधवाक्यादुभयत्रादावन्ते च प्राप्ये वायौ प्रत्येकं मुख्यत्वातिवाहिकत्वोभयकोटिकव्यामोहे सन्देहे प्रसक्तेऽपि तस्माद् दिवस्पतित्वविशेषणात् तस्योत्तरोक्तस्य तत्सिद्धेर्मुख्यत्वसिद्धेस्तस्य पूर्वोक्तस्यातिवाहिकत्वसिद्धेश्च पूर्वोक्त आतिवाहिक एवेति सूत्रार्थ उक्तो भवति। श्रुत्यर्थस्तु उत्क्रान्तो ज्ञानी हरिमधिगच्छन् 'अन्ततः' अन्ते विद्युतमेव प्राप्नोति। कथं वरुणावराया विद्युतोऽन्ततो गम्यत्वमित्यतो विद्युत्स्वरूपमाह- द्यौरिति॥ 'द्यौः' भारत्येव 'विद्युत्' तच्छब्दवाच्या तस्याः पतिं वायुं प्राप्य 'तेनैव' तन्मुखेनैव परं ब्रह्म प्राप्नोति, नतु तदनन्तरं प्राप्यान्तरमस्तीति।

ब्रह्मतर्के च —

'उत्क्रान्तस्तु शरीरात् स्वाद् गच्छत्यर्चिषमेव तु।
ततो हि वायोः पुत्रं च योऽसौ नाम्नाऽऽतिवाहिकः॥

ततोऽहः पूर्वपक्षं चाप्युदक् संवत्सरं तथा।
तटितं वरुणं चैव प्रजापं सूर्यमेव च॥

सोमं वैश्वानरं चेन्द्रं ध्रुवं देवीं दिवं तथा।
ततो वायुं परं प्राप्य तेनैति पुरुषोत्तमम्॥' इति॥ ५॥

नन्वस्तूत्तरस्य मुख्यत्वं, तथाऽपि पूर्वोक्तस्यातिवाहिकत्वानिश्चयः। मुख्यस्यैवोभयत्रावस्थानसम्भवादित्याशङ्कां परिहर्तुं सर्वं मार्गं स्मृत्या

दर्शयति- **ब्रह्मतर्के चेति** ॥ चोऽवधारणे । समुच्चये च । सर्वोऽपि मार्ग उक्तः शङ्का च परिहृतेति वाक्यशेषः । स्मृतौ तुशब्दः पूर्वोक्ताद् विशेषमाह । 'स्वाच्छरीरात्' स्वाभिमन्यमानजडदेहादुत्क्रान्तो ज्ञानी प्रथममर्चिषमेव गच्छतीत्यन्वयः । द्वितीयस्तुशब्दोऽर्चिषोऽग्निपुत्रत्वद्विरूपत्वलक्षणविशेषद्योतकः। 'ततः' तदनन्तरं 'हि' प्रसिद्धौ । 'वायोः' मुख्यस्य पुत्रं गच्छतीत्यन्वयः । तस्य नाम स्मारयति- **य इति** ॥ यो नाम्ना आतिवाहिकः प्रवहः प्रसिद्धोऽसौ वायुपुत्रः इह द्वितीयप्राप्यत्वेन विवक्षित इत्यर्थः । 'पूर्वपक्षं' शुक्लपक्षम् 'उदक्' उत्तरायणं 'प्रजापं' दक्षं तत्सञ्ज्ञिकदेवतान्तरं वा । 'सोमं' चन्द्रं 'वैश्वानरं' मूलाग्निं शैंशुमारचक्रप्राप्तेरुपलक्षकमेतत् । 'ध्रुवं' ध्रुवराजं 'देवीं दिवं' भारतीं ततः परं वायुं 'परं' मुख्यं वायुमिति वा । 'तेन' वायुना तद्द्वारा 'पुरुषोत्तमं' हरिम् 'एति' प्राप्नोतीत्यर्थः । एतीत्यन्ते गच्छतीत्यादौ च पर्यायधातुद्वयोपादानं मध्येऽपि सर्वत्र सम्बन्धज्ञापनार्थम् । चापितथाशब्दाः परस्परसमुच्चये । इति ब्रह्मतर्क इत्यन्वयः ।

॥ इत्यातिवाहिकाधिकरणम् ॥ ४ ॥

॥ ५. वैद्युताधिकरणम् ॥

(ब्रह्मप्राप्तिमार्गे मुख्यवायुलोक एव अन्तिमप्राप्यः)

सू — ॐ ॥ वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ॐ ॥ ६ ॥

प्रकारान्तरेण तत्रतत्रोच्यमानत्वाद् वायोरपि परतो ब्रह्मणोऽर्वाग् गन्तव्योऽस्मीति नाशङ्कनीयम् । विद्युत्पतिना वायुनैव 'स एनान् ब्रह्म गमयति' (छा.४-१५-६) इति ब्रह्मगमनश्रुतेः ।

अत्राधिकरणे मुख्यवायोरन्तिमत्वं समर्थ्यते । परब्रह्मणोऽर्वाक् वायोरन्यः प्राप्योऽस्तीति पूर्वपक्षं तन्निषेधरूपं सिद्धान्तं च दर्शयन् सूत्रमुपन्यस्यति- **वैद्युते-**

नेति ॥ तत इत्यस्यार्थमाह - **प्रकारान्तरेण तत्रतत्रोच्यमानत्वादिति** । 'तत्र' श्रुत्यादौ मार्गे 'प्रकारान्तरेण' तारतम्यक्रमं विहाय सोमानन्तरं तदवरस्याग्नेरिन्द्रानन्तरं ध्रुवस्य प्राप्तेः प्रतिपाद्यमानत्वादित्यर्थः । तत इत्यस्यार्थान्तरमाह- **वायोरपि परतः इति** ॥ ऊर्ध्वमित्यर्थः । न केवलमर्चिरादेः परत इत्यपेरर्थः । अपीत्यनेन तथाऽभ्युपगमे बाधकाभावादिति पूर्वपक्षे युक्तिरपि सूचिता । तत इत्यस्यैव पुनरर्थान्तरमाह- **ब्रह्मण इति** ॥ परेत्यादौ ग्राह्यम् । 'अंर्वाक्' अधस्तात् । सूत्रे तत इत्यनन्तरमध्याहार्यं प्रतिज्ञाशेषं दर्शयति- **गन्तव्योऽस्तीति न शङ्कनीयमिति** ॥ प्राप्यः कश्चिद् वर्तत इति नाक्षेप्तव्यमित्यर्थः । किन्तु वायुरेव अन्तिमप्राप्य इति शेषः । यद्वा- विद्युत्पतिना वायुनेत्यत्राप्याकृष्यते । तत्र तृतीया प्रथमार्थे । गन्तव्य इत्यस्ति । अन्तिम इति शेषः । तथाच किन्तु विद्युत्पतिः वायुरेव अन्तिमप्राप्य इति प्रतिज्ञाशेषः सिद्धः । एवं सूत्रेऽपि विपरिणामेन प्रतिज्ञासिद्धिरिति ध्येयम् । कुतो न शङ्कनीयमित्यतो ब्रह्मप्राप्तिरिति पदाध्याहारेण वैद्युतेनेत्यंशं सावधारणं कृत्वा व्याचष्टे- **विद्युदिति** ॥ ब्रह्मगमनमिति बुद्ध्या विविच्य अत्रापि सम्बध्यते । तथा च विद्युत्पतिना वायुनैव 'ब्रह्मगमनं' तत्प्राप्तिर्भवतीत्यर्थः । यत इति शेषः । नतु द्वारान्तरं मध्ये अपेक्षितमित्येवकारार्थः । विद्युत्पतिनेत्यनेन विद्युतो भारत्या अयं वैद्युत इति वृत्तिर्दर्शिता । ब्रह्मप्रापकत्वं वायोः कुत इत्यतः तच्छ्रुतेरित्यंशं व्याचष्टे- **स इति** ॥ वायुनेत्येतत् विपरिणामेनात्राप्यन्वेति । तथाच वायोरेव 'स एनान्' इति ब्रह्मप्रापकत्वश्रुतेरित्यर्थः । अनेन सूत्रे हेत्वंशे वैद्युतेनेत्यस्य पञ्चम्यन्ततया विपरिणामेनान्वयो वा तत इत्यस्य आवृत्त्या अन्वयो वा दर्शितः । 'सः' वायुः 'एनान्' अप्रतीकालम्बनान् परं ब्रह्म प्रतीकांस्तु कार्यं नयतीति छन्दोगश्रुत्यर्थस्तु प्रागेवोक्तः ।

'विद्युत्पतिर्वायुरेव नयेद् ब्रह्म नचापरः ।
कुतोऽन्यस्य भवेच्छक्तिस्तमृते प्राणनायकम् ॥'
इति वृहत्तन्त्रे ॥ ६ ॥

ननु वायोरिव अन्यस्यापि ब्रह्मप्रापकत्वे अन्तिमत्वं सम्भवतीत्यत आह - **विद्युदिति** ॥ 'विद्युत्पतिः' भारतीभर्ता । न श्रीरपि पृथगन्तव्येति भावेन प्रयुक्तस्य एवशब्दस्य व्यावर्त्यमाह- **नचेति** ॥ चोऽवधारणे । साक्षादिति शेषः। तुशब्दार्थो वा । कुतो नेत्यत आह- **कुत इति** ॥ 'प्राणनायकम्' इन्द्रियेश्वरं 'तं' वायुमृते तदन्यस्य जीवस्य 'शक्तिः' ब्रह्मगमयितृत्वसामर्थ्यं 'कुतो भवेत्' न कुतोऽपीत्यर्थः । अत्र विशेषः-

'विश्वाद्या अनिरुद्धाद्याः ते द्विधा सम्प्रकीर्तिताः ।
विष्णुरूपास्तदन्ये च तान् सर्वान् याति मोक्षगः ॥
तदन्ये च दिवस्पुत्राः सर्वे च द्युसमीपगाः ।
ते दिवं प्रापयन्त्येनं स वायुं स हरिं पृथक् ॥
विश्वादिरूपं तुर्यश्च वासुदेवश्च नापरः ।' (भा.ता. ७.१५.५२)

इति सप्तमस्कन्धतात्पर्योक्तोऽनुसन्धेयः । बृहत्तन्त्र इति । उक्तत्वादिति शेषः । अस्य नाशङ्कनीयमित्यनेनान्वयः ।

॥ इति वैद्युताधिकरणम् ॥ ५ ॥

॥ ६. कार्याधिकरणम् ॥

(वायुः व्याप्तोपासकान् परं ब्रह्म नयति, अन्यांस्तु कार्यं ब्रह्म नयति)

सू — ॐ ॥ कार्यं बादरिरस्य गत्युपपत्तेः ॥ ॐ ॥ ७ ॥

'स एनान् ब्रह्म गमयति' (छा.५-१०-२) इति कार्यं ब्रह्म गमयतीति बादरिर्मन्यते ।

अत्राधिकरणे पूर्वं विचारितेनार्चिरादिना मार्गेण गतानामल्पाधिकारिणां देवानां च गम्यं निरूप्यते । वायुरेव ब्रह्म गमयतीति यद्गम्यत्वेनोक्तं ब्रह्म तच्चतुर्मुखाख्यमेवेति पूर्वपक्षं प्रापयत् सूत्रमुपन्यस्यति- **कार्यमिति** ॥ अत्र यावदुपस्कार्यं तावद् दर्शयन् कार्यं बादरिरिति प्रतिज्ञांशं व्याचष्टे- **स इति** ॥

अत्रेति उच्यत इति च शेषः। तथाच 'स एनान् ब्रह्म गमयति' इत्यत्र वाक्ये 'कार्यम्' उत्पत्तिमच्चतुर्मुखाख्यं ब्रह्म स वायुर्गमयतीत्युच्यत इति शुको मन्यते इति योजना।

'ऋते देवान् परं ब्रह्म कः पुमान् प्राप्नुयात् क्वचित् ॥
यद्यपि ब्रह्मदृष्टिः स्याद् ब्रह्मलोकमवाप्नुयात् ॥'
इत्यध्यात्मवचनात् तस्यैव गत्युपपत्तेः ॥ ७ ॥

ब्रह्मशब्दस्य परब्रह्मणि मुख्यत्वात् कथमयमर्थ इत्यतः प्रवृत्तमस्यैव गत्युपपत्तेरित्यंशं पूर्वस्मादेवततश्शब्दयोरनुवृत्त्या व्याचष्टे- **ऋत इति** ॥ वचनादित्यनन्तरं ततः चतुर्मुखमुक्तेरर्वागिति शेषः। तेन तत इत्यस्यार्थद्वयमुक्तं भवति 'तस्यैव' चतुर्मुखस्यैव 'गतेः' प्राप्तेरुक्तत्वादित्यर्थः। नतु परस्येत्येव-शब्दार्थः। अध्यात्मेति ग्रन्थविशेषसञ्ज्ञा। वचनादित्यस्योपपत्तेरवगमादित्यध्या-हारेणान्वयः। अनेनोत्क्रान्तानां परप्राप्त्यनुपपत्तौ देवभिन्नत्वे सति बद्धत्वादिति युक्तिरुक्ता भवति। तथाच युक्तिबलाद् ब्रह्मश्रुतेरमुख्यार्थोऽङ्गीकार्य इति भावः। यद्वा- सूत्रे उपपत्तेरित्यनन्तरं चेत्याकृष्यत इत्याशयेन तदर्थतया वचनादि-त्युक्तम्। तस्य च गतेर्वचनात् स्मृत्युक्तत्वाच्चेत्यर्थ इति ध्येयम्। स्मृत्यर्थस्तु-यद्यपि देवेतरेषां ब्रह्मदृष्टिः स्यात्, तथाऽपि देवान् 'ऋते' विना को वा पुमान् 'क्वचित्' बन्धकाले चतुर्मुखमुक्तिपर्यन्तं परब्रह्म 'प्राप्नुयात्' प्राप्तुं शक्तः स्यात्, न कोऽपि। देवानां साक्षाद् ब्रह्मप्राप्तिश्च देहलयानन्तरं मुक्तिदशायां वा ततः पूर्वं मानुषत्वेन जातानां देवानां उत्क्रान्त्यनन्तरं बन्धदशायामेवेति द्रष्टव्यम्। नच दृष्टिवैयर्थ्यम्। यतः सोऽधिकारी 'ब्रह्मलोकं' चतुर्मुखलोकमवाप्नुयादिति।

सू— ॐ ॥ विशेषितत्वाच्च ॥ ॐ ॥ ८ ॥

'यदि ह वाव परमभिपश्यति प्राप्नोति ब्रह्माणं चतुर्मुखं प्राप्नोति ब्रह्माणं चतुर्मुखम्' इति कौपारवश्रुतौ ॥ ८ ॥

कार्यस्यैव प्राप्तौ न केवलं युक्तिः, नापि स्मृतिः साधिका, किन्तु विशेषश्रुतिरपीत्याह सूत्रकृत् - **विशेषितत्वाच्चेति** ॥ तत्सूत्रं व्याचष्टे - **यदीति** ॥ 'यदि वाव' यद्यपि 'परं' परमात्मानमभिपश्यति, तथाऽपि देवभिन्नो ज्ञानी बन्धकाले चतुर्मुखाख्यमेव ब्रह्म प्राप्नोतीत्यर्थः। प्रमाणबलादन्यज्ञानादन्य-प्राप्तिरुचितेति हशब्दार्थः । द्विरुक्तिस्तात्पर्यार्था। भाष्यस्य सूत्रेणान्वयः । प्राप्यब्रह्मणश्चतुर्मुखत्वेन विशेषितत्वाच्चेति सूत्रार्थः । अस्य हेतोः पूर्व-प्रतिज्ञयाऽन्वयः ।

सू — ॐ ॥ सामीप्यात्तु तद्व्यपदेशः ॥ ॐ ॥ ९ ॥

'ब्रह्मविदाप्नोति परम्' (तै.२-१) इति तद्व्यपदेशस्तु समीपत एव परमपि प्राप्नोतीत्येतदर्थ एव ॥ ९ ॥

ननु कथं परज्ञानिनः कार्यप्राप्तिरुच्यते। 'ब्रह्मविदाप्नोति परम्' इति परप्राप्तेरेव श्रुतत्वादन्यथा तद्विरोधादित्याशङ्कां परिहरत् सूत्रं पठति - **सामीप्यादिति** ॥ अत्र तुशब्दस्य तद्व्यपदेशस्त्वित्यन्वयः। स चासौ व्यपदेशश्चेति विग्रहः हेतौ पञ्चमी चेत्यभिप्रेत्य व्याचष्टे- **ब्रह्मेति** ॥ 'व्यपदेशः' श्रुतिः 'समीपतः 'समीपे कालत इति शेषः । तुशब्दः सामान्यश्रुतित्वरूपविशेषद्योतकः। कार्यप्राप्तेरिति शेषः । ननु दूर इत्येवशब्दार्थः । 'परमपि' परब्रह्मापि न केवलं कार्यमित्यपि-शब्दार्थः । अपीति एवेति च तुशब्दस्यार्थान्तरकथनम् । इतीत्यनन्तरं वक्तीति न विरोध इति वाक्यशेषः । ननु चतुर्मुखप्राप्तिं प्रतिषेधति, नापि परब्रह्मप्राप्तिं ब्रूते इत्येवशब्दार्थः । तथाचेत्थं योजना- यतस्तद्व्यपदेशो 'ब्रह्मविदाप्नोति परम्' इति श्रुतिस्तु 'सामीप्यात्' कार्यपरप्राप्त्योः कालसामीप्यान्निमित्तादेव प्रवृत्ता ज्ञानी कार्यप्राप्तेः समीपकाल एव कार्यं प्राप्याचिरेणैव परमपि प्राप्नोतीत्येतदर्थमेव वक्ति, नतु कार्यप्राप्तिं प्रतिषेधति, अवधारणशून्यत्वात्। नापि प्रथमत एव परप्राप्तिं ब्रूते तच्छब्दाभावादिति यावत्, अतो न तद्विरोधः कार्यप्राप्तिवचनस्येति । सामान्यश्रुतेः 'यदि ह वा' इति विशेषश्रुत्या बाधोपपत्तेरिति भावः ।

कदा ?

सू — ॐ ॥ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥ ॐ ॥ १० ॥

'ते ह ब्रह्माणमभिसम्पद्य यदैतद् विलीयतेऽथ सह ब्रह्मणा परमभिगच्छन्ति' इति सौपर्णश्रुतेर्महाप्रळये तदध्यक्षेण ब्रह्मणा सह गच्छन्ति ॥ १० ॥

ननु समीपत एव परं ब्रह्म प्राप्नोतीति कोऽर्थः । प्रळयादर्वाक् प्रळय एव वा । नाद्यः । प्रथमं परप्राप्तौ बाधकत्वेनोक्तस्य बद्धत्वस्यात्रापि बाधकत्व-साम्यात् । तथात्वे वा प्रथममेव परप्राप्त्युपपत्तेः । न द्वितीयः । विशेषप्रमाणा-भावादिति भावेन पृच्छति- **कदेति** ॥ कस्मिन् काले परं प्राप्नोतीत्यर्थः । तत्परि-हाराय सूत्रमुपन्यस्य व्याचष्टे - **कार्यात्यय इति** ॥ श्रुतेरित्यनेनाभिधानादित्यस्य महाप्रळये इत्यनेन कार्यात्यय इत्यस्य ब्रह्मणेत्यनेन तदध्यक्षेणेति पदस्य चार्थ उक्तो भवति । गच्छतीति शेषोक्तिः । अनेन यतो ज्ञानी 'कार्यात्यये' सकलकार्याणां विनाशरूपप्रळये 'तदध्यक्षेण' तेषां कार्याणां स्वामिना चतुर्मुखेन सह 'अतः' चतुर्मुखात् तद्द्वारा 'परं' सर्वोत्तमं ब्रह्म गच्छतीत्यभ्युपगम्यते । अतो नोक्तविकल्पावकाशः, द्वितीयपक्षाङ्गीकारात् । नच बद्धत्वविरोधः । प्रळये ज्ञानिनां लिङ्गशरीरान्मुक्तत्वेन तदभावादिति भावः । नच तत्प्रमाणाभावः 'अभिधानात्' 'ते ह' इति श्रुतेरिति सूत्रार्थ उक्तो भवति । सूत्रे तदध्यक्षेणेत्युक्तिप्रयोजनं चतुर्मुखस्य कार्यप्रपञ्चाधिकृतत्वात् तद् ब्रह्म जिगमिषूणां तेनैव सह गमनं युक्तम् । न तमतिहायेति युक्तिसूचनमिति तत्वप्रदीपेऽभिहितम् । श्रुत्यर्थस्तु- 'ते' देवेतरज्ञानिनः 'ब्रह्माणं' चतुर्मुखम् 'अभिपद्य' प्राप्य 'यदा' यत्काले एतत्कार्यं विलीयते 'अथ' तदा प्रळयकाले कार्यब्रह्मणा सह परं ब्रह्म 'अभिगच्छन्ति' प्राप्नुवन्तीति ।

सू — ॐ ॥ स्मृतेश्च ॥ ॐ ॥ ११ ॥

'ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे ।
परस्यान्ते परात्मानः प्रविशन्ति परं पदम् ॥' ११ ॥

स्मृत्याऽप्येतमर्थं साधयत् सूत्रं पठित्वा तां स्मृतिमुदाहरति- **स्मृतेश्चेति** ॥ न केवलमभिधानादिति चशब्दार्थः । परे परमात्मनि मनो येषां ते परात्मानः 'सर्वे ते' ज्ञानिनः 'परस्य' ब्रह्मायुषः 'अन्ते' ब्रह्मणां संवत्सरशतानन्तरं 'प्रतिसञ्चरे' प्रळये सम्प्राप्ते सति तदा ''ब्रह्मणा' चतुर्मुखेन सह 'परं पदं' ब्रह्म प्रविशन्तीति स्मृत्यर्थः । इति स्मृतेरित्यन्वयः । स्मृतेरित्यस्य कार्यात्यय इति प्रकृतसाध्येनान्वयः । इति ज्ञायत इति शेषः ।

सू — ॐ ॥ परं जैमिनिर्मुख्यत्वात् ॥ ॐ ॥ १२ ॥

ब्रह्मशब्दस्य तत्रैव मुख्यत्वात् परमेव ब्रह्म गमयतीति जैमिनिर्मन्यते ॥

पूर्वपक्षान्तरं सूचयन् सूत्रमुपन्यस्यति - **परमिति** ॥ अत्र मुख्यत्वादिति हेतुं व्याचष्टे- **ब्रह्मशब्दस्येति** ॥ तत्रैवेति । परब्रह्मण्येवेत्यर्थः । अन्यत्रामुख्यत्वादित्येवशब्दार्थः । परमिति साध्यवाक्यं सोपस्कारं व्याचष्टे- **परमेवेति** ॥ 'स एनान् ब्रह्म गमयति' इति पूर्वभाष्यमिहापि सम्बध्यते । तच्चावर्तते । एवकारो भिन्नक्रमः । अर्थ इत्यध्याहारः । तथाच 'स एनान् ब्रह्म गमयति' इत्यत्र वाक्ये 'सः' वायुरेनान् परं ब्रह्म गमयतीत्येवोच्यते, न कार्यमिति जैमिनिराचार्यो मन्यत इति योजना ।

सू — ॐ ॥ दर्शनाच्च ॥ ॐ ॥ १३ ॥

दृष्टत्वाच्च परब्रह्मणः ॥ १३ ॥

ननु ब्रह्मशब्दस्य परब्रह्मणि मुख्यत्वेऽपि प्रागुक्तोपपत्ति-श्रुतिस्मृतिविरोधात् तद्ग्रहणानुपपत्तेरमुख्यार्थकल्पना युक्तेत्याशङ्कां परिहरत् सूत्रमुपन्यस्यति- **दर्शनाच्चेति** ॥ अत्र परमित्येतत् परस्येति विपरिणामेनानुवर्तते। तेनैवार्थकचशब्दस्यान्वयः । साध्यसमुच्चयेऽपि चशब्द इति भावेन सूत्रं व्याचष्टे- **दृष्टत्वाच्चेति** ॥ चोऽवधारणे । परब्रह्मणश्चेत्यन्वेति। ज्ञानिभिरिति शेषः । अस्य परमेवेति पूर्वेणान्वयः । अनेन ज्ञानिभिः श्रवणादिसाधनैरपरोक्षतया परब्रह्मण एव 'दर्शनात्' ज्ञातत्वादन्यस्यादृष्टत्वाद् वायुस्तान् परं गमयतीत्युपपन्नमिति सूत्रार्थ उक्तो भवति ।

सू — ॐ ॥ नच कार्ये प्रतिपत्त्यभिसन्धिः ॥ ॐ ॥ १४ ॥

नहि कार्ये प्रतिपत्तिः प्राप्नवानीत्यभिसन्धिश्च ॥ १४ ॥

हेत्वन्तरेण परप्राप्तिरेवोपपन्नेत्येतमर्थं प्रतिपादयत् सूत्रमुपन्यस्यति- **नचेति** ॥ अत्र चो यत इत्यर्थे, अवधारणे, तुशब्दार्थे वा । प्रतिपत्तिसहितोऽभिसन्धिरिति विग्रहः । कार्ये इति विषयसप्तमी । तथाच यतो ज्ञानिनां कार्य एव प्रतिपत्तिरभिसन्धिश्च नास्ति । नतु परविषयेऽपि तयोरभावः । परविषय एव प्रतिपत्तिरभिसन्धिश्चास्ति कार्ये तु नास्तीति वा । अतो वायुः परमेव तान् गमयति न कार्यमिति सूत्रयोजनामभिप्रेत्य तद् व्याचष्टे– **न हीति** ॥ 'हि' यतः 'प्रतिपत्तिः' उपास्तिः 'अभिसन्धिः' इच्छा । चः समुच्चये । अस्ति ज्ञानिनामिति शेषः । अस्यातः परमेवेति पूर्वसाध्येनान्वयः ।

'यदुपास्ते पुमान् जीवन् यत् प्राप्तुमभिवाञ्छति ।
यच्च पश्यति तृप्तः सन् तत्प्राप्नोति मृतेरनु ॥'इति हि पाद्मे ॥

सन्तु ज्ञानिनां परविषय एव दर्शनप्रतिपत्त्यभिसन्धयः, तथापि तेषां परप्राप्तिरेव न कार्यप्राप्तिरिति कुत इत्यत आह- **यदिति** ॥ 'जीवन्' देहयुक्तः पुमान् यदुपास्ते उत्क्रान्तिकाले यत् प्राप्तुमभिवाञ्छति 'तृप्तः सन्' तृप्ततया यत् पश्यति

दर्शनसमये परमानन्दमग्नत्वादन्यत्रालम्बुद्धिमान् सन् पश्यति 'मृतेरनु' देहवियोगानन्तरं 'तच्च' तदेव प्राप्नोति नान्यदिति स्मृत्यर्थः। पाद्म इत्यनन्तरं उक्तत्वान्न सौत्रहेतोरप्रयोजकता शङ्क्येति वाक्यशेषः।

सू — ॐ ॥ अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात् तत्क्रतुश्च ॥ ॐ ॥ १५ ॥

अथाधिकारिभेदेनोभयप्राप्तिरिति सिद्धान्तयत् सूत्रमुपन्यस्यति- **अप्रतीकेति** ॥ अत्र परमिति कार्यमिति चानुवर्तते। अन्यानिति शेषः। उभयथा दोषाच्चेत्यन्वयः। चशब्दः सिद्धान्ते दोषाभावसमुच्चायकः। क्रतुशब्दः तद्घटितश्रुतिपरः द्वितीयश्चशब्दो यत इत्यर्थे,

'क्रमानुरागी भगवान् क्रमात् पुम्भिरवाप्यते।
सप्रतीकाश्चतुर्मुखमप्रतीकाः परमिहैते गच्छन्ति ॥'
'प्रतीकं देहः' इत्यादिश्रुतिस्मृतिसूचकश्च।

इतीत्यनन्तरं स इति श्रुतेरर्थ इति शेष इति भावेन सूत्रं व्याचष्टे- **प्रतीकमिति** ॥ 'स एनान् ब्रह्म गमयति' इति पूर्वभाष्यमिहापि सम्बध्यते। प्रथमेतिशब्दात् परोऽर्थशब्दोऽध्याहार्यः। गारुडवचनादित्यस्य आवृत्त्या उभयत्रान्वयः। तथाचेत्थं योजना- 'स एनान् ब्रह्म गमयति' इत्यत्र वाक्ये 'सः' वायुः 'एनान्' अप्रतीकालम्बनान् परं ब्रह्म 'गमयति' नयति। अन्यांस्तु कार्यं नयतीत्युच्यत इति भगवन्मतम्। कुत एतत् ? उभयत्रोक्तदोषात्। सर्वेषां कार्यप्राप्तिरेव, सर्वेषां परप्राप्तिरेवेत्यन्यतरनियमपक्षे गत्यनुपपत्त्यादीनां ब्रह्मशब्दामुख्यत्वादीनां च दोषाणामुक्तत्वात् व्यवस्थयोभयप्राप्तिपक्षे च दोषाभावाच्च। नच पक्षद्वयोक्तदोषापातः; गारुडवचनात्। अप्रतीकालम्बनान् परं नयति, अन्यान् कार्यं नयतीत्यवगमात् प्राप्तेऽर्थे च दोषाणां यथाकथञ्चित् परिहर्तव्यत्वादिति भावः। नच क्रमं विहाय यथेष्टं गमनमस्त्विति वाच्यम्। चशब्दबोधितायाः 'क्रमानुरागी' इति श्रुतेः। नच 'यत् प्राप्तुमभिवाञ्छति तत् प्राप्नोति' इति वचनादैच्छक्येव

प्राप्तिः न क्रमापेक्षेति वाच्यम्। 'स यथाकामो भवति' (बृ. ६.४-५) इति बृहदारण्यकश्रुतेस्तत्सिद्धेः। नचात्र उपासनानुक्तिः, यत उपासनं कर्मपदवाच्यमेव। नच क्रमोऽपि सौकर्यरूप एव, न योग्यतारूप इति वाच्यम्। चशब्दसूचितात् 'प्रतीकं देहः' इत्यादिगारुडवचनात् 'सप्रतीकाश्चतुर्मुखम्' इति वचनाच्च योग्यतारूपत्वेनैव तस्य निश्चितत्वादिति। एवमेव सूत्रयोजनाऽपि द्रष्टव्या।

'प्रतीकं देह उद्दिष्टो येषां तत्रैव दर्शनम्।
नतु व्याप्ततया क्वापि प्रतीकालम्बनास्तु ते॥
अप्रतीका देवतास्तु ऋषीणां शतमेव च।
राज्ञां च शतमुद्दिष्टं गन्धर्वादिशतं तथा॥
एतेऽधिकारिणो व्याप्तदर्शिनोऽन्ये नतु क्वचित्।
अयोग्यदर्शने यत्नाद् भ्रंशः पूर्वस्य चापि तु।
अप्रतीकाश्रया ये हि ते यान्ति परमेव तु॥
स्वदेहे ब्रह्मदृष्ट्यैव गच्छेद् ब्रह्मसलोकताम्॥
ब्रह्मणा सह सम्प्राप्ते संहारे परमं पदम्।'

इति गारुडवचनात् उभयत्रोक्तदोषाच्चाप्रतीकालम्बनान् परं नयति।

'स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत् कर्म कुरुते यत् कर्म कुरुते तदभिसम्पद्यते' (बृ. ६-४-५) इति श्रुतेश्च। अत्र कर्मोपासनमेव। अन्यान् कार्यं नयतीति भगवन्मतम्॥ १५॥

अधिकारिणो द्विविधाः। प्रतीकालम्बनाप्रतीकालम्बनभेदात्। तत्रान्योन्याश्रयदोषपरिहारायाद्यान् लक्षणमुखेन दर्शयति- **प्रतीकमिति**॥ 'देहो' देहादिः प्रतीकमिति 'उद्दिष्टः' अभिहितः। आदिशब्दाच्चक्षुरादीन्द्रियं गृह्यते। तत्र देहादावेव येषां ब्रह्मदर्शनं जायते। नतु 'क्वापि' काले 'व्याप्ततया' सर्वत्र

हरेर्दर्शनमस्ति ते प्रतीकालम्बना इत्युच्यन्ते । तान् दर्शयितुं प्रतिजानीते- **अप्रतीका इति** ॥ अप्रतीकालम्बनास्त्वित्यर्थः । उच्यन्ते इति शेषः । तान् दर्शयति- **देवता इति** ॥ शतं चेत्युभयत्रान्वयः । एवशब्दोऽन्यव्यावर्तकः । चौ समुच्चये । एवं तथेत्यपि । गन्धर्वादि च तदप्सरसां शतं चेति विग्रहः । गन्धर्वेष्वप्यष्टकं ग्राह्यम् । एतेषामप्रतीकत्वे हेतुमाह- **एतेऽधिकारिणो यतो व्याप्तदर्शिन इति** ॥ 'अन्ये' एतद्भिन्ना ऋषयो नरोत्तमाद्याः । क्वचिदपि काले व्याप्तदर्शिनस्तद्योग्या न भवन्तीत्यर्थः । 'तत्रैव' देहादावेव । नतु व्याप्ततयेत्यस्यैव विवरणमेतत् । नन्वयोग्यस्यापि यत्नात् प्राप्तिसम्भव इत्यत आह-**अयोग्येति** ॥ अयोग्यं च तद्दर्शनं चेति कर्मधारायः द्रष्टुमयोग्यस्य दर्शनमिति वा । तादर्थ्ये सप्तमी । 'यत्नात्' श्रवणादिरूपयत्नकरणात् । 'पूर्वस्य' पूर्वोत्पन्नस्यापि दर्शनस्य 'भ्रंशः' तत्फलाभावो भवेदित्यर्थः । अयोग्ययत्नवर्जनस्यापीतिकर्तव्यतारूपत्वात् तदभावे फलाभावादिति । विशेषस्तुशब्दार्थः । उभयेषां फलमाह- **अप्रतीकाश्रया इति** ॥ ये 'अप्रतीकाश्रयाः' व्याप्तविष्णुदर्शनाः 'हि' प्रसिद्धाः ते वैकुण्ठस्थमेव परं यान्ति न कार्यमात्रम् । प्रतीकालम्बनास्तु स्वदेह एव ब्रह्मदृष्ट्या ब्रह्मसलोकतामेव 'गच्छेयुः । प्रळयादर्वाक् परब्रह्मसमानलोकत्वमेव प्राप्नुयुः, नतु वैकुण्ठमित्येवार्थः । परब्रह्मणो वैकुण्ठेतरलोकेष्वप्यवस्थानात् । प्रळयपर्यन्तं चतुर्मुखं प्राप्तास्तदुपदेशेन ज्ञानमुज्ज्वलीकुर्वन्तः वैकुण्ठेतरमहरादिलोकेष्वेवास्ते आसत इति भावः । नच -

'ईयुस्त्रीन् कर्मणा लोकान् ज्ञानेनैव तदुत्तरान् ।
तत्र मुख्याः हरिं यान्ति तदन्ये वायुमेव तु ॥
अपक्का ये न ते यान्ति वायुं वा हरिमेव वा ।
स्थानमात्राश्रितास्तं तु पुनर्जनिविवर्जिताः ॥' (भा.ता. २.२.२४)

इति वचनविरोधः । अत्र 'तत्र' ज्ञानिषु मुख्याः अप्रतीकालम्बनाः हरिं यान्ति, तदन्ये प्रतीकालम्बना वायुम् 'अपक्काः' समाधिपरिपाकरहितास्तु हरिं वायुं वा न यान्तीत्येवं पादयोगिनां प्रथमतो वायुशब्दितचतुर्मुखप्राप्तिनिषेधेऽपि

स्थानपदोक्तमहरादिलोके किञ्चित्कालं साधनमनुष्ठाय वायुद्वारा कालान्तरे चतुर्मुखप्राप्तचङ्गीकारे विरोधाभावादिति भावः। अथ संहारे' सर्वकार्यात्ययरूपे प्रळये प्राप्ते तु ब्रह्मणा चतुर्मुखेन सह 'परमं पदं' ब्रह्म गच्छेयुरित्यर्थः। 'सः' ईश्वरो 'यथाकामो भवति' यदिच्छावान् भवति जीवोऽपि तथाकामो भवति 'तत्क्रतुर्भवति' इत्थं करिष्याम्येवेति निश्चयरूपकामनावान् भवति। स जीवो 'यत्क्रतुः' यन्निष्ठावान् भवति 'तत्' तादृशं तद्विषयमुपासनाख्यं कर्म कुरुते ततश्च 'तदभिसम्पद्यते' तदापरोक्ष्यवान् भवति। अथ तत्प्राप्तिरूपफलं च 'अभिसम्पद्यते' प्राप्नोतीति बृहद्भाष्यदिशा श्रुत्यर्थो ज्ञातव्यः।

सू — ॐ ॥ विशेषं च दर्शयति ॥ ॐ ॥ १६ ॥

'अन्तःप्रकाशा बहिःप्रकाशाः सर्वप्रकाशाः। देवा वाव सर्वप्रकाशा ऋषयोऽन्तःप्रकाशाः मनुष्या एव बहिःप्रकाशाः' इति चतुर्वेदशिखायाम् ॥ १६ ॥

यदुक्तं नेच्छानुसारेण प्राप्तिः, अपितु प्रतीकालम्बनादिक्रमेणैवेति, तन्न, केचिदप्रतीकालम्बनाः केचित् प्रतीकालम्बना इति नियमे प्रमाणाभावेन यथेष्टमप्रतीकालम्बनत्वापादनस्यापि सम्भवादित्याशङ्कां श्रुत्या परिहरत् सूत्रं पठित्वा तां श्रुतिमुदाहरति- **विशेषं चेति** ॥ उच्यत इति शेषः। अन्तर्बहिः सर्वत्रेति क्रमेण विभक्तान् ज्ञानिनः प्राधान्यक्रमेण निर्दिशति- **देवा इति** ॥ प्रतीकालम्बनेतरमनुष्योत्तमास्तु बहिर्दृष्ट्य इत्यर्थः। चतुर्वेदशिखायां श्रुतमिति शेषः। अस्य सूत्रेणान्वयः। सूत्रार्थस्तु -'चो' यतश्चतुर्वेदशिखायां श्रुतम् 'अन्तःप्रकाशाः' इति वाक्यमधिकारिणां 'विशेषम्' अप्रतीकालम्बनत्वादिरूपं 'दर्शयति' प्रतिपादयति अतोऽप्रतीकालम्बनानित्याद्युक्तं युक्तमिति।

॥ इति कार्याधिकरणम् ॥ ६ ॥

॥ इति श्रीमज्जगन्नाथयतिना कृतायां श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां चतुर्थाध्यायस्य तृतीयः पादः ॥

॥ अथ चतुर्थः पादः ॥

॥ १. सम्पद्याधिकरणम् ॥

(जीवः परमात्मानं प्राप्य तम् अविहाय स्वस्वरूपेण
सर्वान् भोगान् अनुभवति)

भोगमाहास्मिन् पादे

सू— ॐ ॥ सम्पद्याविहाय स्वेन शब्दात् ॥ ॐ ॥ १ ॥

'स य एवंविदेवं मन्वान एवं पश्यन्नात्मानमभिसम्पद्यैतेनात्मना यथाकामं सर्वान् कामाननुभवति' इति सौपर्णश्रुतेः। 'परञ्ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते' (छा. ८-३-४) इति च। 'एतं सेतुं तीर्त्वाऽन्धः सन्ननन्धो भवति' (छा.८-४-२) इति च। तत्र तरणं नाम तत्प्राप्तयेऽन्यतरणमेव। 'इमां घोरामशिवां नदीं तीर्त्वैतं सेतुमाप्यैतेनैव सेतुना मोदते प्रमोदत आनन्दीभवति' इति मौद्गल्य श्रुतेः॥ १ ॥

एतत्पादार्थं दर्शयति– **भोगेति** ॥ मुक्तौ सूत्रकार इति शेषः। अत्राधिकरणे मुक्तस्य ब्रह्मानतिक्रमेणैव भोग्यानुभवः साध्यते। तत्र मुक्तौ ब्रह्मातिक्रम्यैव भोगान् भुङ्क्त इति पूर्वपक्षे सिद्धान्तयत् सूत्रं पठति– **सम्पद्येति** ॥ अत्र 'परं जैमिनिः' इत्यतो ब्रह्मार्थकस्य परमित्यस्यानुवृत्तौ अविहायेत्यतः परं भोगान् भुङ्क्त इति शेषे आ विहायेत्यपि पदच्छेदे अन्यथारूपमिति चाध्याहारे स्वेनेत्यतः परं रूपेण अवस्थानादित्युपस्कारे च ज्ञानी परं ब्रह्म सम्पद्य तदविहायैव भोगान् भुङ्क्ते। नचैवंमुक्तत्वमन्यथारूपमाविहाय सम्परित्यज्य स्वेन रूपेणावस्थानादिति सूत्रार्थः सम्पन्न इति भावेन तत्र ब्रह्म प्राप्य अविहाय भोगान् भुङ्क्ते इत्येतत्

कुत इत्यतः सम्पद्येत्यंशेन सूचितां तत्पदघटितां श्रुतिमुदाहरति – **स इति ॥** 'सः' अधिकारी 'एवम्' उक्तप्रकारेण परमात्मानं विजानन् 'एवं मन्वानः' विचारयन् अथ पश्यन् तत आत्मानं 'अभिसम्पद्य' प्राप्य 'एतेन' परमात्मना सह सर्वान् काम्यान् अनुभवतीति श्रुत्यर्थः। ब्रह्मानतिक्रम्याप्याविर्भूतस्वरूपत्वेन भोगो मुक्तानामित्येतत् कुत इत्यत्रापि स्वेनेति सूत्रांशेन सूचितां तत्पदघटितां श्रुतिमुदाहरति– **परमिति ॥** चः समुच्चये। इतीत्यनन्तरं श्रुतिरित्यनुवर्तते। व्याख्यातैषा श्रुतिर्दहरनये। नन्वेवं यदि ब्रह्मानतिक्रमेऽपि स्वरूपेणाविर्भावस्तर्हि 'एतम्' इति श्रुतिविरोध इत्यत आह– **एतमिति ॥** श्रुतिरित्यस्ति। चोऽप्यर्थः। तथाच यद्यपि 'एतम्' इति श्रुतिरस्ति। तथाऽपि नोक्तस्य तद्विरोध इत्यर्थः। कुतो न विरोध इत्यत आह– **तत्रेति ॥** यत इत्यादावुपस्कार्यम्। यद्वा- नामशब्दो हिशब्दार्थे। उच्यत इति शेषः। तथाच 'नाम' यतः 'तत्र' श्रुतौ 'तत्प्राप्तये' परमात्मप्राप्तये 'अन्यतरणं' संसारतरणमेवोच्यते, नतु ब्रह्मतरणमत इत्यन्वयः। खल्वर्थे वा नामशब्दः। अनेन न केवलं परमात्मा, किन्तु तस्मादपहतपाप्मन आत्मनस्तत्प्रसादात् पूर्वं संसृतौ बद्धः सन् अविद्यावृतः सन् यस्तदन्यो जीवः सोऽपि 'एतं सेतुं' जगदाश्रयं हरिं गन्तुमन्यदविद्यादिकं तीर्त्वा 'अनन्धः' अदोषवान् भवतीति छन्दोगश्रुत्यर्थ उक्तो भवति। कुत इत्यत आह- **इमामिति ॥** यत इति शेषः। अस्य तत्रेत्यादिनाऽन्वयः। 'अशिवाम्' अमङ्गलां दुःखकरत्वाद् घोरां भवाख्यनदीं तीर्त्वा 'सेतुं' विश्वाश्रयमेतं परमात्मानं प्राप्यैतेन सेतुनैव सह तमविहायैव 'मोदते' अप्रकृष्टविषयोत्थं सुखमाप्नोति 'प्रमोदते' प्रकृष्टविषयोत्थं सुखमाप्नोति 'आनन्दी' स्वरूपसुखाभिव्यक्तिमान् भवतीति श्रुत्यर्थः। मोदते इत्यादिवाक्यशेषो विषयभोगे प्रमाणत्वेनोक्तः। त्रिगृहीतस्य श्रुतिरित्यस्य सौत्रशब्दपदोक्तेत्यध्याहृतेनान्वयः। नचैवं टीकाविराधः। विशेषाकारस्य सूत्रांशसूचितत्वात्। शब्दादित्यस्यापि सूत्रांशत्वाच्च ॥

॥ इति सम्पद्याधिकरणम् ॥ १ ॥

॥ २. मुक्ताधिकरणम् ॥

(ब्रह्म प्राप्य तदविहायैव मुक्तः भोगभाक् भवति)

सू — ॐ ॥ मुक्तः प्रतिज्ञानात् ॥ ॐ ॥ २ ॥

मुक्त एवचात्रोच्यते। 'अहरहरेनमनुप्रविशत्युपसङ्क्रमे (मते) च न तत्र मोदते न प्रमोदते न कामाननुभवति बद्धो ह्येष तदा भवत्यथ यदैनं मुक्तोऽनुप्रविशति मोदते च प्रमोदते च कामांश्चैवानुभवति' इति वृहच्छ्रुतौ प्रतिज्ञानात् ॥ २ ॥

अत्राधिकरणे ब्रह्म प्राप्य तदविहायैव भोगभोक्तुर्मुक्तत्वं साध्यते। 'स तत्र पर्येति' इति श्रुत्युक्तोऽमुक्त एवेति पूर्वपक्षे सिद्धान्तयत् सूत्रं पठति- **मुक्त इति** ॥ अत्र मुक्त इति प्रतिज्ञांशं सावधारणं कृत्वा व्याचष्टे- **मुक्त इति** ॥ नामुक्त इत्येवकारार्थः। अत्रोच्यत इति शेषोक्तिः। 'अत्र' स्वेनेति गृहीते 'स तत्र पर्येति' इति वाक्य इत्यर्थः। कुत इत्यस्यापीदमेवोत्तरम्। अत्र मुक्त इति सप्तमी। उपपन्नो भोग इति शेषः। तथाच यतो मुक्तजन एवोपपन्नोऽन्यत्रानुपपन्नः स्त्र्यादिदिव्यभोगोऽत्रोच्यतेऽतो मुक्त एवात्रोच्यत इति योजना। ननु ब्रह्म प्राप्य अमुक्तस्याप्यसौ भोग उपपद्यत इत्यस्योत्तरत्वेन प्रतिज्ञानादिति हेतुं व्याचष्टे- **अहरिति** ॥ मुक्त इत्येतत् षष्ठ्यन्ततया विपरिणतमेवशब्दशिरस्कमिहानुवर्तते। तत्र तया तस्येति शेषः। तथाच 'अहरहरेनम्' इति श्रुतौ सुप्तौ परमात्मानं प्राप्तस्याप्यमुक्तस्य दिव्यभोगाभावमुक्त्वा मुक्तस्यैव परमात्मादिप्राप्त्या दिव्य-भोगानुभवप्रतिपादनादित्यर्थः। अत्र तत्वप्रदीपे मुक्तस्य कामानुभवप्रतिज्ञानादिति सौत्रहेतुनैव सिद्धान्तः कृतः। तत्पक्षे वृहच्छ्रुतावुत्तरांशस्य साक्षादुपयोगः। टीकाकृता त्वध्याहृतहेतुना सिद्धान्तः कृतः। तत्पक्षे पूर्वांशस्य साक्षादुपयोग इति ध्येयम्। श्रुत्यर्थस्तु- 'अहरहः'प्रतिदिनम् 'एनं' परमात्मानं 'उपसङ्क्रमे' सुप्तौ प्रविशति जीवः। उपसङ्क्रमत इति पाठे प्राप्नोति च सुप्तौ जीव इत्यर्थः। 'तत्र' सुप्तौ

मोदप्रमोदशब्दार्थः पूर्ववत्। 'कामान्' कामितान् अनुभवति न तानेव भुङ्क्ते 'हि' यतः 'एषः' जीवः 'तदा' सुप्तौ। नचास्य वाक्यस्यैतावन्तं काल-मित्यनुस्मृतिविरोधः शङ्क्यः। सौषुप्तिकेतरदिव्यभोगाभावस्यात्रोक्तेः। 'अथ' देहनाशानन्तरं 'यदा' काले च मुक्तः 'एनम्' ईश्वरमनुप्रविशति तदा मोदते प्रमोदते कामितानेवानुभवति। नेतरान् काम्याननुभवत्येव चेत्यर्थः। चौ परस्पर-समुच्चये। द्विरुक्तिस्तात्पर्यार्था।

॥ इति मुक्ताधिकरणम् ॥

॥ ३. आत्माधिकरणम् ॥

(मुक्तप्राप्यः परंज्योतिः परमात्मैव)

सू — ॐ ॥ आत्मा प्रकरणात् ॥ ॐ ॥ ३ ॥

परञ्ज्योतिःशब्देन परमात्मैवोच्यते तत्प्रकरणत्वात्।

अत्राधिकरणे मुक्तप्राप्यस्य ज्योतिषो ब्रह्मत्वं साध्यते। 'परञ्ज्योतिरुपसम्पद्य' (छां.८-३-४) इति श्रुत्युक्तं ज्योतिरादित्य एव 'स तेजसि सूर्ये सम्पन्नः' (प्रश्नः ५-५) इति श्रुतौ ज्योतिःशब्दपर्यायतेजःशब्दस्य सूर्ये प्रयोगात्, तत्समाख्यानादिति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति- **आत्मेति** ॥ अत्र आत्मेति प्रतिज्ञांशं सावधारणं कृत्वा सोपस्करं व्याचष्टे- **परमिति** ॥ 'सम्पद्य' इति गृहीतवाक्यस्थपरञ्ज्योतिःशब्देनेत्यर्थः। यद्यपि पूर्वपक्षिणा परञ्ज्योतिरिति भिन्नपदत्वाभिप्रायेण ज्योतिःशब्द एवान्यपरतयाऽऽक्षिप्तः। तथाऽपि वस्तुतः 'परञ्ज्योतिः परम्ब्रह्म' इति स्मृतिपर्यालोचनया परञ्ज्योतिरित्यस्यैकपदत्वात् तस्यैवानुवादः कृतः। कुत इत्यतः प्रकरणादित्यंशं तच्छब्दान्वयेन व्याचष्टे– **तदिति** ॥ अस्येत्यादावुपस्कार्यम्। तथाच 'अस्य' परञ्ज्योतिःशब्दस्य 'तत्प्रकरणत्वात्' परमात्मप्रकरणपठितत्वादित्यर्थः। य आत्मा अपहतपाप्मा' इति परमात्मन एवात्र उपक्रम्याधीतत्वेनैतद्वाक्यजातस्य तत्प्रकरणत्वात् समाख्यायाश्च प्रकरणाद् दुर्बलत्वादिति भावः।

'परञ्ज्योतिः परम्ब्रह्म परमात्मादिका गिरः ।
सर्वत्र हरिमेवैकं ब्रूयुर्नान्यं कथञ्चन ॥'
इति च ब्रह्माण्डे ॥ ३ ॥

नन्वस्य परमात्मप्रकरणत्वेऽपि सावित्रप्रकरणे 'ह्वयाम्यग्निम्' (ऋ.१.३५.१) इत्यन्यपरोक्तिवत् प्रसङ्गादादित्योक्तिः किं न स्यादित्यत आह- **परञ्ज्योतिरिति** ॥ परञ्ज्योतिरित्येकं पदम् । एवं परम्ब्रह्मेत्यपि । आदिपदेन परमक्षरमित्यादिकं गृह्यते । 'गिरो' वाचः । 'सर्वत्र' सर्वागमेषु स्थिताः 'एकं' मुख्यं वाच्यम् । एवेत्यस्य विवरणं- **नान्यमिति** ॥ 'कथञ्चन' केनापि निमित्तेन । ब्रह्माण्ड इत्यनन्तरं उक्तत्वाच्चेति शेषः । अस्य परञ्ज्योतिःशब्देन इत्यादिनान्वयः।

॥ इत्यात्माधिकरणम् ॥ ३ ॥

॥ ४. अविभागाधिकरणम् ॥

(परमात्मनि प्रविष्टः जीवः परमात्मभुक्तभोगानेव अनुभवति)

सू — ॐ ॥ अविभागेन दृष्टत्वात् ॥ ॐ ॥ ४ ॥

ये भोगाः परमात्मना भुज्यन्ते त एव मुक्तैर्भुज्यन्ते । 'यानेवाहं शृणोमि यान् पश्यामि यान् जिघ्रामि तानेवैत इदं शरीरं विमुच्यानुभवन्ति' इति दृष्टत्वाच्चतुर्वेदशिखायाम् ।

अत्राधिकरणे सायुज्यभाजां भगवद्भुक्तभोगभोक्तृत्वं समर्थ्यते । तत्र मुक्तभोगाः परमात्मनाऽभुक्ता अपि सन्ति न तद्भुक्ता एवेति नियमः । तथा सति केषाञ्चित् संजातभोगेच्छानामपि मुक्तानां भोगाभावप्रसङ्गात् । ईश्वरस्य नित्यपूर्णानन्दत्वेन कदाचिदभोगस्यापि सम्भवात् । ततश्च मोक्षस्यापुरुषार्थत्वापत्तिरिति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति- **अविभागेनेति** ॥ अत्र सायुज्यभाजां भोगाः 'अविभागेनैव' केचित् परमात्मना भुक्ताः केचित् तदभुक्ता इति विभागमन्तरेणैव सन्ति । ये भोगाः परमात्मना भुज्यन्ते त एव मुक्तैः भुज्यन्ते न तदभुक्ता इति

यावत्। कुतः ? तथा दृष्टत्वात्' तथा श्रुतेरिति योजनामभिप्रेत्य अविभागेनेति प्रतिज्ञांशं व्याचष्टे- य इति ॥ 'भोगाः' स्वरूपसुखविशेषव्यक्तिहेतुविषयदर्शन-विषयाः, नतु तदभुक्ता इत्येवशब्दार्थः। 'मुक्तैः' सायुज्यभाग्भिः। दृष्टत्वादिति हेत्वंशं व्याचष्टे-यानेवेति ॥ अहमिति परमात्मोच्यते। 'एते' मुक्ताः 'इदं शरीरं' कर्मारब्धजडशरीरम्। चतुर्वेदशिखायामिति। 'दृष्टत्वात्' श्रवणादित्यन्वयः।

भविष्यत्पुराणे च -

'मुक्ताः प्राप्य परं विष्णुं तद्भोगान् लेशतः क्वचित्।
बहिष्ठान् भुञ्जते नित्यं नानन्दादीन् कथञ्चन ॥'इति ॥४॥

ननु भगवद्भुक्ताः अशेषभोगाः मुक्तैर्भुज्यन्ते ? किं वा केचित्। आद्ये मुक्तपरमात्मनोः साम्यापातः। न द्वितीयः, 'यानेव' इति सामान्यतः सर्व-भोगश्रवणादित्यत आह - भविष्यदिति ॥ इति भविष्यत्पुराणे उक्तत्वाच्चेति योजना। 'तद्भोगान्' तेनेश्वरेण भोग्यान् विषयान् 'बहिष्ठान्' ईश्वरदेहाद् बहिस्थितान् अस्वरूपभूतान्। परमेश्वरस्वरूपानन्दादिव्यावृत्त्यर्थमेतत्। अत एवाह- नेति ॥ बाह्यनामपि न सर्वेषां भोगः, लक्ष्म्यात्मकानामभोगादत उक्तम्- क्वचिदिति ॥ प्राकृतानामपि न सर्वात्मना भोगः, परमात्मेन्द्रियविषय-रसादीनामभोगादतो- लेशत इति ॥ काञ्श्चिदित्यर्थः। बहिष्ठानेव नत्वन्तः-पुरस्थानिति तत्वप्रदीपोक्तिः। 'कथञ्चन' सामस्त्येन वा लेशतो वेत्यर्थः। तथाच द्वितीयपक्षमाश्रित्य विशेषश्रुत्या सामान्यश्रुतेः सङ्कोचः कार्य इति भावः ॥

॥ इत्यविभागाधिकरणम् ॥ ४ ॥

॥ ५. ब्राह्माधिकरणम् ॥

(परमात्मनि प्रविष्टः सायुज्ययोग्यमुक्तजीवः स्वस्वरूपदेहेन परमात्मदेहेनापि भोगाननुभवति)

सू — ॐ ॥ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ॐ ॥ ५ ॥

सर्वदेहपरित्यागेन मुक्ताः सन्तो ब्राह्मेणैव देहेन भोगान् भुञ्जत इति जैमिनिर्मन्यते ।

अत्राधिकरणे ब्रह्मप्राप्तस्य सायुज्यमुक्तस्य भोगः समर्थ्यते तत्र मुक्तस्य देहभावे मुक्तत्वायोगात् तदभावे च भोगाभावप्राप्तेर्न तस्य भोगो युज्यत इति प्राप्ते सिद्धान्तयत् सूत्रमुपन्यस्यति - **ब्राह्मेणेति** ॥ अत्र पूर्वसूत्रान्नञ्विनिर्मुक्तस्य विभागेनेति पदस्य अनुवृत्तिमभिप्रेत्य तदर्थमाह- **सर्वदेहेति** ॥ सर्वशब्दः चिदतिरिक्तपरः । तथाच स्थूलदेहस्य सूक्ष्मलिङ्गदेहस्य च परित्यागेनेत्यर्थः । उक्तं हि तत्वप्रदीपे सर्वदेह-परित्यागेनेति स्थूलसूक्ष्मविवक्षयोच्यते, नतु चिन्मात्रदेहविवक्षयाऽपि, श्रुतौ मर्त्यमिति विशेषणात्, 'अतिसृज्य ब्रह्माभिसम्पद्य' इति चोक्तेश्च । भावमित्युभय-देहाङ्गीकारिणो जैमिनेश्चिन्निषेधायोगाच्च । 'इदं शरीरं मर्त्यमतिसृज्य' इति श्रुत्युक्तेः स्थूलशरीरमेवातिसृज्येति शङ्का मा भूदिति सर्वदेहपरित्यागेनेत्युक्तम् । सूक्ष्म-देहस्यापि साक्षिसिद्धत्वादिदंत्वम्, प्रळयेऽपचयान्मुक्तौ विनाशाच्च मर्त्यत्व-मिति । सूत्रेऽध्याहार्यांशमाह - **मुक्ता इति** ॥ एतच्चावर्तते । विशेषणत्वख्यापनाय[1]-**सन्त इत्युक्तम्** ॥ यत इति शेषः । सूत्रे सावधारणत्वाभिप्रायेण ब्राह्मेणे-त्युक्तमित्याशयेन तद्विशेष्यपदप्रदर्शनपूर्वकं व्याचष्टे- **ब्राह्मेणेति** ॥ परब्रह्म-सम्बन्धिनेत्यर्थः। ब्राह्मातिरिक्तस्थूलसूक्ष्मशरीराभाव एवकारार्थः । तत्वप्रदीपे तु ब्राह्मेणैवेत्ययोगव्यवच्छेदः । नच ब्राह्मेण देहेन विना भोगोऽस्तीति, यतो ब्राह्मेण देहेन भोगान् भुञ्जते अतो न भोगानुपपत्तिरिति हेत्वर्थो वा इत्युक्तम् । अप्यर्थ-श्चैवकारः । भोगान् भुञ्जते मन्यत इति च सूत्रशेषोक्तिः । तथाचेत्थं योजना-मुक्ताः भोगान् भुञ्जते एव, न तेषां भोगोऽयुक्त इति यावत् । नचोक्तविकल्पः । यतो 'ब्राह्मेणैव देहेन सन्तः' तदतिरिक्तदेहरहिता इत्यभ्युपगम्यते । कुतो देहा-भावः ? यतः सर्वदेहपरित्यागेन मुक्ताः । अभेदे तृतीया । सर्वदेहपरित्याग-रूपमुक्तियुक्ता इति । नच देहाभावे भोगायोगः । यतः स्वदेहाभावेऽपि ब्राह्मेणैव ग्रहवद् भोगान् भुञ्जते अत इति जैमिनिराचार्यो मन्यत इति ।

---

१. '...स्थापनाय' इति पाठान्तरम् ।

'स वा एष ब्रह्मनिष्ठ इदं शरीरं मर्त्यमतिसृज्य ब्रह्माभिसम्पद्य ब्रह्मणा पश्यति ब्रह्मणा शृणोति ब्रह्मणैवेदं सर्वमनुभवति' इति माध्यन्दिनायनश्रुतावुपन्यासात् ।

कुत एतदित्यतः उपन्यासादिति हेतुं तत्पदसूचितश्रुत्युदाहरणपूर्वकं व्याचष्टे- **स इति ॥** 'उपन्यासात्' उक्तत्वादित्यर्थः । श्रुत्यर्थस्तु 'स एष ब्रह्मनिष्ठो' ब्रह्मज्ञानी 'मर्त्यं' विनाश्यम् 'इदं' प्रत्यक्षसिद्धं स्थूलसूक्ष्माख्यं देहम् 'अतिसृज्य' विसृज्य परं ब्रह्म प्राप्य परब्रह्मणा तद्देहेन पश्यति शृणोति च इदं सर्वं भोग्यमनुभवति ब्रह्मणेति ।

'आदत्ते हरिहस्तेन हरिदृष्ट्यैव पश्यति ।
गच्छेच्च हरि (पादेन) पादाभ्यां मुक्तस्यैषा स्थितिर्भवेत् ॥'
इति स्मृतेः ॥

नन्वत्र मुक्तभोगो ब्रह्मणा श्रूयते, न पुनस्तद्देहेनेति श्रुतौ ब्रह्मणेत्यस्य तत्प्रसादादित्यप्यर्थसम्भवादित्यत उपन्यासादित्येतच्छ्रुत्यन्तरसूचकतया व्याचष्टे- **आदत्ते इति ॥** 'हरिदृष्ट्या' विष्णुचक्षुषा ।

'गच्छामि विष्णुपादाभ्यां विष्णुदृष्ट्या च दर्शनम् ।
इत्यादिपूर्वस्मरणान्मुक्तस्यैतद् भविष्यति ॥'
इति बृहत्तन्त्रोक्तयुक्तेश्च ॥ ५ ॥

ननु स्वयं देहविधुरस्य कथमन्यदेहेन भोगो युज्यते प्रळयादावभावादित्यतः सौत्रादिशब्दगृहीतां युक्तिमसिद्धिवारणाय स्मृत्यैव दर्शयति– **गच्छामीति ॥** मुक्ताविति शेषः । तथाचाहं मुक्तौ विष्णुपदाभ्यां गच्छामि गमिष्यामि 'विष्णुदृष्ट्या' तच्चक्षुषा तु तेनैव मे दर्शनं भविष्यतीत्याद्युपासनानुसारेण पूर्वस्मिन् संसारकाले स्मरणरूपोपासनात् मुक्तस्य सायुज्यमुक्तियोग्यस्य 'एतत्' अन्यदेहेन भोजनं मुक्तौ भविष्यतीत्यर्थः । यद्वा– मुक्तेः पूर्वं संसारदशायामहं स्वदेहस्थविष्णुपादाभ्यां

गच्छामि तत्रस्थविष्णुदृष्टश्चैव दर्शनं करोमीत्यादिस्मरणरूपोपासनादित्यर्थः। अनेन पूर्वस्मिन् संसारे स्वदेहगतविष्णुपदाभ्यामहं गच्छामीत्युपास्तिसद्भावादिति युक्तिरुक्ता भवति। पञ्चम्यन्तानां ब्राह्मेणेति प्रतिज्ञावाक्येनान्वयः।

सू — ॐ ॥ चितिमात्रेण तदात्मकत्वादि-
त्यौडुलोमिः ॥ ॐ ॥ ६ ॥

चितिमात्रो देहो मुक्तानां पृथग् विद्यते तेन भुञ्जते। 'सर्वं वा एतदचित् परित्यज्य चिन्मात्र एवैष भवति चिन्मात्र एवावतिष्ठते तामेतां मुक्तिरित्याचक्षते' इत्युद्दालकश्रुते-श्चिदात्मकत्वादित्यौडुलोमिर्मन्यते ॥ ६ ॥

एवं देहाभावमभ्युपगम्य भोगं मुक्तस्य समर्थ्य देहसद्भावमप्यभ्युपगम्य तत् समर्थयत् सूत्रमुपन्यस्यति - **चितीति** ॥ अत्र मुक्ता भुञ्जते पृथग् विद्यत इति च शेषः। तदिति व्यस्तं समस्तं च। तत्र व्यस्तमावर्तते। चितिमात्रेणेति हेतु-गर्भम्। तथाच मुक्ताः भुञ्जते एव तेषां भोगो युक्त एवेति यावत्। नच पृथग्देहा-भावादयुक्तता। यतस्तेषां मुक्तानां तच्छरीरं तस्माद् ब्रह्मदेहात् पृथग् विद्यते। नचैवं पुनस्संसारापत्त्या मुक्तत्वायोगः। यतस्ते 'चितिमात्रेण' शरीरेण भुञ्जते। यतस्तच्छरीरं केवलं चैतन्यस्वरूपमिति यावत्। नचाप्रयोजकता 'तदात्मकत्वात्' तेषां मुक्तानां चिदात्मकत्वात् तस्य चितिमात्रशरीरस्य च मुक्तस्वरूपत्वात् स्वरूपस्य चाकृतिमत्त्वेन संसारानापादकत्वादिति भावः। मुक्तानां चिदात्मकत्व-मेव कुतः ? 'तत्' तस्माच्छ्रुतिवाक्यादेवेत्यौडुलोमिराचार्यो मन्यत इति योजनामभिप्रेत्य सूत्रं व्याचष्टे- **चितीति** ॥ 'पृथक्' ब्रह्मदेहात्। 'तेन' देहेन भुञ्जते मुक्ता इति विपरिणतमनुवर्तते। 'चिदात्मकत्वात्' चिन्मात्रत्वादिति। अत्र मुक्तानामित्यनुषज्यते। तथाच मुक्तानां चितिमात्रत्वात् तेषां देहश्चितिमात्रः, यत एवमतः सर्वदेहपरित्यागेन मुक्ता इति योजना। श्रुत्यर्थस्तु 'एतत्' प्रत्यक्षसिद्धं

सर्वम् 'अचित्' जडात्मकं स्थूलसूक्ष्मशरीरं परित्यज्यैष जीवश्चिन्मात्र एव भवति तथा व्यज्यते। व्यक्तस्य चिन्मात्रत्वस्य पुनर्नापगम इत्याह- **चिन्मात्र एवावतिष्ठत इति** ॥ एष इत्यनुषज्यते। 'तामेतां' दशां मुक्तिरित्याचक्षते विद्वांस इति।

सू — ॐ ॥ एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥ ॐ ॥ ७ ॥

'स वा एष एतस्मान्मर्त्याद् विमुक्तश्चिन्मात्रीभवत्यथ तेनैव रूपेणाभिपश्यत्यभिशृणोत्यभिमनुतेऽभिविजानाति तामाहुर्मुक्तिः' इति सौपर्णश्रुतौ चिन्मात्रेणाप्युपन्यासाज्जैमिन्युक्तस्य च भावादुभयत्राप्यविरोधं बादरायणो मन्यते।

ननु न सूत्रद्वयोक्तपरिहारौ युक्तौ, देहभावाभावयोर्विरुद्धत्वादित्याशङ्कापरिहारकं सूत्रमुपन्यस्यति- **एवमपीति** ॥ अत्रैवंशब्द औडुलोम्युक्तचिन्मात्रदेहसाध्यभोगपरामर्शक आवर्तते। अपिः मुनिद्वयोक्तप्रकारद्वयसमुच्चये श्रुतिसमुच्चये च। तथाच बादरायणाचार्य उभयोर्मतयोरविरोधं मन्यते। कुतः ? 'एवम्' औडुलोमिनोक्तस्य चिन्मात्रेण भोगस्य प्रमाणेषु भावात् प्रामाणिकत्वादिति यावत्, तथा 'पूर्वभावात्' पूर्वस्य ब्राह्मेणैव भोग इति जैमिन्युक्तस्यापि प्रमाणेषु भावात् प्रामाणिके च विरोधाभावादिति भावः। नचौडुलोमिमते प्रमाणाभावः। 'सर्वं वा' इति श्रुतौ मुक्तस्य चिच्छरीरमात्रोक्तावपि तस्य भोगकारणत्वानुक्तेरिति वाच्यम्। 'एवमप्युपन्यासात्' 'स वा एषः' इति सौपर्णश्रुतौ औडुलोम्युक्तचिच्छरीरभोगस्याप्युपन्यासात् प्रतिपादनात्। न केवलं माध्यन्दिनायनश्रुतौ जैमिन्युक्तस्योपन्यास इत्यपेरर्थ इति सूत्रार्थमुपन्यासपदसूचितश्रुत्युदाहरणपूर्वकमाह– **स वा इति** ॥ भोगस्येत्युभयत्र शेषः। न केवलं ब्राह्मेण भोगस्येत्यपेरर्थः श्रुत्युपन्यस्तत्वमात्रे समुच्चयः। नत्वेकश्रुत्युपन्यस्तत्वे। चिन्मात्रेण भोगस्येत्येतत्

भावादित्यनेनाप्यन्वीयते। अत एव भावादिति हेतुरनन्तरमुपन्यस्त आदौ योजनीयः । उभयत्र 'उभयोः । न केवलमेकत्रेत्यपेरर्थः । तथाच नोभयोः पक्षयोर्विरोधोऽस्ति चिन्मात्रेण भोगस्य ब्राह्मेण भोग इति जैमिन्युक्तस्य च प्रमाणेषु भावात् प्रमिते च विरोधाभावात् । नचान्त्ये प्रमाणाभावः । न केवलं 'सः' इति श्रुतौ ब्राह्मेण भोगस्योपन्यासः । किं नाम ? 'सः' इति श्रुत्यन्तरे औडुलौम्युक्तस्याप्युपन्यासादिति उभयोः पक्षयोः 'अविरोधं' विरोधाभावं भगवान् बादरायणो मन्यत इति योजना । श्रुत्यर्थस्तु- 'सः' मुक्तो 'मर्त्यात्' विनाश्यात् कर्मारब्धजडशरीराद् विमुक्तः 'चिन्मात्री' चिदात्मकदेहवान् व्यक्तो भवति । 'अथ' अनन्तरं 'तेनैव रूपेण' चित्स्वरूपेणैवेन्द्रियेण 'अभिपश्यति' रूपादिकं 'शृणोति' शब्दान् 'मनुते' सामान्यतः स्वयोग्यं सर्वं 'विजानाति' विशेषतः । तां दशाम् ।

नारायणाध्यात्मे च -

'मर्त्यं देहं परित्यज्य चितिमात्रात्मदेहिनः ।
चितिमात्रेन्द्रियाश्चैव प्रविष्टा विष्णुमव्ययम् ॥

तदङ्गानुगृहीतैश्च स्वाङ्गैरेव प्रवर्तनम् ।
कुर्वन्ति भुञ्जते भोगांस्तदन्तर्वहिरेव वा ।
यथेष्टं परिवर्तन्ते तस्यैवानुग्रहेरिताः ॥' इति ॥ ७ ॥

ननु देहभावाभावयोर्विरोधस्य कः परिहारो जात इत्यतो जैमिनिमतं जडदेहाभावविषयम् , औडुलोमिमतं तु चितिमात्रदेहविषयमतो न विरोध इत्याशयेन अविरोधप्रकारं अपिशब्दसूचितस्मृत्या दर्शयति– **नारायणेति** ॥ 'मर्त्यं' विनाशिनं 'चितिमात्रात्मदेहिनः' केवलचिदात्मकस्वरूपदेहयुक्ताः ॥ चः समुच्चये । नत्वदेहिनो चिद्देहिनोऽनिन्द्रियाश्चेत्येवार्थः । अव्ययं विष्णुं प्रविष्टा इति सायुज्यभाज उच्यन्ते । अत एव 'तदङ्गानुगृहीतैः' भगवदङ्गानुगृहीतैरित्याद्युक्तिः । 'स्वाङ्गैः स्वरूपकरचरणादिभिः । नतु भिन्नैः विष्ण्वीयैर्वेत्येवार्थः । 'प्रवर्तनं' व्यापारं

भुञ्जते चेति सम्बन्धः ' भोगान्' भोग्यान् 'तदन्तः' विष्णुदेहस्यान्तः बहिश्चेति सम्बन्धः। यथेष्टमेवेत्यन्वयः। 'परिवर्तन्ते' सञ्चरन्ति 'तस्य' विष्णोः 'अनुग्रहेरिताः' प्रसादेन प्रेरिताः तदिच्छया विषयीकृता इत्यर्थः। अनुग्रहैधिता इति पाठे तदभिवर्धिता इत्यर्थः । तस्यैवानुग्रहेरिता इत्यनेन ब्राह्मेणेति सूत्रखण्डस्य ब्रह्मणः प्रसादेनेत्यप्यर्थः सूचितः, अत एव प्रमेयदीपे अनुभवशक्तिस्त्वीश्वरप्रसादादित्यत्र ब्राह्मेणेति सूत्रं प्रमाणीकृतम्। इति नारायणाध्यात्म इत्यन्वयः ॥

॥ इति ब्राह्माधिकरणम् ॥ ५ ॥

॥ ६. सङ्कल्पाधिकरणम् ॥

(मुक्तः स्वसङ्कल्पमात्रेण भोगाननुभवति)

सू — ॐ ॥ सङ्कल्पादेव च तच्छ्रुतेः ॥ ॐ ॥ ८ ॥

न तेषां भोगादिषु प्रयत्नापेक्षा । 'स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति' (छा ८-२-१) इत्यादिश्रुतेः ॥ ८ ॥

अत्राधिकरणे मुक्तस्य सङ्कल्पमात्रसाध्यभोगः समर्थ्यते । तत्र मुक्तानां भोगादिषु तत्तदुपायसाध्यसाधनापेक्षाऽऽवश्यकीति पूर्वपक्षे सिद्धान्तयत् सूत्रं पठति– **सङ्कल्पादेवेति** ॥ अत्र चशब्दो निपातत्वेनानेकार्थत्वात् नञर्थः सन् पूर्वपक्षनिवृत्तिरूपार्थमाह । तत्वप्रदीपरीत्या एवशब्दो वा एतमर्थमाहेत्याशयेन तमर्थं दर्शयति - **न तेषामिति** ॥ 'तेषां' मुक्तानां भोग इष्टानुभवः । आदिपदेन तत्वप्रदीपरीत्या सौत्रचशब्दार्थभूता निष्ठा परमा गृह्यते । **प्रयत्नापेक्षेति** । तत्तदुपायसाध्यसाधनापेक्षेत्यर्थः । प्रयत्नापेक्षेत्यनन्तरं किन्तु सङ्कल्पादेव तत् सिध्यतीति वाक्यशेषः । एवं सूत्रेऽपि । कुत एतदित्यतः प्रवृत्तं तच्छ्रुतेरिति हेतुपदं सा च सा श्रुतिश्चेति विग्रहं तच्छब्दस्य सङ्कल्पादेवेत्येतद्रूपपरामर्शित्वं चाभिप्रेत्य श्रुत्युदाहरणपूर्वं व्याचष्टे- **स यदीति** ॥ आदिपदेन 'तेन पितृलोकेन

महीयते। अथ यदि मातृलोककामो भवति' इत्यारभ्याम्नातं 'यंयमन्तमभिकामो भवति यं कामं कामयते' सोऽस्य सङ्कल्पादेव समुत्तिष्ठति तेन सम्पन्नो महीयते' इत्यन्तं समग्रवाक्यं गृह्यते। 'स यदि' इति छन्दोगश्रुतेरयमर्थः– 'सः' मुक्तो यदि पितॄणां विष्णुलोको भूयात् तदनन्तरं तदवलोकोऽपि मम भूयादिति 'पितृलोककामः' तदपेक्षो भवति। तदा 'अस्य' मुक्तस्य 'सङ्कल्पात्' अपेक्षावशादेव अस्य पितरः 'समुत्तिष्ठन्ति' स्वयोग्यसाधनमापाद्य संसारान्मुक्ताः सन्तः पुरःस्थिता भवन्ति। ततश्च 'तेन पितृलोकेन' तद्दर्शनेन 'सम्पन्नो' युक्तः सन् 'महीयते' स्वावरैः पूज्यत इति। एवमन्यान्यपि वाक्यानि व्याख्येयानि भवन्ति। अत्र पित्रादयः स्वरूपपित्रादयो विवक्षिताः ते च चरमशरीरपित्रादय एव 'चरमे तु यथा निजम्' इति वचनात् ते च योग्या एवेति सम्प्रदायविदः। उपसंहरति- **यंयमिति**॥ 'अन्तं' देशमवसानं निर्णयं वा। 'कामं' काम्यम्। इति सूत्रे तदिति व्यस्तं समस्तं चावर्तते। तथाच न तेषां मुक्तानां भोगादिषु प्रयत्नापेक्षा, किन्तु सङ्कल्पादेव तद्भोजनं सिध्यति। कुतः ? 'तच्छ्रुतेः' 'स यदि' इति श्रुतेरित्यर्थः। एवशब्दः श्रुतेः प्राबल्यसूचकः। सङ्कल्पानन्तरमेव, नतु विलम्बं कृत्वेति वा।

॥ इति सङ्कल्पाधिकरणम् ॥ ६ ॥

॥ ७. अनन्याधिपत्यधिकरणम् ॥

(मुक्तानां स्वाधमा अधिपतयः न सन्ति)

सू — ॐ ॥ अत एव चानन्याधिपतिः ॥ ॐ ॥ ९ ॥

सत्यसङ्कल्पत्वादेव।

अत्र ब्रह्मप्राप्तिमतां मुक्तानां स्वाधमनियम्यत्वराहित्येन भोगः साध्यते। तत्र मुक्तस्याधमा अप्यधिपतयः सन्तीति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति – **अत एवेति**॥ अत्र 'मुक्तः प्रतिज्ञानात्' इत्यतो मुक्त इत्यनुवर्तते। चशब्दो

विपक्षव्यावृत्त्यर्थः । तथाच मुक्तो न संसारिसमधर्मभागिति प्रतिज्ञासिद्धौ कुत एतदित्यतो यतोऽनन्याधिपतिरित्याह । कृत्स्नपतिभ्योऽन्याधिपतियुक्तो नेति तदर्थः । अत्रापि हेत्वाकांक्षायामत इत्युक्तमित्याशयेन तमंशं व्याचष्टे- **सत्यसङ्कल्पत्वादेवेति** ॥ अयमस्माकमेव नियम्यः स्यादित्यधिपतीनां सत्यसङ्कल्पत्वात् तदनुसारेण अहमेतेषामेव नियम्यः स्यामिति नियम्यमुक्तस्यापि सत्यसङ्कल्पत्वादेवेति तत्वप्रदीपरीत्याऽस्यार्थो ज्ञातव्यः । टीकाकृद्रीत्या एवकारः सिद्धान्तिहेतोः परगृहगतत्वादिति पूर्वपक्षिहेत्वपेक्षया प्राबल्यमाह । नात्र हेत्वन्तरं गवेषणीयमित्यर्थो वा ।

'परमोऽधिपतिस्तेषां विष्णुरेव न संशयः ।
ब्रह्मादिमानुषान्तानां सर्वेषामविशेषतः ।
ततः प्राणादिनामान्ताः सर्वेऽपि पतयः क्रमात् ।
आचार्याश्चैव सर्वेऽपि यैर्ज्ञानं सुप्रतिष्ठितम् ।
एतेभ्योऽन्यः पतिर्नैव मुक्तानां नात्र संशयः ।'
इति हि वाराहे ॥ ९ ॥

अत्रार्थे स्मृतिं चाह– **परम इति** ॥ अनेन सौत्रचशब्दः स्मृतिसमुच्चायकतयाऽपि व्याख्यातः । यथोक्तं तत्वप्रदीपे- चकारादनन्याधिपतित्वे प्रमाणादिति । स्मृत्यर्थस्तु – ब्रह्मादिमानुषान्तानां सर्वेषां तेषां मुक्तानां 'परमो' मायाः परो विष्णुरेव मुख्याधिपतिर्नात्र सन्देहः । परम इत्यनेन लक्ष्मीरपि गृहीता । 'ततः' तदनन्तरं 'प्राणादिनामान्ताः' ब्रह्माद्युपःपर्यन्ताः सर्वेऽपि स्वावराणां क्रमेणाधिपतयः । यैरुक्तज्ञानं 'सुप्रतिष्ठितं' समुत्पन्नं त एते सर्वे आचार्या गुरवश्च पतयः । एतेभ्यः कृत्स्नाधिपतिभ्यः अन्योऽधिपतिः मुक्तानां नास्त्येव, नात्र संशय इति । वाराहे इत्यनन्तरं वचनाच्चेति शेषः । हेतुद्वयस्यापि सौत्रप्रतिज्ञयाऽन्वयः ।

॥ इत्यनन्याधिपत्यधिकरणम् ॥ ७ ॥

॥ ८. अभावाधिकरणम् ॥

(मुक्ताः शुद्धसत्त्वात्मकदेहेन चिद्रूपदेहेन वा भोगाननुभवन्ति)

सू — ॐ ॥ अभावं बादरिराह ह्येवम् ॥ ॐ ॥ १० ॥

चिन्मात्रं विनाऽन्यो देहस्तेषां न विद्यत इति बादरिः । 'अशरीरो वाव तदा भवत्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतो याभ्यां ह्येष उन्मथ्यते' इत्येवं कौण्ठरव्यश्रुतावाह हि ॥ १० ॥

अत्राधिकरणे परमेश्वरं प्राप्तानां भोगानुपपत्तिः परिह्रियते । न मुक्तानां भोगो युज्यत इति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति - **अभावमिति** ॥ अत्र 'मुक्तः प्रतिज्ञानात्' इत्यतो मुक्त इति पदं षष्ठ्यन्ततया विपरिणतं चितिमात्रेणेति पदं चेहानुवर्तते । विना अन्यस्येति शेषः । देहस्येति श्रुतिरिति च लभ्यते । तथाच यतो मुक्तानां चितिमात्रेण विना तदन्यस्य प्राकृतदेहस्याभावोऽसत्त्वमतो न तेषां प्राकृतदेहसदसद्भाव-विकल्पमूलकभोगानुपपत्तिरिति शेषः । कुतस्तेषां देहाभावः ? 'हि' यस्मादेवं मुक्तानां शरीराभावम् 'अशरीरो वा' इत्यादिका श्रुतिराह, तस्मादिति बादरिः 'आह' मन्यते इति योजनेत्यभिप्रेत्य सूत्रं व्याचष्टे– **चिन्मात्रं विनेति** ॥ प्रकृतत्वाच्चिन्मात्रस्यैव प्रतियोगित्वमिति भावः । बादरिराहेत्यन्वयः । देहाभावः कुत इत्यतः प्रवृत्तमाह ह्येवमित्यंशं व्याचष्टे - **अशरीरो वेति** ॥ इति कौण्ठरव्यश्रुतावित्यन्वयः । 'एवं' मुक्तानां प्राकृतदेहाभावं, श्रुताविति सप्तमी प्रथमार्थे । 'हि' यस्मात् । अनेन आहेति सौत्रपदस्यावृत्तिः सूचिता । श्रुत्यर्थस्तु- 'तदा' मुक्तिकाले 'एषः' मुक्तः 'अशरीरो वाव' प्रकृत-देहशून्य एव भवति यतोऽत एनं न प्रियाप्रिये' सुखदुःखे स्पृशतः । अशरीरं सन्त-मित्यनुवादः । प्रियाप्रियस्पृष्ट्या भवदनिष्टमाह- याभ्यां प्रियाप्रियाभ्यामिति । अनेनात्र प्रियशब्देन 'परेयं प्रियनामकम्' इत्युक्तेः पराधीनसुखसामान्यवाचकेन

प्राकृतं सुखं ग्राह्यमिति सूचितम् । तस्यैवानित्यत्वविकारित्वादि-रूपोन्मादापादकत्वादिति तत्वप्रदीपोक्तेः । यद्यपि 'न हवै शरीरस्य' (छा. ८-९२-१) इति छान्दोग्येऽपि श्रुतिरस्ति । तथाऽपि सा परमात्मपरेति नात्रोदाहृता।

सू — ॐ ॥ भावं जैमिनिर्विकल्पाम्नानात् ॥ ॐ ॥ ११ ॥

'स वा एष एवंवित् परमभिपश्यत्यभिशृणोति ज्योतिषैव रूपेण चिता वाऽचिता वा नित्येन वाऽनित्येन वाऽथानन्दी ह्येवैष भवति नानानन्दं कञ्चिदुपस्पृशति' इत्यौद्दालकश्रुतौ विकल्पाम्नानादन्यदेहस्यापि भावं जैमिनिर्मन्यते ॥ ११ ॥

मुक्तानां देहसद्भावमभ्युपगच्छत् सूत्रमुपन्यस्यति - **भावमिति** ॥ पूर्ववद् विपरिणामानुवृत्त्यध्याहाराः कर्तव्याः । तथाच जैमिनिर्मुक्तानां चितिमात्रेण विना तदन्यस्य प्राकृतदेहस्यापि 'भावं' सद्भावं मन्यते । कुतः ? 'विकल्पाम्नानात्' चिन्मात्रदेहेनैवावतिष्ठते इत्यनुक्त्वा श्रुतौ 'चिता वाऽचिता वा' इति विकल्पोक्तेरिति सूत्रार्थमभिप्रेत्य श्रुत्युदाहरणपूर्वकं तद् व्याचष्टे - **स इति** ॥ 'परं' परमात्मानम् 'एवं' उक्तप्रकारेण 'वित्' अपरोक्षज्ञानी 'स एषः' मुक्तः 'चिता' अप्राकृतचैतन्यात्मकेन वा 'अचिता' शुद्धसत्वात्मकप्राकृतकर्मानारब्ध-जडात्मकेन वा 'ज्योतिषा' प्रकाशमानेन 'रूपेण' शरीरेणैव 'अभि-पश्यत्यभिशृणोति' दर्शनश्रवणोपलक्षितसर्वविषयानुभववान् भवतीत्यर्थः। तेन च 'आनन्द्येव' व्यक्तसुखवानेवैष भवति न दुःखी । हीति प्रसिद्धम् । कुतो ? 'हि' यतो 'नानानन्दं' आनन्दविरुद्धं दुःखं 'कञ्चित्' कमपि मुक्तं नोपस्पृशत्यत इत्यर्थः । अत्र नित्येनेत्येतत् चितेत्यस्य अनित्येनेत्येतत् अचितेत्यस्य विशेषणम्, नतु विकल्पद्वयमत्रोच्यते । उभयत्र वाशब्दोऽवधारणार्थः । तत्राचितोऽनित्यत्वं नाम स्वस्य सदाऽविद्यमानत्वमेव नतु सर्वथाऽनित्यत्वम् । मोक्ष-सकलपदार्थानामनादिनित्यत्वेन तदयोगादिति केचित् । अन्ये तु अनित्येन

वेति। अनेन मुक्तानां बाह्यदेहोऽनादिनित्य एव कञ्चुकवृत्त्या स्वीकारादित्येतत् निरस्तं भवति। प्राकृतशरीरादीनां मौक्तानां प्रळयात् पूर्वमुत्पत्तेः। प्रळये विनाशाच्चेत्याहुः। **विकल्पाम्नानादिति**। प्रकारद्वयाभिधानादित्यर्थः। **अन्यदेहस्येति**। चिन्मात्रं विनैवेत्यनुषज्यते। तथाच चिन्मात्रं विना तदन्यदेहस्यापीत्यर्थः। न केवलं चिन्मात्रस्येत्यपेरर्थः। 'भावं' सत्त्वम्।

सू — ॐ ॥ द्वादशाहवदुभयविधं बादरायणोऽतः ॥ ॐ ॥ १२ ॥

यथा द्वादशाहः क्रत्वात्मकः सत्रात्मकश्च भवति। एवं मुक्तभोगो बाह्यशरीरकृतश्चिन्मात्रकृतश्च भवतीति बादरायणो मन्यते ॥ १२ ॥

नन्वेतन्मतद्वयस्य परस्परविरुद्धत्वात् किं तत्स्वमतमित्याशङ्कां परिहरत् सूत्रं पठति- **द्वादशेति** ॥ अत्र मुक्तानां देहभावाभावाख्यमुभयविधमपि मतं स्वमतमेव। कुतः ? अतः उभयविधस्यापि मतद्वयोक्तप्रमाणवत्त्वात् इति सूत्रखण्डार्थमभिप्रेत्य कथमुभयं विरुद्धं स्वमतं भवेदित्याशङ्कापरिहाराय प्रवृत्तं द्वादशाहवदित्यंशं व्याचष्टे- **यथेति** ॥ क्रतुरहीनः। यथोक्तं तत्वप्रदीपे- क्रतुरित्यहीनो विवक्ष्यते। अहीनैकाहेष्वस्य श्रेष्ठत्वात् क्रतुशब्दः प्रयुक्तः। तथाच श्रुतिः- 'श्रेष्ठयज्ञो वा एष यद् द्वादशाहः' इति। अत्र द्विविधो द्वादशाहः सत्रमहीनश्चेति। तत्रैकादशाहपर्यन्तमहर्गणा अहीना एव। त्रयोदशाहादिकं सत्रमेव। मध्यमं तु यजमानेच्छया एकयजमानकत्वेऽहीनसंज्ञकम्, अनेकयजमानत्वे सत्रसंज्ञकम्। सति चैवं हीनात्मकः सत्रात्मक इति वक्तव्ये क्रतुविशेषेऽहीने क्रतुपदप्रयोगः कुरुपाण्डवन्यायेनेति प्राचीनग्रन्थोक्तो विशेषो ज्ञातव्यः। द्वादशाहवदिति दृष्टान्तवाक्येन लब्धमर्थं दर्शयति- **एवमिति** ॥ 'भोगः' इच्छया भोगः 'बाह्यशरीरकृतः' प्राकृतदेहनिमित्तः 'चिन्मात्रकृतः' स्वरूपदेहकृतः।

चः समुच्चये । भवतीत्यनन्तरमतो मुक्तस्येच्छया भोगार्थं देहभावाभावयोरविरोधेनोपपत्तिरिति बादरायणो मन्यत इति वाक्यशेषः । एतत्सूत्राभिप्रायस्तु मुक्तानां स्वतः इच्छां विना प्राकृतदेहाभाव-मवरेषामिच्छयाऽप्यभावं बादरिराचार्यो मन्यते । नच द्वितीये मुक्तानां सत्यकामत्वविरोधः । यतस्तेषामिच्छाऽपि नास्ति तद्भोगस्याल्पीयस्त्वेन तदर्थं शरीरान्तरापेक्षाभावात् । जैमिन्याचार्यस्तु कदाचिन्मुक्तस्यापि कस्यचिदुत्तमस्य भोगार्थमिच्छया प्राकृतदेहस्यापि भावं मन्यते । सर्वेषामपि चिदात्मकदेहेनैव भोगः, केषाञ्चिदिच्छयैव बाह्यदेहेनापि । तत्रापि विशेषः- चिन्मात्रदेहेन भोगे बाह्यदेहापेक्षा नास्ति, बाह्यदेहेन भोगे तु चिदात्मकदेहोऽधिष्ठानत्वेन अपेक्षित इति । यद्यपि चिद्देहेनैव समस्तभोगो युज्यते, चिद्देहानां बहुरूपत्वात् । तथापि वश्यप्रकृतीनां वैचित्र्यकौतुकवतां शरीरयोगेन च सुशक इति गुण एव । अतो मुनिमतद्वयं साध्विति मुनिद्वयगुरवो मन्यन्त इति तत्वप्रदीपेऽभिहितः ।

उपपत्तिश्च –

सू — ॐ ॥ तन्वभावे सन्ध्यवदुपपत्तेः ॥ ॐ ॥ १३ ॥

सन्ध्यं स्वप्नः 'सन्ध्यं तृतीयं स्वप्नस्थानम्' (बृ. ६-३-९) इति श्रुतेः ॥ १३ ॥

ननु भवतु देहभावाभावयोरविरोधः । तथापि कथं भोगोपपत्तिः । देहसत्त्वे सदुःखादिः स्यात्, न चेद् भोगायोग इत्यनुपपत्तेरुक्तत्वादित्यत आह- **उपपत्ति-श्चेति ॥ चोऽवधारणे ॥** तथाच पक्षद्वयेऽपि भोगस्य युक्तैवेत्यर्थः । कथमुप-पत्तिरित्याशङ्कां परिहर्तुं देहाभावे भोगोपपत्तिप्रतिपादनाय सूत्रं पठित्वा दुर्गमांशं सप्रमाणकं व्याचष्टे- **तन्विति ॥** जाग्रत्सुषुप्त्यपेक्षया तृतीयं स्वप्नावस्थाख्यं स्थानं 'सन्ध्यं' जाग्रत्सुषुप्तिसन्धौ भवमिति वाजसनेयश्रुत्यर्थः । अनेन सप्तम्यर्थे वतिः । तन्वभाव इत्यावर्तते । भोगेत्युपस्कार्यम् । अत एवेत्यतश्चोऽनुवर्तते, स

च विपक्षव्यावृत्त्यर्थोऽप्यर्थश्च । तथाच न देहाभावे भोगानुपपत्तिः । कुतः? 'सन्ध्यवत्' यथा स्वप्नावस्थायां 'तन्वभावे' शरीराभावेऽपि तदभिमानाभावेऽपि भोगो दृष्टस्तथा 'तन्वभावे' तदृशायां मुक्तौ 'तन्वभावे' देहाभावेऽपि भोगोपपत्तेरिति सूत्रार्थ उक्तो भवति ।

सू — ॐ ॥ भावे जाग्रद्वत् ॥ ॐ ॥ १४ ॥

देहसद्भावे तत्र तत्वप्रदीपरीत्या मिथ्याभिनिवेशरूपाभिमानाभावेऽपि लक्ष्म्यादिसाधारणस्य स्वकीयत्वज्ञानमात्ररूपाऽभिमानस्यापि भावात् सुतरां भोगोपपत्तिरिति भावेन सूत्रमुपन्यस्यति- **भाव इति** ॥ अत्र भाव इत्यतः पूर्वं तन्वा इति विविच्यान्वेति । सप्तम्यन्ताद् वतिः । तन्वभावेऽपि भोगोपपत्तिरिति हेतुरत्रापि सम्बध्यते । तथाच 'जाग्रद्वत्' यथा जाग्रद्दशायां तनोर्भवि देहसत्त्वेऽपि भोगोपपत्तिस्तथा 'तन्वभावे' मुक्तावपि तनोर्भावेऽपि भोगोपपत्तेः न तदनुपपत्तिरिति सूत्रार्थस्य स्मृत्यैवोक्तत्वान्न पृथगुक्तः । ननु देहसद्भावे भोगानुपपत्तेरनापादितत्वात् तत्परिहारायेदं सूत्रं व्यर्थमिति चेन्न, अस्य सूत्रस्य प्रदीपवदावेश इत्यत्र वक्ष्यमाणं यद् दुःखादिप्राप्तिरूपदूषणस्य निराकरणं तत्प्रस्तावाय तत्प्रतियोगिप्रसञ्जकप्रतिपादनाय प्रवृत्तत्वेन सार्थकत्वात् ।

ब्रह्मवैवर्ते च -

'स्वप्नस्थानां यथा भोगो विना देहेन युज्यते ।
एवं मुक्तावपि भवेद् विना देहेन भोजनम् ॥
स्वेच्छया वा शरीराणि तेजोरूपाणि कानिचित् ।
स्वीकृत्य जागरितवद् भुक्त्वा त्यागः कदाचन ॥' इति ॥ १४ ॥

ननु सन्ध्यवत् जाग्रद्वद् भोग इव सुषुप्त्यादिवद् भोगाभावोऽपि किं न स्यादिति प्रतिदृष्टान्तस्यापि वक्तुं शक्यत्वात् । देहाभावे स्वप्नवद् देहसद्भावे जाग्रद्वद् भोग इत्येतत् कुत इत्यतः पूर्वसूत्रसहितैतत्सूत्रार्थे स्मृतिं चाह - **ब्रह्मवैवर्ते**

चेति ॥ उक्तमिति शेषः । न केवलं सूत्रकृता इदमुक्तमिति चशब्दार्थः । स्वप्नस्थानां 'स्वप्नावस्थापन्नानां 'देहेन विना' तदभिमानेन विनाऽपि । अनभिमानस्याऽपि भोगाभावापादकत्वेनाभावसाम्यादेवमुक्तिः। 'देहेन' प्राकृतेन 'भोजनं' भोगः । युज्यत इत्यनुषज्यते । 'शरीराणि' प्राकृतानि 'कदाचन' भोगानन्तरकाले । इतिशब्दस्य ब्रह्मवैवर्त इत्यनेनान्वयः । बृहद्भाष्यरीत्या तु सूक्ष्मस्यैव स्वरूपदेहस्य मुक्तौ वृद्धचङ्गीकारेण भोगः । तदुक्तं बृहद्भाष्ये षष्ठाध्याये -

'अल्पतेजस्तथैवाल्पं जीवरूपं हि संसृतौ ।
तथाच सुमहत्तेजः करोति भगवान् महत् ॥
अतो नवतरं चैतत् ब्रह्मादीनां करोत्यजः ॥' इति ॥ (बृ.भा. ६.४.५)

व्यासतीर्थैः अल्पं परिमाणवत् मुक्तौ रूपं सुमहत् तेजो महत् करोतीत्यर्थ इति । अत्र स्वरूपदेहस्य महत्त्वं च स्वस्वचरमशरीरसमत्वेन तूलपिण्डवत् प्रचय एव । नच प्रचयशब्दितविकाराङ्गीकारे अनित्यत्वापत्तिः । ईश्वरशक्त्या तदभावोपपत्तेः । उक्तं हि गीताभाष्ये 'शरीरं जायते तेषाम्' इति द्वितीयाध्यायव्याख्यानावसरे । प्रमेयदीपे तु 'विकारित्वाद् विनाशः स्यादित्यत उक्तम् – ईश्वरशक्त्या' इति ॥

सू – ॐ ॥ प्रदीपवदावेशस्तथाहि दर्शयति ॥ ॐ ॥ १५ ॥

शरीरमनुविश्यापि तत् प्रकाशयन्तः पुण्यानेव भोगाननुभवन्ति नतु दुःखादीन् । यथा प्रदीपो दीपिकादिषु प्रविष्टः तत्स्थं तैलाद्येव भुङ्क्ते नतु तत्काष्ण्यादि । 'तीर्णो हि तदा सर्वाञ्छोकान् हृदयस्य भवति' (बृ. ६-३-२२) इति हि दर्शयति ॥ १५ ॥

ननु देहसद्भावे भोगोपपत्तावपि दुःखमप्यापद्यते एवेत्युक्तमेवेत्याशङ्कां परिहरत् सूत्रं पठति- **प्रदीपवदिति** ॥ अत्र मुक्तानामिति प्रकरणाल्लभ्यते । प्रदीपवदिति

षष्ठ्यन्ताद् वतिः । आवेशः प्रवेशः । स्वकीयत्वज्ञानरूपाभिमानः । तथाच 'अपि' यद्यपि मुक्तानाम् 'आवेशः' शुद्धप्रकृतिमयज्योतीरूपसुखैकायतन-बाह्यदेहप्रवेशः तदभिमानोऽस्ति तथापि न ते दुःखादीननुभवन्ति किन्तु साधून्येव प्रदीपवदिति सदृष्टान्तंप्रतिज्ञावाक्यस्य अर्थमभिप्रेत्याह- **शरीरमिति** ॥ शुद्धप्रकृति-मयज्योतीरूपशरीरमित्यर्थः । समुदायैकवचनमेतत् । 'अनुप्रविश्य' इच्छानुसारेण प्रविश्य तदभिमानिनो भूत्वा । तत्कार्यमाह- **तदिति** ॥ 'पुण्यान्' तत्साध्यान् साधून् 'भोगान्' भोग्यान् । पुण्यानित्यनेनाग्निहोत्रादीत्यत्र ज्ञानोत्तरपुण्यभाजो यद् भोगबाहुल्यमुक्तं तत् सूचयतीत्युक्तं तत्वप्रदीपे । मुक्ताः न दुःखादीननुभवन्ति, किन्तु पुण्यानेवेति योजना । न पापसाध्यानसाधून् दुःखादीनित्येवार्थः । आदिशब्देनासह्यविषया गृह्यन्ते । 'तत्स्थं'दीपिकास्थितं 'भुङ्क्ते' गृह्णाति । द्वितीयान्तप्रथमादिशब्देन घृताद्युच्यते द्वितीयेन धूल्यादिकम् । तुरप्यर्थः । 'काष्ण्यादीन्' मालिन्यादीनपीति । भुङ्क्ते इत्यनुषज्यते। तथेति शेषः । तथेत्यन्तं भाष्यं शरीरमित्यादेः प्राक् संयोज्यम् । 'तत्' शरीरं प्रकाशयन्तः चित्स्वरूपाद् विवेचयन्तः आत्मज्योतिषा प्रकाशयन्तो वा इत्यनेन प्रदीपवदिति प्रदीपदृष्टान्तं वक्तुः सूत्रकारस्य यथा प्रदीपो दीपिकां प्रकाशयन् तत्स्थं तैलाद्येव भुङ्क्ते, न प्रकाशविरोधीन् काष्ण्यादीन् । तथा मुक्ताः जडशरीरं प्रकाशयन्तो देहविवेक-ज्ञानवत्त्वाद् गुणानेव भोग्याननुभवन्ति, न तन्निमित्तकं दुःखादीति विवक्षोक्ता भवति । नच 'नहवै सशरीरस्य' (छा.८-१२-१) इति श्रुतिविरोधः । तस्याः कर्मारब्धदेहविषयत्वादिति भावः । ननु देहसद्भावे कुतो मुक्तस्य दुःखाभावः, कुतश्च श्रुतेरर्थान्तरपरत्वं दृष्टान्तमात्रस्या-साधकत्वादित्यतः प्रवृत्तं तथाहि दर्शयतीति हेत्वंशं व्याचष्टे- **तीर्णो हीति** ॥ श्रुतिरिति शेषः । 'हि' यस्मात् तं 'दर्शयति' प्रतिपादयति । 'तीर्णो हि' इति वाजसनेयश्रुतिस्तु हानिनये व्याकृता । तथाच देहसद्भावः 'चिता वा' इत्यादिश्रुतिसिद्धः, दुःखाभावेऽपि 'तीर्णो हि' इति श्रुतिरस्ति, अतो न देहमात्रं दुःखहेतुरिति सिद्ध्यति श्रुतेरर्थान्तरं च सिध्यतीति भावः ।

नच 'स्वर्गे लोके न भयं किञ्चनास्ति' (कठ. १-१२) इत्यादिना स्वर्गादिस्थस्यैतदिति वाच्यम्। यतः -

सू – ॐ ॥ स्वाप्ययसम्पत्त्योरन्यतरापेक्षमा-
विष्कृतं हि ॥ ॐ ॥ १६ ॥

सुप्तौ मोक्षे वा तदुच्यते। 'अत्र पिताऽपिता भवति', . . . 'अनन्वागतं पुण्येनानन्वागतं पापेन' (बृ. ६-३-२२) इत्याद्याविष्कृतत्वात्।

ननु 'तीर्णो हि' इत्येतद्वाक्यं स्वर्गादिविषयं किं स्याद् बाधकाभावात्, तथाच न मुक्तानामदुःखत्वे प्रमाणमेतत्। नच वाच्यं स्वर्गेऽपि कथं दुःखाभाव इति। 'स्वर्गे लोके' इत्यादिना स्वर्गे दुःखाभावसिद्धेरित्याशङ्कां परिहरति - **नचेति** ॥ इत्यादिना काठकवाक्येनेत्यनन्तरं स्वर्गे दुःखाभावसिद्धेरिति वाक्यशेषः ॥ प्रथमादिपदेन 'न तत्र त्वं जरया बिभेति' इत्यादेर्ग्रहणम्। यमं प्रति नचिकेतोवाक्यमेतत्। द्वितीयादिपदेन पुण्यलोकान्तरग्रहणम्। स्वर्गादिस्थस्येति सम्बन्धमात्रे षष्ठी। 'एतत्' शोकतरणम्। यद्वा - 'एतत्' 'तीर्णो हि' इति वाक्यं, तथात्वे षष्ठ्यर्थो विषयता। कुतो न वाच्यमिति पृच्छति - **यत इति** ॥ 'यतश्चोदेति सूर्योऽस्तं यत्र च गच्छति' इत्यत्रेव प्रश्नार्थोऽयं शब्दः। एतत्परिहाराय सूत्रं पठित्वा व्याचष्टे - **स्वाप्ययेति** ॥ सुप्तावित्यनेन सम्पत्तिशब्दो मोक्ष इत्यनेन स्वाप्ययशब्दश्च व्याख्यातः। यत्र यस्य रुचिः स एवार्थो ह्यस्य व्याख्येयः, नतु स्वाप्ययसम्पत्त्योर्मध्ये एक एवार्थ इति ज्ञापनाय वाशब्दप्रयोगः। यद्वा - तत्वप्रदीपदिशा वाशब्दश्चार्थः समुच्चये। तेन सौत्रान्यतरशब्दः उभयार्थतया व्याख्यातः। न स्वर्ग इत्यवधारणेऽपि वाशब्दः। **तदिति**। 'तत्' संसारतरणं तेन 'तीर्णो हि' इत्यनेनोच्यत इत्यर्थः। यत इत्येतदावृत्त्याऽत्रापि संयोज्यम्। हेत्वर्थे चायम्, अतो न वाच्यमित्यन्वयः। यद्वा – सुप्तौ मोक्ष इति विषयसप्तमी।

'तत्' तीर्णो हीति वाक्यम् 'उच्यते' पठ्यत इत्यर्थः। यद्यपि सूत्रनिर्देशानुसारेण मोक्षे सुप्तौ चेति वक्तव्यम्। तथापि 'तीर्णो हि' इति वाक्यस्योभयपरत्वेऽपि मुख्यत्वमेव, नत्वेकत्र मुख्यताऽन्यत्रामुख्यतेति ज्ञापनायैवं व्यत्यासेनोक्तिः। कुतोऽस्य वाक्यस्य सुप्त्यादिविषयतेत्यतः प्रवृत्तमाविष्कृतं हीत्यंशं व्याचष्टे - **अत्रेति ॥ इत्यादीति** । आदिशब्दस्योभयत्र सम्बन्धः। 'अत्र पिताऽपिता भवति' इत्यादिना वाजसनेयवाक्येनेति। अत्रत्यादिशब्देन 'माताऽमाता भवति' (बृ. ६-३-२२) इत्यादिशिष्टवाक्यं गृह्यते। 'अनन्वागतं पुण्येनानन्वागतं पापेन' (बृ. ६-३-२२) इत्यादिशब्देन लिङ्गान्तरबोधकं वाक्यान्तरं गृह्यते। **आविष्कृतत्वादिति**। व्यक्तीकृतत्वादित्यर्थः। एतद्वाक्यस्य सृष्ट्यादिविषयत्वस्येति शेषः। अनेन हिशब्दो हेत्वर्थतया व्याख्यातः। भगवत्सम्परिष्वक्तो जीवः पूर्वं स्वपुत्राणां पिता 'अत्र' सुप्तौ मुक्तौ चापिता भवति। दायादानात् तेषां दुःखाददुःखाच्चेति भावः। पूर्वं माता अमाता भवति। एवमनिष्टपुण्येन पापेन च 'अनन्वागतम्' अन्वागमनं न भवतीति श्रुत्यर्थः। नन्वपितृत्वादिलिङ्गं पुण्यपापाद्यसङ्गत्वादिलिङ्गं च कथं सुप्ते सङ्गतमिति चेदुच्यते। सुप्तिसमये स्वपुत्राणां दायादानेन पुत्रेष्वभिमानाभावेन च सुप्तस्यापितृत्वममातृत्वं च युक्तम्। यथोक्तं बृहद्भाष्ये-

'तेनाश्लिष्टः स्वपुत्राणां दायादानात् न वै पिता।
तेषां दुःखाददुःखित्वान्न माता लोकमान्यपि ॥' इति ॥

एवं सुप्ते वृत्तिसुखदुःखयोरभावेन तत्साधनपुण्यपापयोरसम्बन्धो भाविदुःखशङ्काभावेन शोकतरणं च युक्तमिति द्रष्टव्यम्। सूत्रार्थस्तु - 'तीर्णो हि' इति वाक्यं 'स्वाप्ययसम्पत्त्योः' मुक्तिसुप्त्योर्मध्ये 'अन्यतरापेक्षं' उभयापेक्षमुभयविषयमेव, न स्वर्गविषयम्। कुतो ? 'हि' यस्मात् अस्योभयविषयत्वम् 'अत्र पिता' इत्यादिना 'आविष्कृतं' प्रकटितं तस्मादिति। **सूत्राक्षरस्वारस्यं तु कर्मनिर्णयटीकायां वृहद्भाष्ये चोक्तम्**। तथाहि– यदि स्वाप्ययसम्पत्त्यपेक्षमित्युच्यते, तदा स्वाप्यये मोक्षे या सम्पत्तिः

सुप्तिस्तदपेक्षं तद्विषयमिदं वाक्यमिति प्रतीतिः स्यात्, तथाच मोक्षेऽपि सुप्तिरस्तीति शङ्का प्राप्ता, तन्निवृत्त्यर्थं स्वाप्ययसम्पत्त्योर्मध्येऽन्यतरापेक्षमित्युक्तम् । नचाज्ञाननिवृत्तिरूपे मोक्षे कथमज्ञानकार्यसुप्तिशङ्का स्यादिति वाच्यम्। प्रेक्षावतां तच्छङ्काभावेऽपि मोक्षस्याज्ञाननिवृत्तिरूपत्वं सुप्तेरज्ञानकार्यत्वं चाजानतो मन्दस्यैतच्छङ्कोदयात्। नचान्यतरपदं प्रयोक्तुः सूत्रकारस्य 'तीर्णो हि' इति वाक्यस्यैकार्थविवक्षैवास्त्विति वाच्यम् । यद्येतयोर्मध्ये एक एवार्थो विवक्षितः स्यात् तदा स्वाप्ययापेक्षमिति वा सम्पत्त्यपेक्षमिति वा ब्रूयात्, नतु विकल्प-वाचकान्यतरपदप्रयोगः, वस्तुनि विकल्पायोगात् । नच सूत्रकृतोऽप्ययमेवार्थ इति निश्चयाभावादेवं प्रयोग इति वाच्यम् । सर्वज्ञस्य संशयायोगात् । अन्यथा तत्कृतस्य सूत्रत्वव्याहतेः । ननु सम्बन्धे षष्ठीमङ्गीकृत्य स्वाप्ययसम्पत्त्योरित्येव कुतो न कृतं, तावताऽप्युक्तशङ्कापरिहारादिति चेदुच्यते । अनेकार्थस्य 'तीर्णो हि' इति वाक्यस्यैकार्थव्याख्याने रुचिरेव व्याख्यातुः प्रमाणं, नतु मुख्यामुख्यताविशेषोऽस्तीति सूचयितुमन्यतरापेक्षमितीति । एतेन 'तीर्णो हि' इति वाक्यस्य स्वर्गस्थविषयत्वं पराकृतं भवति । प्रळये लिङ्गभङ्गलक्षणपर-मुक्तियुक्तस्येव तस्य पुत्रकृतश्राद्धादिभोक्तुरपितृत्वाद्यसम्भवात्, पुण्याद्यनन्वागमनाद्ययोगाच्च ।

ब्रह्मवैवर्ते च -

'ज्योतिर्मयेषु देहेषु स्वेच्छया विश्वमोक्षिणः ।
भुञ्जते सुसुखान्येव न दुःखादीन् कदाचन ॥
तीर्णा हि सर्वशोकांस्ते पुण्यपापादिवर्जिताः ।
निवृत्तसर्वदोषास्ते गुणमात्रस्वरूपिणः ॥' इति ॥ १६ ॥

अधिकरणार्थे स्मृतिमुदाहरति - **ब्रह्मवैवर्ते चेति** ॥ 'विश्वमोक्षिणः 'सर्वे मुक्ताः 'गुणमात्रस्वरूपिणः' ज्ञानानन्दादिगुणैकस्वरूपिणः' सर्वशोकान् तीर्णाश्च भवन्ति 'हि' यस्मात् ते गुणमात्रस्वरूपिणः तस्मात् स्वेच्छागृहीतेषु 'ज्योतिर्मयेषु'

शुद्धसत्त्वात्मकेषु देहेषु 'सुसुखान्येव' दुःखासम्भिन्नसुखादीन्येव भुञ्जते यस्मात् ते सर्वशोकान् तीर्णाः तस्मात् कदाचन दुःखादीन् नैव भुञ्जते इत्यन्वयः । ते मुक्ताः अनिष्टकाम्यपुण्यपापादिवर्जिताः सर्वदोषनिवृत्ता इत्यनुवादः । गुणमात्र-स्वरूपिणः सर्वशोकान् तीर्णा इत्यनेन भुञ्जते सुसुखान्येव, न दुःखादीनित्यनेन वा, अस्यार्थस्य प्राप्तत्वात् । ननु सर्वेषां ज्योतिर्मयदेहाभावात् कथं विश्वमोक्षिण इत्युक्तिरिति चेत्, अत्र केचित्- विश्वपदस्य सङ्कोच इति । अन्ये तु- एतद्वाक्य-बलादस्तु विश्वेषां ज्योतिर्मयदेह इत्याहुः । एके तु- विश्वमोक्षिण इत्यस्य कर्मक्षयोत्क्रान्तिमार्गभोगाख्यचतुर्विधमोक्षवन्त इत्यर्थः । तेन नोत्क्रामन्तीति वक्ष्यमाणमुक्तव्यावृत्तिरित्याहुः । इति ब्रह्मवैवर्त इत्यन्वयः ।

॥ इत्यभावाधिकरणम् ॥ ८ ॥

॥ ९. जगद्व्यापाराधिकरणम् ॥

(मुक्ताः जगत्सृष्ट्यादिव्यतिरिक्तान् काममनुभवन्ति)

सू — ॐ ॥ जगद्व्यापारवर्जम् ॥ ॐ ॥ १७ ॥

'सर्वान् कामानाप्त्वाऽमृतः समभवत्' (ऐ.आ. २-५-४) इत्युच्यते । तत्र सृष्ट्यादिभ्योऽन्यान् व्यापारानाप्नोति ॥१७॥

अत्राधिकरणे ब्रह्मप्राप्तस्य मुक्तस्य भोगे इयत्ता समर्थ्यते । तत्र सर्वान् कामान्' इति श्रुतेर्मुक्ता जगत्सृष्ट्यादिसर्वकाम्यानाप्नुवन्तीति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्य व्याचष्टे- जगदिति ॥ आप्नोतीत्यनन्तरमेवशब्दशिरस्कमुच्यत इत्येतदनुषज्यते । अपीति शेषः । तथाच अपि यद्यपि 'सर्वान् कामानाप्त्वाऽमृतः समभवत्' इत्यैतरेये 'अमृतो' मुक्तः सर्वान् काम्यभोगानाप्नोतीत्युच्यते । तथापि 'तत्र' सर्वपदोदितेषु मध्ये सृष्ट्यादिभ्योऽन्यानेव सर्वानाप्नोति । नच श्रुति-विरोधः । यतस्तत्र श्रुतौ सृष्ट्यादिभ्योऽन्यान् कामानाप्नोतीत्येवोच्यते, नतु सृष्ट्याद्याप्नोतीति योजना । अनेन सूत्रे मुक्त इत्यनुवर्तते । सर्वान् कामानाप्नोतीति

श्रुत्यर्थ इति शेषः। जगद्व्यापारवर्जमिति सावधारणम्। मुक्तो जगद्व्यापारवर्जं सर्वान् कामानाप्नोति। नच श्रुतिविरोधः। यतो मुक्तो जगद्व्यापारवर्जमेव सर्वान् कामानाप्नोतीति श्रुत्यर्थो युज्यत इति सूत्रार्थ उक्तो भवति।

कुतः ?

सू — ॐ ॥ प्रकरणादसन्निहितत्वाच्च ॥ ॐ ॥ १८ ॥

जीवप्रकरणत्वाज्जीवानां तादृक्सामर्थ्यविदूरत्वाच्च।

कुतः सर्वश्रुतेः सङ्कोच इत्याक्षिपति- **कुत इति** ॥ तत्परिहाराय सूत्रं पठित्वा प्रतिज्ञायाः पूर्वसूत्रेणैव प्राप्तत्वात् तमनुक्त्वा सौत्रहेतुं व्याचष्टे- **प्रकरणादिति** ॥ अस्य जीवप्रकरणत्वादित्यनेन सूत्रे जीवेत्यादौ ग्राह्यं भावप्रधानो निर्देश इत्युक्तं भवति। अयं हेतुसाधको हेतुः, साक्षाद्धेतुस्तु अत्रोच्यमानस्य जीवत्वादिति जीवपदसूचितः। **तादृगिति** ॥ जगद्व्यापारशक्तिरहितत्वादित्यर्थः। अयं च हेतुः साक्षाद्धेतोरप्रयोजकत्वशङ्कापरिहारकः। अत्रापि जीवत्वादित्येव हेतुः सोऽपि द्वितीयजीवपदेन सूचितः, अत एव सूत्रे हेतूनां समुच्चये चशब्दः प्रायोजि।

वाराहे च -

'स्वाधिकानन्दसम्प्राप्तौ सृष्ट्यादिव्यापृतिष्वपि।
मुक्तानां नैव कामः स्यादन्यान् कामांस्तु भुञ्जते ॥
तद्योग्यता नैव तेषां कदाचित् क्वापि विद्यते।
नचायोग्यं विमुक्तोऽपि प्राप्नुयान्नच कामयेत् ॥' इति ॥ १८॥

ननु संसरिजीवानां तादृक्सामर्थ्यविदूरत्वेऽपि सत्यकामानां मुक्तजीवानां तत् सम्भवत्यतो जीवत्वहेतुरसत्यकामत्वोपाधियुक्तोऽप्रयोजक इत्यतश्चशब्दसूचितां स्मृतिमुदाहरति- **वाराहे चेति** ॥ न केवलं सूत्र इति चार्थः। अयमर्थ उक्त इति शेषः। **स्वेति**। स्वयोग्यादधिकेत्यर्थः। अपिः समुच्चये। तुश्चार्थः। प्राप्तिश्च न

स्यादिति उक्तादन्यांस्तु कामयन्ते कामितांश्च भुञ्जत इत्यन्वयः । स्वाधिकेति उत्तराधिकरणोपयोगितयोक्तम्। कुतोऽकाम इत्यत आह- **तदिति** ॥ 'कदाचित् क्वापि' स्थाने अधिकानन्दे सृष्ट्यादिव्यापारे च 'तेषां' मुक्तानां 'योग्यता' सामर्थ्यं न विद्यत एव, यतोऽतो नैव कामः स्यादित्यन्वयः । नन्वयोग्यस्याप्य-प्राप्यकामौ कुतः, व्याप्यभावादित्यत आह- **नचेति** ॥ विशेषणान्तरसमुच्च-येऽपिः । तथाच सत्यकामोऽपीत्यर्थ इति केचित् । न केवलं संसारीत्यपरे । वस्तुतस्तु यः कोऽपीत्यर्थेऽपिशब्दः । अनेन व्याप्तिरुक्ता भवति । आद्यश्चोऽव-धारणे । द्वितीयः समुच्चये इति वाराह इत्यन्वयः । असत्यकामत्वं तु 'नैव योग्यता' इति स्मृत्या निश्चितसाध्यवति पक्षे अभावेन साध्याव्यापकत्वान्नोपाधि-रिति भावः ।

सू— ॐ ॥ प्रत्यक्षोपदेशादिति चेन्नाधिकारिक-मण्डलस्थोक्तेः ॥ ॐ ॥ १९ ॥

'ता यो वेद, स वेद ब्रह्म, सर्वेऽस्मै देवा बलिमावहन्ति' (तै.उ.१-५) इति प्रत्यक्षोपदेशाज्जगदैश्वर्यमप्यस्तीति चेन्न, आधिकारिकमण्डलाधिपतिर्ब्रह्मा हि तत्रोच्यते ।

मुक्तस्य जगदैश्वर्याभावमाक्षिप्य समादधत् सूत्रमुपन्यस्य पूर्वपक्षांशं व्याचष्टे-**प्रत्यक्षेति** ॥ इति वाक्ये प्रत्यक्षं स्फुटमेव मुक्तस्याखिलदेवतापूज्यत्व-प्रथमोत्पन्नत्वाद्युपदेशाच्छ्रवणादित्यर्थः । सूत्रेऽध्याहार्यां पूर्वपक्षप्रतिज्ञां दर्शयति-**जगदैश्वर्यमस्तीति** ॥ अशेषमुक्तानामित्युपस्कार्यम् । 'ता वा एताश्चतस्रश्चतुर्धा, चतस्रश्चतस्रो व्याहृतयः, ता यो वेद' (तै.उ. (१-५) इत्यादितैत्तिरीयश्रुते-रयमर्थः । भूर्भुवस्सुवर्महइति चतस्रो व्याहृतयः तच्छब्दवाच्याः लोकज्योतिः-प्राणवेदेषु स्थिता अनिरुद्धादिभगवद्रूपविशेषाः प्रत्येकमनिरुद्धादिभेदेन चतुर्धा

भवन्ति। ते तु अनिरुद्धानिरुद्धः अनिरुद्धप्रद्युम्नोऽनिरुद्धसङ्कर्षणोऽनिरुद्ध-वासुदेव इत्यादिरूपाः। ता एव चतस्रश्चतस्रः षोडशमूर्तयः। यथोक्तं तैत्तिरीयभाष्ये-

'लोकज्योतिः प्राणवेदेष्वेकः स पुरुषोत्तमः।
प्रत्येकशश्चातुरात्म्यात् षोडशात्मा प्रकीर्तितः॥' इति॥ (तै.भा. १.१०)

व्याहरणान्निमित्ताद् व्याहृतिशब्दिताः। 'ताः' मूर्तीर्यो वेद स एव परं ब्रह्म वेद। 'अस्मै' षोडशात्मविदे सर्वे देवाः 'बलिं' करम् 'आवहन्ति' प्रयच्छन्ति। सर्वदेवपूज्यो भवतीति यावदिति। परिहारांशं व्याचष्टे - **नेति**॥ नैतच्छ्रुतिबलेनाशेषमुक्तानां जगदैश्वर्यसिद्धिरित्यर्थः। कुतो नेत्यतः श्रुतावशेष-मुक्तामुक्तेरित्याशयेन आधिकारिकेति हेत्वंशं सावधारणं भावप्रधानत्वमावृत्तिं चाभिप्रेत्य व्याचष्टे– **आधिकारिकेति**॥ आधिकारिकमण्डलाधिपत्ये इत्यर्थः। प्रकारसमर्पकमिदं ब्रह्मेत्यनन्तरं योज्यम्। 'हि' यस्मात्। अत्राधिकारिकशब्दो यौगिको नतु आधिकारिका इति पुरुषविशेषसंज्ञा 'प्रजापाश्च तथा देवाः' इति वचनादिति प्रमेयदीपिकोक्तरीत्या रूढः। तथाच तत्रोदाहृतवाक्ये ये आधिकारिकाः स्वावरप्रेरणाधिकारे विष्णुना नियुक्ताश्चतुर्मुखेतरमुक्तदेवाः तेषां मण्डलं समूहः तत्र स्वामित्वेन तिष्ठतीति तत्स्थः तदधिपतिः तस्यैव मुक्तविरिञ्चस्यैव आधि-कारिकमण्डलस्थत्वस्यैव मुक्ताधिकारिकदेवतापूज्यत्वस्यैव उक्तेरिति हेत्वर्थ उक्तो भवति। 'ता यो वेद' इति श्रुतेः विरिञ्चपरत्वं 'माहाचमस्यः' (तै. उ. १-५) इत्युपक्रमात् सिद्धम्। माहाचमस्यशब्दश्च

'महाचमसनामाऽसौ यस्मादतिचमत्कृतिः।
माहाचमस्यस्तज्ज्ञानी ब्रह्मा सम्परिकीर्तितः॥' (तै.भा. १.१०)

इति तैत्तिरीयभाष्योदाहृतवचनाच्चतुर्मुखपरः। सूत्रे मुक्तदेवमण्डलेति वाच्ये अत्राधिकारिकेत्युक्तिर्मुक्तब्रह्मान्यदेवानामपि मुक्तस्वावरनियमनाधिकारित्व-मस्तीति सूचनायेति ध्येयम्।

गारुडे च -

'आत्मेत्येव परं देवमुपास्य हरिमव्ययम् ।
केचिदत्रैव मुच्यन्ते नोत्क्रामन्ति कदाचन ॥
अत्रैव च स्थितिस्तेषामन्तरिक्षे तु केचन ।
केचित् स्वर्गे महर्लोके जने तपसि चापरे ॥
केचित् सत्ये महाज्ञाना गच्छन्ति क्षीरसागरम् ।'

ननु मुक्तानां देवानां मुक्तस्वावरनियामकत्वं मुक्तहिरण्यगर्भस्य त्वशेष-मुक्तजीवनियामकत्वमित्येतत् कुत इत्यतः सौत्रोक्तिपदसूचितस्मृतिमुदाहरति– **गारुडे चेति ॥** चः समुच्चये । तथाच गारुडे पुराणेऽप्येषोऽर्थः कथित इत्यर्थः । पुराणवचनार्थस्तु – 'केचित्' एकगुणोपासनयोग्याः अत्यल्पा मानुषाः 'आत्मेति' आत्मत्वेनैव प्रकारेणाव्ययं परं देवं हरिमुपास्य अथ दृष्ट्वा प्रारब्धं कर्म भोगेन क्षपयित्वा 'अत्रैव' भूम्यादावेव देहबन्धान्मुच्यन्ते स्वरूपानन्दं चानुभवन्ति । ते कदाऽपि ब्रह्मनाड्या नाड्यन्तरेण वा नोत्क्रामन्ति किन्तु देहनाशपर्यन्तं देह एव स्थित्वा अथ मुक्तिं गच्छन्ति । 'तेषाम्' उत्क्रान्तिरहितानाम् 'अत्र' पृथिव्यादावेव निवासो भवतीति । 'तदोकः' इति वचनं तु -

'केचित्तु मानुषाः मुक्तिमनुत्क्रम्यैव देहतः ।
देहपाते तु देहस्य दोषान् भुक्त्वैव सर्वशः ॥

मरणोच्छूनतादींस्तु स्वकीयारब्धकर्मजान् ।
देहे जीर्णे तु गच्छन्ति दृष्ट्वा विष्णुमनुज्ञया ॥
पुनरत्रैव तिष्ठन्ति नित्यानन्दैकभोगिनः ॥' (बृ.भा. ५.२.३)

इति बृहद्भाष्योक्तैकगुणोपासकातिरिक्तविषयमिति न तद्विरोधः । स्मृतौ केचिदत्यल्पाः मानुषाः अपरोक्षज्ञानिनो देहपाते प्रत्यासन्ने स्वीयारब्धकर्मजान् **'मरणोच्छूनतादीन्'** मरणदेहोपचयादीन् देहस्य दोषान् 'सर्वशः' सर्वतो भुक्त्वैव

स्थिताः, अथ देहे जीर्णे देहतो ब्रह्मनाड्या नाड्यन्तरेण वाऽनुत्क्रम्यैव देहनाशपर्यन्तं तत्रैव स्थिताः । अथ प्रळये मुक्तिं लिङ्गभङ्गरूपां 'गच्छन्ति' प्राप्नुवन्ति । तदनन्तरं सकृच्छ्वेतद्वीपं गच्छन्ति । तत्र विष्णुं दृष्ट्वा तदनुज्ञया 'पुनरत्रैव' भूलोक एव नित्यानन्दैकभोगिनः 'सन्ति' तिष्ठन्तीति योजना । तत्वप्रदीपे तु 'नोत्क्रामन्ति' इत्यस्य सृष्टौ सकृच्छ्वेतद्वीपगमनात् परमस्माद् देहदेशान्नोत्क्रामन्तीत्यर्थः । अन्यथा 'बहुनात्र' इति वचनविरोधात् । 'तदोकोऽग्रज्वलनम्' इत्यादिना ज्ञानिनो देहदेशान्निर्गमनस्योक्तत्वाच्चेत्युक्तम्। तस्य- 'परम्' अनन्तरमस्मान्नोर्ध्वं गच्छन्ति । 'अन्यथा' कदाऽपि श्वेतद्वीपगमनात् पूर्वमपि नोत्क्रामन्तीत्यर्थाभ्युपगमे । नोत्क्रामन्तीत्यस्य ब्रह्मनाड्युत्क्रमणाभावार्थत्वं किं न स्यादित्यत आह- **तदोक इत्यादीत्यर्थः** ॥ अस्मिन् पक्षे 'तदोकः' इति सूत्रमेकानेकगुणोपासकज्ञानिसामान्यपरम् । बृहद्भाष्यं तु श्वेतद्वीपगमनात् परमस्माद् देहदेशादनुत्क्रम्यैवेत्यर्थकमिति ध्येयम् । केचित्तु- 'नोत्क्रामन्ति कदाचन' इत्यस्य इतरमुक्तवदेकवारं ब्रह्मनाड्योत्क्रमणेन मुक्तौ सत्यां पुनः स्वयोग्यस्थाने स्थित्यनन्तरं 'नोत्क्रामन्ति' नोर्ध्वं गच्छन्तीत्यर्थमाश्रित्य अत एव 'अत्रैव च स्थितिस्तेषामन्तरिक्षे च केचन' इत्युक्तम् । अन्यथा लिङ्गशरीरभङ्गाभावान्मुक्तिरेव तेषां न स्यादिति तत्वप्रदीपरीत्यैवाऽर्थमाहुः । 'आत्मेत्येवोपास्व' इति वचनस्य 'आनन्दादयः प्रधानस्य' इत्युक्तिविरोधपरिहारस्तु तस्याश्चतुर्विधमोक्षार्थचतुर्गुणोपासकविषयत्वात्, अस्याश्च कतिपयमोक्षयोग्यैकगुणोपासकविषयत्वाद् भिन्नविषयत्वेन विरोधाभावादिति तत्रैव कृतः । केचित्तु- आत्मेत्युपलक्षणम् । आनन्दादयोऽपि ग्राह्याः । एकगुणोपासकविषयकल्पनया समाधानटीका तु 'अस्तु वा ज्ञातता' इत्यादिवत् प्रौढवादेनैव प्रवृत्ता नाभ्युपगमवादेनेत्याहुः । तन्न, आनन्दमालायाम्- 'अथ चतुर्गुणोपास्तेरशक्यत्वे आनन्दादीनाम् आत्मत्वगुणैकीकारेणापि कथञ्चिदुपास्तिरस्ति, तथाच सच्चिदानन्दो विष्णुरात्मेत्युपास्य इत्यन्वयः' इत्युक्तिविरोधात् । 'तेषु मोक्षोऽपि भवेन्मानुषाणां विशेषिणाम्' इति छान्दोग्यभाष्योक्ते-

रेकगुणोपासनाख्यविशेषवतां मनुष्याणां भूर्भुवस्स्वराख्यलोकप्राप्तिः सिद्धा। तत्र भूलोकस्था उक्ताः। भुवस्स्वर्गस्थमुक्तानाह- **अन्तरिक्षे त्वित्यादिना**॥ तुशब्दोऽप्यर्थः। 'केचन' पूर्वोक्ता उत्तमा मनुष्याः। मुच्यन्त इत्यन्तमुभयत्राप्यनुषज्यते। नोत्क्रामन्तीत्येतत्तु पूर्वत्रैव योज्यम्। एवं किमुशब्दैरुक्तानां मनुष्याणां स्थितिमुक्त्वा तेभ्योऽधिकानां स्थितिमाह- **महरिति**॥ 'जने' जनलोके 'तपसि' तपोलोके। चः समुच्चये। सत्ये सत्यलोके। सर्वत्र मुच्यन्त इत्यनुषज्यते। 'महाज्ञानाः' बहुकालं ब्रह्मदर्शिनः अप्रतीकालम्बनाख्याः बहुगुणोपासकास्तु 'क्षीरसागरं' तत्रत्यश्वेतद्वीपं गच्छन्तीत्यर्थः। उपलक्षणमेतत्। तिष्ठन्तीत्यपि द्रष्टव्यम्। नचात्रैव मुच्यन्ते, 'अत्रैव च स्थितिस्तेषाम्', 'महाज्ञाना गच्छन्ति क्षीरसागरम्' इत्युक्त्या महाज्ञानातिरिक्तानामेकगुणोपासकादीनां श्वेतद्वीपागमनप्राप्तेः।

'बहुनाऽत्र किमुक्तेन यावच्छ्वेतं न गच्छति।
योगी तावन्न मुक्तः स्यात् ..... ॥'

इत्यत्र च सर्वेषां श्वेतद्वीपगमनोक्तेर्विरोध इति वाच्यम्। सर्वेषामपि सकृच्छ्वेतद्वीपगमनाभ्युपगमात्। तथाचाण्डलयकाले स्वोत्तमप्रवेशेनोर्ध्वं गताः भग्नलिङ्गाः सकृच्छ्वेतद्वीपं गत्वा पुनर्धरादिकमागत्यानन्तरमत्रैव तिष्ठन्तीत्याशयेन 'अत्रैव च स्थितिः' इत्याद्युक्तिरित्युक्तं भवति। उक्तं हि छान्दोग्यभाष्ये-

'श्वेतद्वीपं ततो गत्वा दृष्ट्वा विष्णुं च तेन ते।
अनुज्ञाताः प्रमोदन्ते निर्दुःखास्तु धरादिषु॥' इति।

ननु गीताभाष्ये- 'ये त्वत्रैव भगवन्तं प्रविशन्ति तेऽपि पश्चात् तत्र यान्ति योग्यत्वं चात्र विवक्षितम्' इत्युक्तेः सर्वेषां श्वेतद्वीपगमने तद्विरोधः स्यादिति चेन्न, तस्य क्षीराब्धावस्थानाय योग्यत्वं विवक्षितमित्येतदर्थकत्वात्। अत एव प्रमेयदीपिकायामत्रेत्यनन्तरं निवास इति शेषः कृतः। तथा च महाज्ञानित्वलक्षणयोग्यत्वं चात्र क्षीराब्धिगतश्वेतद्वीपे निवासे तदर्थं विवक्षितम्, नतु गतिमात्र इति तद्वाक्यार्थाभ्युपगमान्न विरोध इति ध्येयम्।

'तत्रापि क्रमयोगेन ज्ञानाधिक्यात् समीपगाः ।
सालोक्यं च सरूपत्वं सामीप्यं योग (मे)एव च ॥
इमामारभ्य सर्वत्र यावत्सुक्षीरसागरे ।
पुरुषोऽनन्तशयनः श्रीमान्नारायणाभिधः ॥'

श्वेतद्वीपेऽपि मुहूर्ताधिकज्ञानित्वरूपमहाज्ञानित्ववतां न साम्यमित्याह- **तत्रापीति** ॥ श्वेतद्वीपेऽपि महाज्ञानिष्वपीत्यर्थः । **क्रमेति** ॥ क्रमस्तारतम्यं स एव योग उपायस्तेनेत्यर्थः । इदं चोभयत्रान्वीयते । तथाच क्रमयोगेन ज्ञानाधिक्यात् ज्ञाने आधिक्ये तारतम्याख्योपायात् तदनुसारेण महाज्ञानाः क्रमयोगेन 'आदग्नासः' (ऋ. १०-७१-७) इत्याद्युक्तरीत्या 'समीपगाः' भगवत्समीपवर्तिन इत्यर्थः । ननु भूम्यादिषु मुक्तानां स्थितौ न मोक्षोऽयं स्यात् सालोक्यादिचातुर्विध्या-नन्तर्भावादित्यत आह– **सालोक्यं चेति** ॥ समानलोकस्थत्वं सालोक्यं समीप-स्थत्वं सामीप्यं चतुर्भुजत्वादिरूपसाम्यं सारूप्यं भगवदङ्गप्रवेशः सायुज्यं योग एव चेत्येवशब्दस्यास्तीत्यध्याहृतेनान्वयः । चः समुच्चये । इमामिति वाक्ये उक्तक्रमेण तावत्स्विति पदे अध्याहार्ये । तथाच 'इमां पृथिवीमारभ्य केचनात्रैव मुच्यन्ते, केचनान्तरिक्षे, केचित् स्वर्गे महर्लोके जने तपसि चापरे । केचित् सत्ये महाज्ञाना गच्छन्ति क्षीरसागरम् ।

इत्याद्युक्तक्रमेण यावात्सु स्थानेषु श्रीमन्नारायणाभिधोऽनन्तशयनः पुरुषोऽस्ति 'तावत्सु' सर्वत्र स्थानेष्वपि सालोक्यं समीपत्वं च सारूप्यं योगश्चास्त्येवेति योजना । केचित्तु यावत् सुक्षीरसागर इति पदविभागं कृत्वा शोभने क्षीरसागरे यावन्नारायणाभिधः तावदिमामारभ्य सर्वत्र सालोक्याद्यस्तीत्यर्थमाहुः । तथाचेश्वरस्य सर्वदा सर्वत्रावस्थानात् भूम्यादिषु मुक्तानामपि भगवत्सामीप्यादिरूपो मोक्षो युक्त इति भावः । नचैतावताऽत्रैव मुक्तानां सायुज्याद्यप्यस्तीति मन्तव्याम् । यदि चतुर्मुखाद्याः पृथिव्यादिमुक्तस्थानं प्रति आगच्छन्ति, तदा तेषां तत्रस्थभगवत्सायुज्याद्यप्यस्तीत्यर्थोपपत्तेः ।

'मानुषा वर्णभेदेन तथैवाश्रमभेदतः ।
क्षितिपा मनुष्यगन्धर्वा देवाश्च पितरश्चिराः ॥
आजानजाः कर्मजाश्च तात्विकाश्च शचीपतिः ।
रुद्रो ब्रह्मेति क्रमशस्तेषु चैवोत्तरोत्तराः (त्तमोत्तमाः)॥
नित्यानन्दे च भोगे च ज्ञानैश्वर्यगुणेषु च ।
सर्वे शतगुणोद्रिक्ताः पूर्वस्मादुत्तरोत्तरम् ॥
पूज्यन्ते चावरैस्ते तु सर्वपूज्यश्चतुर्मुखः ।
स्वजगद्व्यापृतिस्तेषां पूर्ववत् समुदीरिता ॥'

ननु मानुषाः सर्वेऽप्येकविधाः, तथाच कथं तत्र केचन भूमौ, केचनान्तरिक्षे, केचित् स्वर्गे, इत्येवंरूपावान्तरभेदः सम्भवतीत्यतो वर्णाश्रमभेदेन तेषां बाहुविध्यं प्रदर्शयन् क्रमयोगेनेत्युक्तं मुक्तानां तारतम्यं च दर्शयति- **मानुषा इत्यादिना ॥** 'वर्णाः' ब्रह्मक्षत्रादयः 'आश्रमाः' ब्रह्मचर्यादयः मुक्तौ सन्तीति शेषः । 'क्षितिपाः' चक्रवर्तिनः 'देवाः' देवगन्धर्वाः 'चिराः पितरः' इति सामानाधिकरण्यम् । 'आजानजाः' अनाख्यातदेवाः 'कर्मजाः' कर्मणा देवत्वं प्राप्ताः बल्याद्याः कार्तवीर्याद्याश्च 'तात्विकाः' तत्वाभिमानिनो बृहस्पत्यादयः, देवा इत्यनुषज्यते । 'शचीपतिः' इन्द्रः 'रुद्रः' शेषः 'ब्रह्मा' हिरण्यगर्भ इत्येते क्रमशः क्रमेण 'पूर्वस्मात्' पूर्वपूर्वनिर्दिष्टात् 'उत्तरोत्तराः' उत्तमोत्तमा इति सम्बन्धः । एवं स्वरूपे तारतम्यमुक्त्वा गुणेषु तदाह- **'तेषु'** उक्तेषु मध्य इति । नित्यानन्दे भोगे ज्ञानैश्वर्यरूपगुणेषु सर्वेऽपि 'पूर्वस्मात्' पूर्वपूर्वतः 'उत्तरोत्तरं' पश्चात् पश्चान्निर्दिष्टाः शतगुणोत्कृष्टा इत्यर्थः । शतशब्दो बहुवाची । द्वितीयगुणशब्दो गणनापरः । यदर्थं तारतम्यमुक्तं तन्मुक्तानां स्वावरपूज्यत्वम्, चतुर्मुखस्य सर्वपूज्यत्वमिदानीमाह- **पूज्यन्ते इति ॥** 'ते' मुक्ताः । सर्वपूज्य इति । ईशलक्ष्मीव्यतिरिक्तसर्वपूज्य इत्यर्थः । न केवलं स्वावरपूज्यत्वमात्रं तेषां, किन्तु स्वजगद्व्यापृतिश्चास्तीत्याह- **स्वेति ॥** 'तेषां' मुक्तानां स्वप्रतिबिम्बभूतमुक्तजीवेषु व्यापारश्चास्तीति तत्वप्रदीपदिशाऽ-

स्यार्थो ज्ञातव्यः । अत्राधममुक्तेषु उत्तमानां व्यापारो नाम सतीपतिन्यायेन बहिः स्थित्वा नियामकत्वम्, अन्तः स्थित्वा नियामकस्तु मुख्यप्राण एव । यथोक्तं छान्दोग्यभाष्ये- 'तुरीयायामवस्थायां प्राणादेव निबोधनम् ।' इति । मोक्षावस्थायामित्यर्थः । 'पूर्ववत्' संसार इव यथा संसारे स्वजगद्व्यापृतिस्तथेत्यर्थः ।

'सयुजः परमात्मानं प्रविश्य च बहिर्गताः ।
चिद्रूपान् प्राकृतांश्चापि विना भोगांस्तु कांश्चन ॥
भुञ्जते मुक्तिरेवं ते विस्पष्टं समुदाहृता ॥' इति ॥ १९ ॥

मानुषादिभ्यो देवाः श्रेष्ठाः योगशब्दोक्तसायुज्यभाक्त्वात्, तेषु चतुर्मुखः श्रेष्ठ इत्युक्तं, तद् विवरीतुं तेषाम् ऐक्यशङ्कां च वारयितुं सयुजां महिमानमाह- **सयुज इति ॥** सयुजः परमात्मानं प्रविश्य कदाचिद् बहिर्गताश्च भवन्ति । तत्र चिद्रूपान् प्राकृतान् अबन्धकशुद्धसत्त्वात्मकान् कांश्चन भोगान् स्वोत्तमैकभोग्यान् विना अन्यान् चिद्रूपान् प्राकृतांश्च भोगान् भुञ्जते इत्यर्थः । यद्वा- कांश्चन लक्ष्म्यात्मकान् स्वोत्तमरूपांश्च चिद्रूपान् प्राकृतानपि भगवदसाधारणभोग्यगन्धार्दीश्च विना स्वयोग्यभोगान् भुञ्जते इत्यर्थः । निगमयति- **एवमिति ॥** एवं क्रमेण 'विस्पष्टम्' अतिस्पष्टं मुक्तिस्ते 'समुदाहृता' अभिहितेत्यर्थः । मयेति शेषः । नारदं प्रति ब्रह्मवाक्यमेतत् । इति गारुडे इत्यन्वयः ।

सू – ॐ ॥ विकारावर्ति च तथाहि दर्शयति ॥ ॐ ॥ २० ॥

विकारावर्तिव्यापारो मुक्तानां न विद्यते 'इमं मानवमावर्तं नावर्तन्ते ' (छा. ४-१५-६) इति हि श्रुतिः ।

ननु ब्रह्मादिमुक्तानां मुक्तजगद्व्यापार एव कुतः, अमुक्तजगद्विषयोऽपि किं न स्यादित्याशङ्कां परिहरत् सूत्रं पठति– **विकारेति ॥** अत्र चशब्दो नञनुषङ्गार्थः । विकारावर्तीति नपुंसकं पदम् । मुक्तानामिति शेषः । तथा च विविधाकार-

त्वान्मनोविकारदुःखमूलत्वाद् वा विकारशब्दितं संसारमावर्तयति प्रवर्तयतीति 'विकारावर्ति' संसारविषयकव्यापारणं मुक्तानां न विद्यते। यद्वा- विकारपदं प्रकृतिविकारशरीराभिमानिसंसारिपरम्, तमावर्तयतीति विकारावर्ति मुक्तानां न विद्यते। कुतो ? 'हि' यस्मात् तथा श्रुतिः 'दर्शयति' प्रतिपादयतीति योजनामभिप्रेत्य सूत्रं व्याचष्टे- **विकारेति** ॥ व्यापार इति लब्धार्थकथनम् 'हि' यस्माच्छ्रुतिर्दर्शयतीति शेषः। मानवाः मनुष्याः यत्रावर्तन्ते जन्ममृत्यादि प्राप्नुवन्ति स मानवावर्तः संसारः। अधिकरणे घञ्, तत्पुरुषोऽयम्, मुमागमश्छान्दस इति केचित्। छान्दोग्यव्यासतीर्थीये तु मानवमावर्तमिति अलुक्समास इत्युक्तम्। एतत्पक्षे द्वितीयायाः षष्ठ्यर्थत्वमभिप्रेतम्। तं प्रति 'नावर्तन्ते न प्रवर्तयन्ती-त्यर्थः। तत्वप्रदीपे तु मानवं मनुष्यसम्बन्धिनम् 'आवर्तं' संसारमिति भिन्नपदत्वाभिप्रायेण श्रुतिर्व्याख्याता। तथा प्रकृतिविकारशरीराद्यभिमानिषु जन्ममृत्यादिविकारवत्सु संसारिषु मुक्तानां व्यापारणम् आवृत्तिस्तेषां तद्व्यापारो न विद्यत इति यावदिति सूत्रार्थ उक्तः। एतत्पक्षे चस्त्वर्थः एवार्थस्मृतिसूचको वाऽवगन्तव्यः।

वाराहे च -

'स्वाधिकारेण वर्तन्ते देवा मुक्तावपि स्फुटम्।
वलिं हरन्ति मुक्ताय विरिञ्चाय (च) तु पूर्ववत्॥
सब्रह्मकास्तु ते देवा विष्णवे च विशेषतः।
न विकाराधिकारस्तु मुक्तानामन्य एव तु।
विकाराधिकृता ज्ञेया ये नियुक्तास्तु विष्णुना॥' इति॥२०॥

ननु मुक्तदेवानाममुक्तविषयव्यापाराभावे संसारावस्थानमेव न स्यात् प्रवर्त-काभावादित्याशङ्कां परिहर्तुमुक्तार्थे चशब्दसूचितां स्मृतिमुदाहरति- **वाराहे चेति** ॥ न केवलं श्रुतिर्दर्शयति, किन्तु वाराहेऽप्येवं श्रुतिरस्तीति चार्थः। 'स्वाधिकारेण' स्वस्वयोग्यतानुसारेण, यद्वा- स्वस्वाधिपत्येन युक्ता वा वर्तन्त

इत्यर्थः। अपिः समुच्चये। 'स्फुटं' प्रत्यक्षम्। नतु रहस्यतयेति भावः। 'बलिं' करं 'हरन्ति' प्रयच्छन्ति 'पूर्ववत्' संसारे यथा। 'सब्रह्मकाः' सविरिञ्चा देवास्त्वित्यन्वयः। 'विशेषतः' आधिक्येन बलिं हरन्तीति च वर्तते। अत एव वाक्यभेदकस्तुशब्दः। चः समुच्चये। नेति। मुक्तानां 'विकाराधिकारः' संसारप्रवर्तकत्वं तु न विद्यत इत्यर्थः। तर्हि कस्मात् संसारप्रवृत्तिर्न स्यादित्यत आह – **अन्य इति**॥ तुरेव। तथाच ये मुक्तेभ्योऽन्ये विष्णुना नियुक्तास्त एव संसाराख्यविकाराधिकृतास्तत्प्रवर्तकाः विज्ञेया इत्यर्थः। इति वाराह इत्यन्वयः।

॥ इति जगद्व्यापाराधिकरणम् ॥ ९ ॥

॥ १०. स्थित्यधिकरणम् ॥

(मौक्तानन्दे प्रायः वृद्धिह्रासौ न स्तः। भगवदुपासना तु सुखरूपिणी न साधनभूता)

सू — ॐ ॥ स्थितिमाह दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ ॐ ॥ २१ ॥

'एतत् साम गायन्नास्ते' (तै.उ. ३-१०) इत्युच्यते। तत्रानन्दादीनां वृद्धिह्रासश्च न विद्यते। किन्त्वेकप्रकारेणैव सर्वदा स्थितिः। 'स एप एतस्मिन् ब्रह्मणि सम्पन्नो न जायते न म्रियते न हीयते न वर्धते स्थित एव सर्वदा भवति दर्शन्नेव ब्रह्म दर्शन्नेवात्मानं तस्यैवं दर्शयतो नापत्तिर्न विपत्तिः' इति ह्याह जाबालश्रुतौ।

'यत्र गत्वा न म्रियते यत्र गत्वा न जायते।
न हीयते यत्र गत्वा यत्र गत्वा न वर्धते।'

इति मोक्षधर्मे। विद्वत्प्रत्यक्षात् कारणाभावलिङ्गाच्च।

अत्राधिकरणे ब्रह्मप्राप्तानां मुक्तानां भोगादिना वृद्धिर्ह्रासश्च निराक्रियते। अस्त्येव मुक्तस्यानन्दवृद्ध्यादीति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्यति- स्थितिमिति ॥ अत्रैवंचेति चशब्दोऽप्यर्थोऽवधारणार्थश्च नञनुषङ्गार्थो वा। तत्रेति शेषः। स्थितिमित्यावर्तते। तत्रैकस्य विपरिणामः। तथाच 'एतत्' इति श्रुतिर्यद्यपि तत्र मुक्तावुपासनम् 'आह' एवमपि तथापि यतस्स एष इति श्रुतिः मुक्तस्य स्थितिमेकप्रकारेणैवावस्थानमाह वक्ति न केवलं श्रुतिरेवमाह, किन्तु, 'प्रत्यक्षानुमाने' महतां प्रत्यक्षं मुक्तो न वृध्यादिमान् तत्कारणशून्यत्वात्' इत्यनुमानं चैवमेकप्रकारेण स्थितिं दर्शयतो ज्ञापयतोऽतो मुक्तस्यैवमेव वृद्धिह्रासशून्यतयैव स्थितिर्युक्ता न तु वृद्धिह्रासवत्त्वमिति योजनामभिप्रेत्य सूत्रं व्याचष्टे- एत- दिति ॥ 'इति' इत्यादिना। यद्यपीत्यादावुपस्कार्यम्। तथाच यद्यपि 'एतत् साम गायन्' इत्यादिना तत्र मुक्तौ तस्य मुक्तस्य तद्भगवदुपासनं सामगायनाख्य- मुच्यते। तथापि न तस्यानन्दबलज्ञानादीनां वृद्धिह्रासौ विद्येते किन्त्वेकप्रकारेणैव सर्वदा स्थितिः। कुतो ? यतः 'स एषः' इति जाबालश्रुतौ 'नापत्तिर्न विपत्तिः' इत्याह वेदपुरुषः। प्रथमार्थे सप्तमी वा। एवं श्रुतिसमाख्यारूपे 'यत्र गत्वा' इत्यादिमोक्षधर्मेऽपि न हीयते न वर्धत इत्याह व्यासः। यतश्च 'विद्वत्प्रत्यक्षात्' विदुषां महतां प्रत्यक्षात्, कारणशून्यत्वलिङ्गाच्चैतत् सिद्धमत इति योजना। श्रुत्यर्थस्तु - यः 'एतस्मिन्' मोक्षे 'ब्रह्मणि' विष्णौ 'सम्पन्नः' तं प्राप्तः 'स एषः' मुक्तः देहतोऽपि न जायते न म्रियते। न केवलं संसार इव स्वरूपत इत्यध्याहृतवाक्यगताऽपिशब्दार्थः। न केवलमेतावत्, किन्तु आनन्दादिगुणतोऽपि 'न हीयते' न ह्रसते, न वर्धते, किन्तु सदा एकप्रकारेण स्थित एव भवति स मुक्तः। यद्यपि ब्रह्म दर्शन्नुत्कृष्टमिति पश्यन्नुपासीन एवमात्मानं स्वामीति च दर्शन्नुपासीन आस्ते, तथाचोपासनरूपकारणाद् वृद्ध्यादि-प्रसक्तिरस्ति। तथापि एवं दर्शयतः' पश्यतः उदासीनस्य तस्य मुक्तस्य 'नापत्तिः' न वृद्धिः 'न विपत्तिः' न ह्रासश्चास्तीति। यथोक्तं तत्वप्रदीपे- आपत्तिरविद्यमानस्यागमः। विपत्तिर्विद्यमानस्यापगमः। इति श्रुतौ तस्यैवं दर्शयत इत्यनुवादे न

दर्शयतश्चोपासनस्यापि स्थितिमाह श्रुतिरिति। दर्शयत इत्यस्यावृत्त्या सूत्रयोजना दर्शिता। स्मृतौ न जायते न म्रियते देहत इति शेषः। न हीयते न वर्धते गुणत इति चाध्याहारः। यच्छब्दस्य स मोक्ष इति तत्रत्यतच्छब्देनान्वयः। श्रुतिस्मृत्योर्जननमरणयोर्व्यत्यस्तोक्तिः तयोरनियतक्रमत्वज्ञापनार्था॥

ब्रह्मवैवर्ते च –

'न ह्रासो नच वृद्धिर्वा मुक्तानां विद्यते क्वचित्।
विद्वत्प्रत्यक्षसिद्धत्वात् कारणाभावतोऽनुमा॥
हरेरुपासना चात्र सदैव सुखरूपिणी।
नतु साधनभूता सा सिद्धिरेवात्र सा यतः॥' इति॥ २१॥

परप्रत्यक्षस्याप्रत्यक्षत्वात् कथं तेनास्माकमर्थसिद्धिरित्यतो विद्वत्प्रत्यक्षानुमाने दर्शयत इत्युक्तार्थे स्मृतिं चाह - **ब्रह्मवैवर्ते चेति**॥ चः समुच्चये। 'मुक्तानां' मुक्तगुणानां क्वचित् काले विद्वत्प्रत्यक्षसिद्धत्वात् वृद्ध्याद्यभावस्येति शेषः। कारणाभावत इति सार्वविभक्तिकस्तसिः। 'यतोयतो धावति' इत्यादिवत्। तथाच वृद्ध्यादिकारणाभावरूपानुमानं चास्मिन् विषयेऽस्तीत्यर्थः। यतः इति शेषः। यद्वा- कारणाभावतो लिङ्गादनुमाऽनुमितिरत्र विषये साधकतया प्रवर्तते यत इत्यर्थः। ननूपासनाख्यकारणसद्भावात् कथं तदभाव इत्यत आह - **हरे-रिति**॥ कर्मणि षष्ठीयम्। 'अत्र' मुक्तौ स्थिता मुक्तैः क्रियमाणेति यावत्। चस्त्वर्थः। सदैव हरेरेव सुखरूपिण्येव यतोऽतो न साधनभूतेत्यन्वयः। ननु कुतः सुखरूपत्वं, तत्साधनत्वमिति किं न स्यादित्यत आह- **सिद्धिरेवेति**॥ अत्र सेत्यनुवर्तते। पुनः अत्रसेत्येकं पदम्। तथाच 'अत्र' मुक्तौ सा उपासना यतः 'अत्रसा' भयरहिता सिद्धिरेव मोक्षफलरूपैवातः सुखरूपैव न तत्साधनभूतेत्यर्थः। मुक्तेरभयत्वं च 'अथ सोऽभयं गतो भवति' (तै.उ.२-७) इति श्रुतिसिद्धम्। हरेरित्यादिना दर्शयतश्चेत्यनेन यदुपासनस्य वृद्ध्याद्यकारणत्वमुक्तं योजनान्तरे तत् स्पष्टीकृतं भवति।

सू — ॐ ॥ भोगमात्रसाम्यलिङ्गाच्च ॥ ॐ ॥ २२ ॥

नच भोगविशेषादिविरोधः । 'एतमानन्दमयमात्मानमनुविश्य न जायते न म्रियते न ह्रसते न वर्धते यथाकामं चरति यथाकामं पिबति यथाकामं रमते यथाकाममुपरमते' (तै.उ.२-८) इति भोगमात्रसाम्यलिङ्गात् ।

ननु न मुक्तानां वृद्ध्यादौ कारणाभावः, भोगविशेषसद्भावात्, कारणाभावाभ्युपगमे च प्रामाणिकभोगविशेषविरोधापातादित्याशङ्कां परिहरत् सूत्रं पंठति- **भोगेति** ॥ अत्र चशब्दोऽवधारणार्थो नञनुकर्षकश्च । स चावर्तते । मात्रशब्दात् परो विशेषशब्दोऽध्याहृत्य योजनीयः । तथा च न मुक्तस्य वृद्ध्यादिकारणाभावाभ्युपगमे भोगविशेषादिविरोधः । कुतः ? यतो मुक्तभोगविशेषादिस्तदानन्दादिवृद्धिह्रासकारणं न, कुत एतत् ज्ञायते ? 'भोगमात्रविशेषसाम्यलिङ्गात्' भोगमात्रस्य च रमणपानाद्यनेकविशेषयुक्तभोगसामान्यस्य 'एतमानन्दमयम्' इति श्रुतौ रमते उपरमत इति विषयभोगभावाभावोक्त्या सूचिते भोगविशेषे तदभावे च सत्यपि यन्मुक्तस्वरूपानन्दादेर्न ह्रसते न वर्धत इत्युक्तं वृद्ध्यादिशून्यत्वरूपं साम्यमेतस्मादेव लिङ्गाद् भोगमात्रविशेषस्य मौक्तानन्दवृद्ध्याद्यकारणत्वज्ञापकाद् भोगविशेषादेर्वृद्ध्याद्यकारणत्वं विना तस्मिन् सति कार्याभावरूपान्वयव्यभिचारस्यानुपपत्तेरिति भाव इति रूपाल्लिङ्गान्न भोगविशेषो वृद्ध्यादिकारणम् । न्यायामृतोक्तरीत्या यदि भोगविशेषः आनन्दादिवृद्ध्यादिकारणं तर्हि भोगसामान्य एव साम्यमुच्येत, नतु तद्विशेषेऽपि । अतो भोगमात्र इव तद्विशेषेऽपि साम्योक्तिः कारणमिति वा सूत्रवृत्तिमभिप्रेत्य तद् व्याचष्टे- **नचेति** ॥ मुक्तस्य वृद्ध्यादिकारणाभावाभ्युपगम इत्यादावुपस्कार्यम् । भोगविशेषो भोगातिशयः आदिपदेन भोगाभाव उच्यते । तस्य विरोधोऽनुपपत्तिः । विरोध इत्यन्तेन चशब्दानुकृष्टनञर्थ उक्तो भवति । कुतो नेत्यतस्तत्र नेत्यस्यावृत्त्या यतो न भोगविशेषादिस्तद् ।वृद्ध्यादौ कारणमिति सूचितश्चशब्दसमुच्चितो

हेतुरन्वेतव्यः । भोगविशेषादेर्वृद्ध्याद्यकारणत्वं कुतो ज्ञायत इत्यतस्तत्र 'एतमानन्दमयम्' इत्यारभ्य लिङ्गादित्यन्तो हेतुर्योज्यः । सायुज्यमुक्तः 'आनन्दमयम्' आनन्दपूर्णमेतं परमात्मानं प्रविश्य पुनर्देहतो न जायते न म्रियते गुणतो न ह्रसते न वर्धते 'यथाकामं' यथेच्छं 'चरति' भक्षयति पिबति चेत्यर्थः । रमते उपरमत इत्याभ्यां भोगविशेषतदभावावुच्येते । इति श्रुताविति शेषः । भोगमात्रेति हेतुवाक्यार्थः पूर्ववत् ।

'अवृद्धिह्रासरूपत्वं मुक्तानां प्रायिकं भवेत् ।
कादाचित्कविशेषस्तु नैव तेषां निषिद्ध्यते ॥'

इति च कौर्मे ॥

ननु यदि भोगो न वृद्धिहेतुस्तर्हि व्यर्थोऽसौ किमिति मुक्तैः क्रियत इत्यतः क्रीडयेति परिहारे स्थिते मुक्तविरिञ्चेतरमुक्तानां चशब्दसूचितं विशेषं चाह – **अवृद्धीति ॥** वृद्धिह्रासरहितज्ञानादिधर्मवत्त्वमित्यर्थः । 'मुक्तानां' विरिञ्चेतरमुक्तानाम् । यथोक्तमुनुव्याख्याने –

'मुक्तानां तु तदन्येषां समुद्रतरलोपमा ॥' इति ॥

व्याख्यातं चैतत् सुधायाम् –

ब्रह्मण इति विशिष्याभिधाने को हेतुरित्यत आह– **मुक्तानां त्विति ॥** विशेषबलेन वृद्धिह्रासवतीत्यर्थः । यथोक्तम्– 'अवृद्धिह्रासरूपत्वम्' इत्यादि इति । अत्र मतिविवक्षया स्त्रीलिङ्गनिर्देशः । आदिशब्देन प्रवाहत इति वचनं गृह्यते । भोगादिना तर्हि किञ्चिद्वृद्धिविरोध इत्यत आह– **प्रायिकमिति ॥** बाहुल्येन सार्वकालिकमित्यर्थः । प्रायिकमित्युक्तेः कृत्यमाह–**कादाचित्केति ॥** विशेषो वृद्ध्यादिः । 'तेषां विरिञ्चेतरमुक्तानां 'नैव निषिध्यते' किन्त्वङ्गीक्रियत इत्यर्थः । अवृद्धिह्रासरूपत्वहान्यापादकत्वाभावादिति भावः । केचित्तु– मुक्तानामित्यस्य यथाश्रुत एवार्थो न विरिञ्चेतरेषामिति । 'कादाचित्कविशेष इत्यादेस्तु मुक्तौ तत्तत्कालीनभोगबाहुल्येन आनन्दे कश्चिद् विशेषो नैव निषिध्यते

इत्यर्थः। नचाणुभाष्यविरोधः, तत्र तदन्येषामित्युक्तेरिति वाच्यम्। तत्र चतुर्मुखस्य सर्वज्ञत्वेन तज्ज्ञाने विशेषाभावस्योक्तत्वात्। यदा दक्षिणानामपि सुखविशेष उक्तस्तदा सुतरां चतुर्मुखस्य सुखविशेष इत्याहुः। तत्र 'अवृद्धि' इत्यादिवचनस्य धर्मसामान्यवाचिरूपशब्दघटितत्वेन आनन्दवज्ज्ञानेऽपि कादाचित्कविशेष-प्रतिपादकत्वात्। द्वितीये कुत्रचिदित्युक्त्या ज्ञानस्यापि लब्धत्वात्। अन्यथा सुधायां सम्मतित्वेनोदाहरणविरोधात्। कौर्मे विशेष उक्त इति शेषः।

'प्रवाहतस्तु वृद्धिर्वा ह्रासो वा नैव कुत्रचित्।
नाप्रियं किञ्चिदपि तु मुक्तानां विद्यते क्वचित्॥
कुत एव तु दुःखं स्यात् सुखमेव सदोदितम्।
भोगानां तु विशेषेषु वैचित्र्यं लभ्यते क्वचित्॥'
इति च नारायणतन्त्रे॥ २२॥

तर्हि 'न हीयते यत्र गत्वा' (मोक्षधर्मे) इत्यादेः का गतिरित्यतो यदुक्तं मुक्तानां प्रायिकम् अवृद्धिह्रासरूपत्वमिति तदेव स्मृत्यन्तरेण विवृणोति– **प्रवाहत इति॥** यथा कावेर्यादिप्रवाहस्य कदाचिद्वृद्धिः कदाचिद् ह्रासः, एवं मुक्तानां 'कुत्रचित्' स्वगुणादौ'प्रवाहतः' सामग्र्येण कदाचिद्वृद्धिः ह्रासो वा नास्ती-त्यर्थः। यद्वा- प्रायस्तेषां गुणेषु वृद्धिर्नास्त्येव, भोगादिना तु केषाञ्चित् किञ्चित् वृद्धिर्भवति, सा च प्रवाहतोऽनन्तकालीनेति न दोषः। अत एव 'न हास्य कर्म क्षीयते' (बृ. ३-४-१५) इत्याह। ह्रासस्तु मुक्तानां 'कुत्रचित्' गुणे 'क्वचित्' कालेऽपि सर्वथा नास्त्येव। एवं किञ्चिदप्यप्रियं न विद्यत एव, दुःखं तु कुतः स्यात्। किन्तु 'सदोदितं' व्यक्तं सुखमेव स्यादित्यर्थः। 'अस्माद्धचेवात्मनः' (बृ. ३-४-१५) इति श्रुतिविरोधमाशङ्क्याह– **भोगानां त्विति॥** सुखे इति विशेषणमस्ति। तथाच भोगानां 'विशेषेषु' वैचित्र्येषु सत्सु 'सुखे' आनन्दे 'किञ्चिद्वैचित्र्यं' विशेषो 'लभ्यते' सिद्ध्यतीत्यर्थः। तथा च यथैकस्यैव सुवर्ण-स्याङ्गुलीयकात्मकत्वं कुण्डलात्मकत्वं च तथा चूतफलभक्षणादिप्रयुक्तो यो

आनन्दविशेषस्तदात्मकत्वरूपवैचित्र्यमेक एव व्यक्तानन्दो लभ्यते इति भावः। अन्ये तु 'भोगानां तु विशेषेषु वैचित्र्यं लभ्यते क्वचित्' इत्यस्य स्वेनानुभूयमानेषु विषयकृतानेकत्वयुक्तेषु मध्ये एकस्मिन् आनन्दे अत्यन्तमासक्तचित्तस्य शक्त्यात्मना प्रागपि स्थिते कस्मिंश्चिदानन्दे वनितादिभोगविशेषैः व्यक्त्याख्यं वैचित्र्यं लभ्यत इत्यर्थमाहुः। न चात्रानन्दवैचित्र्यं प्रति भोगवैचित्र्यस्य कारणत्वोक्तेः प्रागुक्तो वृद्ध्यादौ कारणाभावहेतुरसिद्ध इति वाच्यम्। बहुतरवृद्ध्यादिकारणशून्यत्वादिति हेतोर्विशेषणात्। इति नारायणतन्त्रे विवक्षितार्थो विवृत इति शेषः॥

॥ इति स्थित्यधिकरणम्॥

॥ ११. अनावृत्त्यधिकरणम्॥

(पुनरावृत्तिरहितो मुक्तः)

सू — ॐ॥ अनावृत्तिः शब्दादनावृत्तिः शब्दात्॥ ॐ॥ २३॥

'न च पुनरावर्तते न च पुनरावर्तते' (छा. ८-१५-१) 'सर्वान् कामानाप्त्वाऽमृतः समभवत् समभवत् (ऐ. आ. २-५-१-१५) इत्यादिश्रुतिभ्यः॥ २३॥

अत्राधिकरणे ब्रह्म प्राप्य भोगान् भुञ्जानस्य मुक्तस्यापुनरावृत्तिः समर्थ्यते। अस्ति मुक्तस्य पुनरावृत्तिः। स्वर्गादिगतानां पुनरावृत्तिदर्शनात्। नच स्वर्गादिगतानां युगमन्वन्तरादिमात्रवासित्वाद् युक्ता पुनरावृत्तिः, न तु मुक्तस्य, तस्य समस्तकालवासित्वादिति वाच्यम्। समस्तस्यापि कालस्य कदाचित् समाप्तिसम्भवात्। नच कालस्यानन्तत्वात् समाप्त्ययोगः। भारतयुद्धे दुर्योधनपातसमये महोत्पातसूचनाय त्रयोदश्या एव पञ्चदशीत्वदर्शनात्। तत्र

तिथित्रयस्य युगपत् समाप्तिवदनन्तत्वेऽपि कालस्य समस्तस्यापि युगपत् समाप्तिसम्भवात्। यथाऽऽह भारते व्यासः -

'चतुर्दशीं पञ्चदशीं भूतपूर्वां तु षोडशीम्।
इमां तु नाभिजानामि अमावास्यां त्रयोदशीम्॥' इति॥

अस्यार्थः तिथिक्षयपक्षे 'पञ्चदशीं' पञ्चदशदिनत्वयोग्याम् अमावास्यां 'चतुर्दशीं' चतुर्दशदिनसम्बन्धिनीं भूतपूर्वां जानामि प्रतिपदमारभ्य क्षये सति। वृद्धौ च 'षोडशीं' षोडशदिनजातामपि भूतपूर्वामिति जानामि। 'इमाम्' अवस्थां नाभिजानामि। काऽसाववस्थेत्यत आह- **अमावास्यां त्रयोदशीमिति**। अमावास्यां 'त्रयोदशीं' त्रयोदशदिने जातां नाभिजानामीति। अतो मुक्तौ पुनरावृत्तिसद्भावादपुरुषार्थत्वं मुक्तेरिति पूर्वपक्षे सिद्धान्तयत् सूत्रमुपन्यस्य तदुपात्तश्रुतिमेवोदाहरति- **अनावृत्तिरिति**॥ अत्र मुक्तस्यानावृत्तिरेव, नतु भारतयुद्ध इव युगपत् सर्वकालस्यापि समाप्त्या स्वर्गवन्मुक्तस्थानात् 'पुनरावृत्तिः' संसारं प्रत्यागतिरिति प्रतिज्ञावाक्यार्थस्य स्फुटत्वात् शब्दादिति हेतुमात्रं व्याचष्टे- **नचेति**॥ छन्दोगश्रुतौ - 'स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते' (छा. ८-१५-१) इति पूर्ववाक्ये प्रकृतो मुक्तः ब्रह्मलोकं हित्वा पुनः 'नावर्तते' न संसृतिं प्राप्नोतीत्यर्थः। चशब्द एवार्थः। शब्दादित्येतत् प्रकारान्तरेण व्याचष्टे- **सर्वानिति**॥ ऐतरेये द्वितीयारण्यके 'स एवं विद्वानस्माच्छरीरभेदादूर्ध्व-मुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत्समभवत्' (ऐ. आ २-५-१-१५) इति श्रूयते। अस्यायमर्थः- 'सः' उपासक एवं विद्वान् 'अस्माच्छरीरभेदात्' शरीरसम्बन्धात् 'ऊर्ध्वमुत्क्रम्य' ब्रह्मनाड्योत्क्रम्य 'अमुष्मिन् स्वर्गे लोके' स्वरानन्दो विष्णुरत्र गत इति व्युत्पत्त्या विष्णुलोके 'अमृतो' मुक्तः सन् 'सर्वान् कामान्' अपेक्षितसर्ववस्तूनि 'आप्त्वा' स्वीकृत्य 'समभवत्' तानेव सर्वान् कामाननुभवतीति। आदिपदेन 'यो वा एतामुपनिषदं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति' (केन. ४-९) इति तत्वप्रदीपोदाहृततलवकारश्रुतिर्गृह्यते। 'स्वर्गे' स्वरूपभूतरमणज्ञानवति 'लोके'

प्रकाशरूपे 'ज्येये' श्रेष्ठे विष्णावित्यर्थः। अनेन शब्दादित्येतदनावृत्तिबोधकशब्दात्, तथा सर्वकामावाप्तिप्रतिपादकशब्दात्, तथा सर्वपापक्षयपूर्वकमनन्तलोक-प्राप्तिबोधकशब्दादित्यनेकधा व्याख्यातं भवति। आदिपदोपात्तश्रुत्यपेक्षया श्रुतिभ्य इति बहुवचनप्रयोगः। समस्तशास्त्रार्थस्यैवमेवेत्यवधारणार्था समस्तसूत्रस्य द्विरुक्तिः। पूर्वपक्ष्युक्ता समस्तकालसमाप्तिस्तु कालसमाप्तेः क्वचित् काल एव वक्तव्यत्वेन व्याहतत्वादुपेक्षणीया।

अत्रायमाचार्योक्तोऽध्यायार्थसङ्ग्रहः- येऽप्रतीकालम्बनाः देवाः भगवज्ज्ञान-भोगाभ्यां निवृत्तसमस्तानिष्टकर्माणः चेतनोत्क्रमणात् प्रागेव देहनाशादर्चि-रादिलोकानां च नष्टत्वादुत्क्रमणेनार्चिरादिमार्गेण च रहितास्तत्वेतरदेवाः अण्डलयकाले तत्वदेवाः अण्डलयानन्तरं यथायोग्यं स्वस्वोत्तमप्रवेशेन परित्यक्तदेहाः स्वोचितेन पथा गरुडमार्गेण शेषमार्गेण च पुन्नामकहिरण्यगर्भेण सह वैकुण्ठवासिनं भगवन्तं प्राप्तास्तेन सह विरजास्नानेन भिन्नलिङ्गशरीराः विध्वस्तप्रकृतयः अत्यन्तनिवृत्तानिष्टा भवन्ति। ये तु ऋषयः देवानुगाः पितरः प्रतीकालम्बनाः भगवदपरोक्षानन्तरं भगवज्ज्ञानभोगाभ्यां निवृत्तसमस्तानिष्टकर्माणः उत्क्रमणेन त्यक्तदेहाः अर्चिरादिपथा यथायोग्यस्थाने स्थिताः अण्डलयकाले स्वोत्तमान् प्रविष्टाः वैकुण्ठवासिनं हरिं प्राप्ताः हिरण्यगर्भेण सह विरजास्नानेन भिन्नलिङ्गशरीराः विध्वस्तप्रकृतयः अत्यन्तनिवृत्तानिष्टा भवन्ति। ये तु मनुष्योत्तमाः निष्कामुकभगवदर्थश्रुत्यादिविहितकार्यानुष्ठानेन शुद्धान्तःकरणाः प्रक्षीणरागादिदोषाः सञ्जातभगवद्भक्तिमन्तः श्रवणमनन-निदिध्यासनाभ्यासवन्तः परमभागवताः स्वयोग्यभगवदपरोक्षानन्तरमत्यन्त-निवृत्तानिष्टसञ्चितकर्माणः आगामिदुष्कर्म-लेपविधुराः यावत्प्रारब्धं भागवतधर्मनिष्ठाः उत्तरायणमार्गेण त्यक्तदेहाः भगवल्लोकगमनार्थमर्चिरादिपथा महरादिलोके समासीनाः लयकाले स्वोत्तम-प्रवेशेनोर्ध्वं गताः ब्रह्माण्डलयानन्तरं लिङ्गशरीरभङ्गकाले उपस्थिते सुषुम्नामार्गेण त्यक्तान्यदेहाः हिरण्यगर्भेण सह विरजास्नानेन भिन्नलिङ्गशरीराः प्रध्वस्तस्व-गुणाच्छादिकाः विध्वस्तप्रकृतयः अत्यन्तनिवृत्तानिष्टा भवन्ति। ये त्वत्यल्पाः

मानुषाः स्थावरादयश्च एकगुणोपासकाः कार्यब्रह्मकालान्त्यभागे स्वस्व-योग्यावतारापरोक्षिणः उत्क्रमणार्चिरादिमार्गरहिताः प्रभुक्तात्यल्पप्रारब्धकर्माणः अण्डलयकाले स्वोत्तमप्रवेशेनोर्ध्वं गताः ब्रह्मणा सह त्यक्तलिङ्गशरीराः विध्वस्तप्रकृतयोऽत्यन्तनिवृत्तानिष्टाः भवन्ति। ते सर्वेऽपि महाप्रळये भगवदुदरे स्थित्वा पुनस्सृष्टौ भगवल्लोकाविर्भावे श्वेतद्वीपगतभगवद्दर्शनेनापगतभगवदिच्छा-वरकाः सम्यगाविर्भूतज्ञानानन्दादिगुणाः वासुदेव-परिकल्पितस्वस्वयोग्यस्थानेषु स्थिताः भगवन्तमुपासीनाः सयुजः भगवद्देहे बहिश्च अन्ये बहिरेव स्वरूपदेहेन लीला-गृहीतविग्रहैर्वा सङ्कल्पमात्रसाध्यान् दिव्यान् भोगान् तारतम्येन भुञ्जानाः न कदाचित् पुनरावर्तन्त इति।

ज्ञानानन्दादिभिः सर्वैर्गुणैः पूर्णाय विष्णवे।
नमोऽस्तु गुरवे नित्यं सर्वथाऽतिप्रियाय मे॥

अथायं भाष्यकारो यं गुणगणार्णवतया आदौ प्रतिपादितवान्। यच्छिष्यतया चैतादृशीमतिविशदां संविदं लब्धवान्। यस्मिंश्चात्मनो निरुपाधिकप्रीतिस्तमेव देवतात्वेन गुरुत्वेन चान्तेऽपि नमति- ज्ञानेति॥ गुणैरित्यस्य विवरणम्- सर्वै-रिति॥ अनेन नम्यताप्रयोजकं विशिष्टत्वमुक्तं भवति। 'गुरवे' इति निमि-त्तान्तरोक्तिः। 'सर्वथा' सर्वस्मात् सर्वप्रकारेण 'अतिप्रियो' निरुपाधिकप्रियः। अनेनेष्टत्वं, ब्रह्मशब्दसमानार्थकविष्णुशब्दप्रयोगेण ब्रह्मविचारात्मकशास्त्राधिकृतत्वं, सूत्रसङ्ख्या चोक्ता भवति।

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
वट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत्।

वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः।
मध्वो यत्तु तृतीयकं कृतमिदं भाष्यं हरौ तेन हि॥

नित्यानन्दो हरिः पूर्णो नित्यदा प्रीयतां मम ।
नमस्तस्मैनमस्तस्मैनमस्तस्मै च विष्णवे ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यप्रणीते श्रीमद्ब्रह्मसूत्रभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः ॥

अथ स्वभाषितभाष्यस्याप्तिमूलत्वसमर्थनाय श्रुतिप्रसिद्धं स्वस्य परमाप्तत्वं दर्शयन्नाह- **यस्येति** ॥ यद्वा - मुमुक्षोर्भगवज्ज्ञानस्येव स्वज्ञानस्याप्यपेक्षितत्वात् स्वस्वरूपं ख्यापयन् स्वकृतिं भगवति समर्पयति- **यस्येति** ॥ 'यस्य' वायोः वायुनामकस्य देवस्य 'बळित्था' इत्यादिवेदवचनेऽलं 'दिव्यानि' क्रीडादि-गुणयुक्तानि अत्यन्तप्रकाशवन्ति स्तुत्यानि देवसेव्यानि च त्रीणि रूपाणि उदितानि, तस्य यत् तृतीयं रूपं तेनेदं श्रीमद्ब्रह्मसूत्रभाष्यं 'हरौ' हरिविषयतया कृतमित्य-न्वयः । 'हि' प्रसिद्धौ । तत्वप्रदीपे तु 'मध्वो यत्तु तृतीयमेतदमुना भाष्यं कृतं केशवे' इति पठित्वा 'यस्य त्रीणि' इति श्लोकानन्तरं 'ज्ञानानन्दादिभिः' इति श्लोकोऽवतारितः । कीदृशं चास्य मूलं, किञ्च स्वरूपं, कानि च त्रीणि रूपाणि कीदृशानि च, तत्राह- **अलमिति** ॥ तस्य वायोः 'तत्' मूलरूपं 'बट्' बलात्मकं 'दर्शतं' ज्ञानरूपं ज्ञानात्मकं ततमिति वा । अनेन केन निमित्तेन तन्मूलं वायुनामकमिति प्रश्नस्याप्युत्तरमदायि । वशब्दस्य बलवाचित्वात् अयतेर्ज्ञानार्थत्वात् तन्मूलं 'भर्गः' सकारान्तोऽयं शब्दः । जगद्भरणगमनगुणं 'महत्' महनीयं च । मूलरूपादवताररूपस्येन्द्रार्जुनादेरिव गुणवैषम्यं न मन्तव्यमित्याह- **इत्थमे-वेति** ॥ यदुक्तगुणं तन्मूलरूपं यद्गुणकं तद्गुणकमेवावतारायापि भगवता 'निहितं' प्रेरितमवतीर्णं चेत्यर्थः । त्रयाणामपि रूपाणां सत्र्यापारं नामान्याह- **रामेत्या-दिना** ॥ 'प्रथमकं' प्रथमं वपुः हनुमदाख्यं 'रामवचोनयं' रामवचांसि सीतां प्रति नीतवत् । रामविषयवचांसि मूलरामायणरूपाणि शिष्येषु नीतवद् वा । रामस्य वचसि यो नयो न्यायः आज्ञारूपः तद्युक्तं वा । तथात्वे बहुव्रीहिः । द्वितीयं वपुः भीमनामकं कुरुपृतनाक्षयकारित्वात् पृक्षः । यत्तु तृतीयकं 'तन्मध्वः'

मध्वनामकमानन्दरूपस्य हरेः प्रतिपादकशास्त्रकृत्त्वात् । आनन्दसन्दायि-सुशास्त्रनिर्मातृत्वाद् वा ।

यथोक्तम् - **'मध्वित्यानन्द उद्दिष्टो वेति तीर्थमुदाहृतम् ।।'** इति ।।

अतः परमाप्ततमप्रणीतत्वादिदं भाष्यं सकलैः सुजनैरादरेणाङ्गीकार्यमिति भावः ।

।। इत्यनावृत्त्यधिकरणम् ।। ११ ।।

भाष्यान्ते 'नित्यानन्द' इति श्लोकान्तरं क्वचित् पठ्यते । तस्येत्थं गमनिका-भक्त्यतिशयात् पौनःपुन्येन प्रीतिप्रार्थनपूर्वकं विष्णुं नमति - **नित्येति** ।। नित्यानन्दो देशकालगुणैः 'पूर्णः' अपरिच्छिन्नो हरिः 'नित्यदा' सर्वदा मम प्रीयताम् । तस्मै विष्णवे मम नमश्चास्त्वित्यन्वयः ।

कुशाग्रबोधैर्जयतीर्थपादैः कृतामहं व्याकृषि सूत्रभाष्यम् ।
टीकां तथाऽऽर्योरुवचोऽनुसृत्य ततोऽनुवक्तुर्न भवेन्ममाधः ।।

मन्मानसाम्बुजस्थेन हरिणा कृतयाऽञ्जसा ।
भाष्यदीपिकया कृष्णः प्रीयतां कमलाकरः ।।

।। इति श्रीमत्परमहंसपरिव्राजकाचार्याणां सर्वतन्त्रस्वतन्त्राणां श्रीमद्रघुनाथतीर्थपूज्यपादानां शिष्येण श्रीमज्जगन्नाथयतिना कृतायां श्रीमद्ब्रह्मसूत्रभाष्यदीपिकायां चतुर्थाध्यायस्य चतुर्थ पादः ।।

।। चतुर्थाध्यायः समाप्तः ।।

।। श्रीमद्ब्रह्मसूत्रभाष्यदीपिका सम्पूर्णा ।।

॥ सूत्रदीपिका ॥

चतुर्थाध्यायस्य प्रथमः पादः

॥ आवृत्त्यधिकरणम् ॥ १ ॥

१. ॐ आवृत्तिरसकृदुपदेशात् ॐ

ज्ञानार्थं श्रवणादीनामावृत्तिः कार्या। कुतः? असकृदुपदेशात् बहुवारं श्वेतकेतुं प्रति उद्दालकेन परतत्वस्योपदिष्टत्वादित्यर्थः ॥ १ ॥

२. ॐ लिङ्गाच्च ॐ

भृगुणा श्रुतस्य पुनरालोचनेनापरोक्षितत्वरूपलिङ्गदर्शनाच्चावृत्तिः कर्तव्येत्यर्थः ॥ २ ॥

॥ आत्माधिकरणम् ॥ २ ॥

३. ॐ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॐ

तुशब्द एवार्थे। आत्मा विष्णुः । आत्मेति मम स्वामी इति। उपास्य एव। कुतः? यस्माज्ज्ञानिनः तथोपगच्छन्ति जानन्ति उपासते च शिष्यान् प्रति ग्राहयन्ति उपदिशन्ति च। तस्मादित्यर्थः ॥ १ ॥

॥ न प्रतीकाधिकरणण् ॥ ३ ॥

४. ॐ न प्रतीके न हि सः ॐ

प्रतीके नामाद्यधिष्ठानविषये आत्मेत्युपास्तिर्न कार्या। किन्तु तद्गततया। कुतः? स विष्णुः। हि यस्मात्। नामादिप्रतीकं न भवति तस्मादित्यर्थः ॥ १ ॥

॥ ब्रह्माधिकरणम् ॥ ४ ॥

५. ॐ ब्रह्मदृष्टिरुत्कर्षात् ॐ

ब्रह्मणि परमेश्वरे । **ब्रह्मदृष्टिः** पूर्णत्वोपास्तिः कार्या । कुतः? **उत्कर्षात्** । पूर्णत्वस्योत्कृष्टतया तथोपास्तेरप्युत्कृष्टत्वादित्यर्थः ॥ १ ॥

॥ आदित्याधिकरणम् ॥ ५ ॥

६. ॐ आदित्यादिमतयश्चाङ्ग उपपत्तेः ॐ

अङ्गे भगवदङ्गे । आदित्यादिभिर्देवैः **आदित्यादिमतयः** आदित्याद्याश्रयाङ्गत्वोपासना कार्या । कुतः? **उपपत्तेः** तेषां तत्प्रवेशस्यापेक्षितत्वेन तथोपासनस्य युक्तत्वादित्यर्थः ॥ १ ॥

॥ आसीनाधिकरणम् ॥ ६ ॥

७. ॐ आसीनः सम्भवात् ॐ

जिज्ञासु**रासीनः** आसने उपविशन्नेव उपासनं कुर्यात् । कुतः? **सम्भवात्** तस्यासने सत्येव युक्तत्वादित्यर्थः॥ १ ॥

८. ॐ ध्यानाच्च ॐ

अविच्छिन्नस्मृतिरूपोपासनस्यैव **ध्यानत्वात्** तदपेक्षयैवासननियमाभ्युपगमान्न स्मरणोपासनमादाय व्यभिचार इत्यर्थः ॥ २ ॥

९. ॐ अचलत्वञ्चापेक्ष्य ॐ

न केवलं प्रत्याहारादिना मनोविक्षेपाभावो भवति । किन्त्व**चलत्वं चापेक्ष्य** शरीराचलत्वं चापेक्ष्य । अतस्तदर्थं आसीन एव ध्यायेदित्यर्थः ॥ ३ ॥

१०. ॐ स्मरन्ति च ॐ

स्मृतिकर्तारः कृष्णादयः । आसननियममावश्यकमित्येतमर्थं 'समं कायशिरोग्रीवम्'[१] इति **स्मरन्ति** इत्यर्थः ॥ ४ ॥

११. ॐ यत्रैकाग्रता तत्राविशेषात् ॐ

यत्र यस्मिन् देशे काले । आसने च **एकाग्रता** ध्यानस्यैकनिष्ठता भवति । **तत्र** एव तस्मिन् देशे काले आसन एव ध्यानं कुर्यात् । कुतः? **अविशेषात्** देशकालादिना ध्यानज्ञानयोर्विशेषाभावादित्यर्थः ॥ ५ ॥

॥ आप्रायणाधिकरणम् ॥ ७ ॥

१२. ॐ आ प्रायणात्तत्रापि हि दृष्टम् ॐ

मुमुक्षुणा **आ प्रायणात्** मोक्षपर्यन्तम् । ध्यानं कर्तव्यमेव । कुतः? **हि** यस्मात् । **तत्रापि** मोक्षेऽपि । **दृष्टं** ध्यानं श्रुतं स्मृतञ्च । तस्मादित्यर्थः ॥१॥

॥ तदधिगमाधिकरणम् ॥ ८ ॥

१३.ॐ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॐ

तदधिगमे तस्य ब्रह्मणः अधिगमे अपरोक्षज्ञाने सति । **उत्तरपूर्वाघयोः** अपरोक्षज्ञानोत्तरपूर्वकालीनाघयोः । **अश्लेषविनाशौ** उत्तरस्याश्लेषः पूर्वस्य विनाशश्च । भवतीति ज्ञायते । कुतः? **तद्व्यपदेशात्** तयोः अश्लेषविनाशयोः 'तद्यथा'[२] इति श्रुतावुक्तत्वादित्यर्थः ॥ १ ॥

१४. ॐ इतरस्याप्येवमसंश्लेषः पाते तु ॐ

तुशब्दोऽनुत्थानवाची । **इतरस्य** भगवज्ज्ञानीतरद्वेषिणः । **पाते तु** अनुत्थान-तमःपाते प्रत्यासन्ने । तदर्थमितरस्य पापेतरपुण्यस्यापि एवं ज्ञानिपापवत् । **असंश्लेषः** उत्तरस्यासंश्लेषः पूर्वस्य विनाशश्च भवतीत्यर्थः ॥ २ ॥

---

१. '– धारयन्नचलं स्थिरः । सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्' (गीता.६–१३)

२. 'तद्यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न लिप्यते' (छां.४.१४.३)

१५. ॐ अनारब्धकार्ये एव तु पूर्वे तदवधेः ॐ

तुशब्दश्चार्थः। **पूर्वे** विष्णुद्वेषज्ञानपूर्वकालीने। **अनारब्धकार्ये एव** अप्रारब्ध-कार्ये एव पुण्यपापे विनश्यतः। कुतः? **तदवधेः** तस्य मोक्षस्य प्रारब्धकर्मनिवृत्त्य-वधित्वश्रुतेः स्मृतेश्चेत्यर्थः ॥ ३ ॥

१६. ॐ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॐ

तुशब्दो विशेषद्योतकः। **अग्निहोत्रादि** जिज्ञासुब्रह्मज्ञानिकृताग्निहोत्राद्यकाम्य-कर्म। **तत्कार्यायैव** ज्ञानमोक्षोभयकार्यायैव भवति। कुतः? **तद्दर्शनात्** तथा 'न हास्य'[१] इति श्रुतावुक्तत्वादित्यर्थः ॥ ४ ॥

१७. ॐ अतोऽन्यदपीत्येकेषामुभयोः ॐ

अतः प्रारब्धाकाम्यकर्मणः। **अन्यत्** भिन्नं ज्ञानात् पूर्वोत्तरकाम्यं पुण्यं अनिष्टं अप्रारब्धञ्च विनाशाश्लेषौ प्राप्नोति। कुतः? यत इत्येवं **प्रकारेणैकेषां** शाखिनां शाखासूभयोर्ज्ञानोत्तरपूर्वयोः अप्रारब्धानभीष्टयोः काम्यपुण्ययोः परित्यागेन पाठोऽस्ति। अत इत्यर्थः ॥ ५ ॥

१८. ॐ यदेव विद्ययेति हि ॐ

ज्ञानिकृतमल्पमपि पुण्यमक्षयफलं भवति। कुतः? **हि** यस्मात् **'यदेव विद्यया'**[२] **इति** श्रुतिरस्ति। अत इत्यर्थः ॥ ६ ॥

---

१. 'स एनमविदितो न भुनक्ति यथा वेदो वा अननूक्तोऽन्यद्वा कर्माकृतं यदि ह वा अप्यनेवविन्महत्पुण्यं कर्म करोति तद्धास्यान्ततः क्षीयत एवात्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न **हास्य कर्म** क्षीयतेऽस्माद्धयेवात्मनो यद्यत्कामयते तत्तत्सृजते' (बृ. ३-४-१५)

२. 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छां. १-१-१०)

१९. ॐ भोगेन त्वितरे क्षपयित्वाऽथ सम्पत्स्यते ॐ

तुशब्दो ज्ञानिनः प्रारब्धभोगोपमर्दरूपविशेषद्योतकः। ज्ञानी **भोगेन** भोगानुभवेन। **इतरे** प्रारब्धपुण्यपापे। **क्षपयित्वा** विनाश्य। **अथ** अनन्तरम्। नियमेन **सम्पत्स्यते** ब्रह्म प्राप्नोति। एवं ब्रह्मद्विट् तमः प्राप्नोतीत्यर्थः ॥ ७ ॥

इति श्रीजगन्नाथयतिकृतायां सूत्रदीपिकायां
चतुर्थाध्यायस्य प्रथमः पादः ॥ ४ ॥ १ ॥

—०—

चतुर्थाध्यायस्य द्वितीयः पादः

॥ वाङ्मनसाधिकरणम् ॥ १ ॥

१. ॐ वाङ्मनसि दर्शनाच्छब्दाच्च ॐ

वाक् वागभिमानिन्युमापदगृहीता वारुणी सौपर्णी च । **मनसि** मनोऽभिमानिरुद्रशब्दितशेषे गरुडे च विलीयते । कुतः? वाचो मनोऽधीनत्वादिति शेषः । तत्कथम्? **दर्शनात्** तस्य प्रत्यक्षसिद्धत्वात् । किञ्च **शब्दाच्च** तथा श्रुतेश्चेत्यर्थः ॥ १ ॥

२. ॐ अत एव च सर्वाण्यनु ॐ

चशब्दोऽप्यर्थः । सर्वाणि दैवतान्यपि । **अनु** यथाऽनुकूलम् । स्वस्वयोग्येषु देवेषु लीयन्ते । कुतः? अत एव 'अग्नौ'[1] इति श्रुतेरेवेत्यर्थः ॥ २ ॥

॥ मनःप्राणाधिकरणम् ॥ २ ॥

३. ॐ तन्मनः प्राण उत्तरात् ॐ

तन्मनः पूर्वोक्तमनोऽभिमानी शेषः सुपर्णश्च । **प्राणे** तच्छब्दितचतुर्मुखे । लीयते । कुतः? **उत्तरात्** 'मनः प्राणे'[2] इत्युत्तरवाक्यादित्यर्थः ॥ १ ॥

॥ अध्यक्षाधिकरणम् ॥ ३ ॥

४. ॐ सोऽध्यक्षे तदुपगमादिभ्यः ॐ

---

१. 'अग्नौ सर्वे देवा विलीयन्ते अग्निरिन्द्रे इन्द्र उमायां उमा रुद्रे विलीयते एवमन्यानि देवतानि यथाऽनुकूलम्' (गौपवनश्रुतिः) २. (छां.६-१५-१)

सः चतुर्मुखः **अध्यक्षे** अधिपतौ परमात्मनि लीयते। कुतः? **तदुपगमादिभ्यः** परमात्मप्राप्त्यादिप्रतिपादकेभ्यः 'सर्व'[१] इत्यादिश्रुतिभ्य इत्यर्थः ॥ १ ॥

॥ भूताधिकरणम् ॥ ४ ॥

५. ॐ भूतेषु तच्छ्रुतेः ॐ

विशिष्योक्तेभ्योऽन्येभ्यो देवाः। **भूतेषु** पञ्चभूतेषु। लीयन्ते। कुतः? **तच्छ्रुतेः** 'भूतेषु देवाः'[२] इति श्रुतेश्चेत्यर्थः ॥ १ ॥

॥ नैकस्मिन्नधिकरणम् ॥ ५ ॥

६. ॐ नैकस्मिन् दर्शयतो हि ॐ

नैकस्मिन् अग्नावेव सर्वे देवा न लीयन्ते। किन्तु यथायोगं सर्वभूतेषु। कुतः? **हि** यस्मात् **दर्शयतः** 'पृथिव्यामृभवः'[३] इति 'ऋभवः पृथिव्याम्'[३] इति महोपनिषच्चतुर्वेदशिखे च तथा प्रतिपादयतः। तस्मादित्यर्थः ॥ १ ॥

॥ समनाधिकरणम् ॥ ६ ॥

७. ॐ समना चासृत्युपक्रमादमृतत्वञ्चानुपोष्य ॐ

आद्यश्चो नञ्रः समाकर्षणार्थः। 'द्वौ वाव'[४] इति श्रुतिसमुच्चयो द्वितीयः। तथाच लक्ष्मीर्न लीयते। कुतः? यतस्तस्याः **अनुपोष्य** परमात्मानमनुपास्यैव।

---

१. '**सर्वे** प्राणमुपगच्छन्ति प्राणः परमुपगच्छति प्राणं देवा अनुप्राणन्ति प्राणः परमनुप्राणिति तस्मादाहुः प्राणस्य प्राण इति', 'प्राणः परस्यां देवतायाम्'

२. '**भूतेषु देवा** विलीयन्ते भूतानि परे न पर उदेति नास्तमेत्येकल एव मध्ये स्थाता' (बृहच्छ्रुतिः)

३. '**पृथिव्यामृभवो** विलीयन्ते वरुणेऽश्विनावग्नावग्नयो वायाविन्द्रः सोम आदित्यो बृहस्पतिरित्याकाश एव साध्या विलीयन्ते', ' 'मृत्यवः पृथिव्यां वरुण आपोऽग्नयस्तेजसि मरुतो मारुत आकाशे विनायका विलीयन्ते' (महोपनिषच्चतुर्वेदशिखा.)

४. '**द्वौ वाव** सृत्यनुपक्रमौ प्रकृतिश्च परमश्च द्वावेतौ नित्यमुक्तौ नित्यौ च सर्वगतौ चैतौ ज्ञात्वा विमुच्यत इति' (बृहच्छ्रुतिः)

अमृतत्वं नित्यमुक्तत्वम् । तत्कुतः? **असृत्युपक्रमात्** कदाऽपि संसारोपक्रमाभावात् । सोऽपि कुतः? यतः **समना** देशतः कालतः समो ना परमपुरुषो यस्याः सा समना तस्मादित्यर्थः ॥ १ ॥

८. ॐ तदपीतेः संसारव्यपदेशात् ॐ

तस्यां प्रकृतौ । **अपीतेः** लयस्य । **संसारव्यपदेशात्** 'विलीनो'[1] इति संसारहेतुत्वश्रुतेः न मोचकेश्वरसाम्यं प्रकृतेरित्यर्थः ॥ २ ॥

९. ॐ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॐ

प्रकृतेरपि **सूक्ष्मं** ब्रह्म **प्रमाणतः** ज्ञानानन्दादिगुणपरिमाणतश्चाधिकम् । कुतः? **तथोपलब्धेः** 'सर्वतः'[2] इति तथा श्रुतेः । अतोऽपि प्रकृतेः न ब्रह्मसाम्यमित्यर्थः ॥ ३ ॥

१०. ॐ नोपमर्देनातः ॐ

अतः साम्यतदभावयोः साधितत्वात् । **नोपमर्देन** स्वातन्त्र्यादिगुणाबाधेन । प्रकृतेः परमात्मना नित्यमुक्तत्वादिनैव साम्यमित्यर्थः ॥ ४ ॥

११. ॐ अस्यैव चोपपत्तेरूष्मा ॐ

ऊष्मावत्त्वानूष्मावत्वप्रतिपादिका 'द्विधा हीदम्'[3] इति श्रुतिरपि अस्यैव किञ्चित्साम्यरूपार्थस्यैवा उपपत्तेः घटनायोपपादिका भवतीत्यर्थः ॥ ५ ॥

---

१. 'समावेतौ प्रकृतिश्च परमश्च नित्यौ सर्वगतौ नित्यमुक्तौ असमावेतौ प्रकृतिश्च परमश्च **विलीनो** हि प्रकृतौ संसारमेति विलीनः परमे ह्यमृतत्वमेति' (सौपर्णश्रुतिः)

२. '**सर्वतः** प्रकृतिः सूक्ष्मा प्रकृतेः परमेश्वरः ।
ज्ञानानन्दौ तथैश्वर्यं गुणाश्चान्येऽधिकाः प्रभोः' (तुरश्रुतिः)

३. '**द्विधा हीदमम**वदृश्यते ऊष्मावदनूष्मावच्च । तत्रोष्मावत् परं ब्रह्म यत्र जिघ्रन्ति न पश्यन्ति न शृण्वन्ति न विजानन्ति । अथानूष्मावत्प्रकृतिश्च प्राकृतं च यत्र जिघ्रन्ति जिघ्रन्ति च यत्र पश्यन्ति पश्यन्ति च यत्र शृण्वन्ति शृण्वन्ति च यत्र जानन्ति जानन्ति च' (सौपर्णश्रुतिः)

१२. ॐ प्रतिषेधादिति चेन्न शारीरात् ॐ

प्रतिषेधात् ईश्वरस्यान्यसाम्यप्रतिषेधात्। प्रकृतेर्देशकालव्याप्त्यादिनाऽपि परमात्मना साम्यं न **इति चेन्न**। कुतः? यतः **शारीरात्** जीवेनैवेश्वरस्य साम्यं प्रतिषिध्यते न प्रकृतितः। अत इत्यर्थः ॥ ६ ॥

१३. ॐ स्पष्टो ह्येकेषाम् ॐ

हि यस्मात्। **एकेषां** शाखासु प्रकृतेः'अथ'[1] इति समाऽसमत्ववादः **स्पष्टोऽस्ति** तस्मादित्यर्थः ॥ ७ ॥

१४. ॐ स्मर्यते च ॐ

कृष्णादिभिरुक्तार्थे 'मत्स्य'[2] इति **स्मर्यते च** इत्यर्थः ॥ ८ ॥

॥ पराधिकरणम् ॥ ७ ॥

१५. ॐ तानि परे तथाह्याह ॐ

तानि सर्वाणि दैवतानि चतुर्मुखद्वारा। **परे** परमात्मनि। लीयन्ते। कुतः? **हि** यस्मात् **तथाऽऽह** 'सर्व'[3] इति श्रुतिः तथाऽऽह तस्मादित्यर्थः ॥१॥

॥ अविभागाधिकरणम् ॥ ८ ॥

१६. ॐ अविभागो वचनात् ॐ

---

१. 'अथातस्समाश्चासमाश्चाभिधीयन्ते समासमाश्चाथ समानि ब्रह्मणो रूपाणि यैरुत्पत्तिः स्थितिर्लयो नियतिरायतिश्चैकं ह्येवैतद्भवत्यथासमाः ब्रह्मेन्द्रो रुद्रः प्रजापतिर्बृहस्पतिर्ये के च देवा गन्धर्वा मनुष्याः पितरोऽसुरा यत्किञ्चेदं परमचरं चाथ समाऽसमा प्रकृतिर्वा समाऽसमा सैषा हि नित्या अजसा तद्वशा च' (माध्यन्दिनश्रुतिः)

२. 'मत्स्यकूर्मवराहाद्याः समा विष्णोरभेदतः।
ब्रह्माद्यास्त्वत्समा प्रोक्ताः प्रकृतिश्च समाऽसमा' (वाराहे)

३. 'सर्वे देवाः प्राणमाविश्य देवे मुक्ता लयं परमे यान्त्यचिन्त्ये' (कौषारवश्रुतिः)

भगवदिच्छातद्भक्तेच्छानाम्। **अविभागो** विषयैक्यम्। न तु विरोधः। कुतः? **वचनात्** 'एते देवाः'[1] इति श्रुतेरित्यर्थः ॥ १ ॥

॥ तदोकोऽधिकरणम् ॥ ९ ॥

१७. ॐ तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॐ

तस्मिन्नुत्क्रान्तिकाले। **तदोकोऽग्रज्वलनं** तस्य परमात्मनः ओकसः आश्रय-भूतस्य हृदयस्याग्रे ज्वलनं भवति। अथ **तत्प्रकाशितद्वारः** तेन प्रकाशेन विद्योतितमार्गः सन्। देहाज्जीव उत्क्रामति। ननु कथमेतद् युज्यते ? **विद्यासामर्थ्यात्** ज्ञानसामर्थ्यात्। **तच्छेषगत्यनुस्मृतियोगाच्च** विद्याङ्ग-प्राप्यस्मरणसाहित्याच्च। किञ्च **हार्दानुगृहीतः** हृदयस्थभगवदनुगृहीतः सन् याति। कया? **शताधिकया** सुषुम्नानाड्येत्यर्थः ॥ १ ॥

१८. ॐ रश्म्यनुसारी ॐ

रश्म्यनुसारी अन्तःस्थितादित्यप्रकाशानुसारी सन् जीवो निष्क्रामतीत्यर्थः ॥ २ ॥

१९. ॐ निशि नेति चेन्न सम्बन्धात् ॐ

ननु **निशि** आदित्यरश्मीनामभावात्। ज्ञानिनः उत्क्रमणं। **नेति चेन्न** न स्यादिति चेन्न। कुतः? **सम्बन्धात्** सूर्यरश्मीनां सर्वदा सम्बन्धादित्यर्थः ॥ ३ ॥

२०. ॐ यावद्देहभावित्वाद्दर्शयति च ॐ

---

१. 'एते देवा एतमात्मानमनुविश्य सत्याः सत्यकामाः सत्यसङ्कल्पा यथा निकाममन्तर्बहिः परि-चरन्ति' (गौपवनश्रुतिः)

यावद्देहभावित्वात् रश्मिसम्बन्धस्य यावच्छरीरभावित्वात् । रात्रावपि ज्ञानिनः उत्क्रमणं युक्तम् । कुतः? दर्शयति । **चो** यतः । दर्शयति 'संसृष्टा'[1] इति श्रुतिः तथा प्रतिपादयति अत इत्यर्थः ॥ ४ ॥

२१. ॐ अतश्चायनेऽपि हि दक्षिणे ॐ

चशब्दः प्रतिज्ञाद्वयसमुच्चये । **अपि** 'दक्षिणे मरणात्'[2] इति स्मृतिसत्वेऽपि । **दक्षिणे अयने** दक्षिणायनकाले । ज्ञानिनः उत्क्रान्तिर्युक्ता । कुतः? **अतः** सौररश्मिसहस्रनाडीसम्बन्धस्य तदाऽपि सत्वात् । **हि** यतः । एवं अतः दक्षिणायनदृष्टान्तेन रात्रावुत्क्रान्त्यभावो न वाच्य इत्यर्थः ॥ ५ ॥

॥ योग्यधिकरणम् ॥ १० ॥

२२. ॐ योगिनः प्रति स्मर्येते स्मार्ते चैते ॐ

चो यतः । **एते** ब्रह्मचन्द्रगती । **योगिनः प्रति** ज्ञानकर्मयोगिनः प्रति । **स्मर्येते** स्मृत्या उच्येते । **स्मार्ते च** स्वानुस्मृतिसाध्ये च । 'गति–'[3] इत्यादिना स्मर्येते । अतस्तयोर्न केवलं कालादिकृतत्वमित्यर्थः ॥ १ ॥

इति श्रीजगन्नाथयतिकृतायां सूत्रदीपिकायां
चतुर्थाध्यायस्य द्वितीयः पादः ॥ ४ ॥ २ ॥

—०—

---

१. '**संसृष्टा** वा एते रश्मयश्च नाड्यश्च नैषां वियोगो यावदिदं शरीरमत एतैः पश्यत्येतदुत्क्रामत्येतैः प्रवर्तते' (माध्यन्दिनायनश्रुतिः)

२. '**दक्षिणे मरणाद्** याति स्वर्गं ब्रह्मोत्तरायणे '

३. '**गत्यनुस्मरणाद्** ब्रह्म चन्द्रं वा गच्छति ध्रुवम् ।
अननुस्मरतः काले मरणं प्राप्य वै गतिः' (अध्यात्मे)

चतुर्थाध्यायस्य तृतीयः पादः

॥ अर्चिराद्यधिकरणम् ॥ १ ॥

१. ॐ अर्चिरादिना तत्प्रथितेः ॐ

उत्क्रान्तो ज्ञानी **अर्चिरादिना** मार्गेण गच्छति । कुतः? **तत्प्रथितेः** तस्य 'तेऽर्चिषमभिसम्भवन्ति'[१] इति श्रुतौ तस्यार्थस्य प्रसिद्धत्वादित्यर्थः ॥ १ ॥

॥ वायुशब्दाधिकरणम् ॥ २ ॥

२. ॐ वायुशब्दादविशेषविशेषाभ्याम् ॐ

अविशेषविशेषाभ्यां वायोः प्राप्यत्वश्रुतेः उभयपर्यालोचनया वायोः द्वितीय-प्राप्यत्वमेवेत्यर्थः ॥ १ ॥

॥ तटिदधिकरणम् ॥ ३ ॥

३. ॐ तटितोऽधि वरुणः सम्बन्धात् ॐ

तटितोऽधि तटित्प्राप्त्यनन्तरं **वरुणः** प्राप्यः । कुतः? **सम्बन्धात्** वरुणस्य तटित उपरि सम्बन्धादित्यर्थः ॥ १ ॥

॥ आतिवाहिकाधिकरणम् ॥ ४ ॥

४. ॐ आतिवाहिकस्तल्लिङ्गात् ॐ

---

१. 'तेऽर्चिषमभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षम्' (छां.५.१०.१)

पूर्वं द्वितीयप्राप्यत्वेनोक्तो वायुरातिवाहिक एव न मुख्यः। कुतः? तल्लिङ्गात्। पूर्वप्राप्यत्ववायुशब्दात्। अर्चिषः स इति रूपतद्धर्मादेरित्यर्थः ॥१॥

५. ॐ उभयव्यामोहात्तत्सिद्धेः ॐ

सप्तम्यर्थे पञ्चमी। उभयव्यामोहात् पूर्वोक्तवायुरातिवाहिको मुख्यो वा उत्तरोक्तवायुरातिवाहिको मुख्यो वेति सन्देहे। तत्सिद्धेः तेन दिवस्पतित्वविशेषणेन तस्य उत्तरोक्तस्य वायोर्मुख्यत्वसिद्धेर्नानिर्णय इत्यर्थः ॥ २ ॥

॥ वैद्युताधिकरणम् ॥ ५ ॥

६. ॐ वैद्युतेनैव ततस्तच्छ्रुतेः ॐ

ज्ञानी **वैद्युतेनैव** विद्युत्पतिना वायुनैव ब्रह्म गच्छति। न तु मध्ये ततः वायोरन्यः प्राप्योऽस्ति। कुतः? तच्छ्रुतेः तस्य वायोरेव 'स एनान् ब्रह्म गमयति'[१] इति ब्रह्मगमयितृत्वश्रुतेरित्यर्थः ॥ १ ॥

॥ कार्याधिकरणम् ॥ ६ ॥

७. ॐ कार्यं बादरिरस्य गत्युपपत्तेः ॐ

कार्यं उत्पत्तिमच्चतुर्मुखाख्यं ब्रह्म। वायुर्गमयतीति 'स' इति श्रुत्यर्थ इति **बादरिराचार्यो** मन्यते। कुतः? **अस्य** चतुर्मुखस्यैव। **गत्युपपत्तेः** प्राप्यत्वोपपत्तेरित्यर्थः ॥ १ ॥

८. ॐ विशेषितत्वाच्च ॐ

'यदि'[३] इति श्रुतौ प्राप्तव्यब्रह्मणश्चतुर्मुखपदेन विशेषितत्वात् **च** उक्तं युक्तमित्यर्थः ॥ २ ॥

---

१. (छां.४–१५–६) २. 'स एनान् ब्रह्म गमयति' (छां.४–१५–६)

३. 'यदि ह वाव परमभिपश्यति प्राप्नोति ब्रह्माणं चतुर्मुखं प्राप्नोति ब्रह्माणं चतुर्मुखम्' (कौषारवश्रुतिः)

९. ॐ समाप्यात्तु तद्व्यपदेशः ॐ

यतस्तद्व्यपदेशः 'ब्रह्मवित्'[1] इति परब्रह्मप्राप्तिश्रुतिः । **सामीप्यात्** चतुर्मुखं प्राप्याचिरेण परं प्राप्नोतीति कालसामीप्यादेव । तदनुसृत्यैव प्रवर्तते । अतो न तद्विरोध इत्यर्थः ॥ ३ ॥

१०. ॐ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॐ

कार्यात्यये महाप्रलये । **तदध्यक्षेण** सह कार्यस्वामिना चतुर्मुखेन सह । **अतः** चतुर्मुखात् । **परं** उत्तमं ब्रह्म । ज्ञानी गच्छति । **अभिधानात्** तथा श्रुतेरित्यर्थः ॥ ४ ॥

११. ॐ स्मृतेश्च ॐ

ब्रह्मणेति **स्मृतेर्विद्यमानत्वात्** **च** ज्ञानी चतुर्मुखेन सह परं प्राप्नोतीति सिद्ध्यतीत्यर्थः ॥ ५ ॥

१२. ॐ परं जैमिनिर्मुख्यत्वात् ॐ

ज्ञानी **परं** ब्रह्मैव प्राप्नोति । न तु कार्यब्रह्म । कुतः? **मुख्यत्वात्** ब्रह्मशब्दस्य परब्रह्मण्येव मुख्यत्वादिति **जैमिनिराचार्यो** मन्यत इत्यर्थः ॥ ६ ॥

१३. ॐ दर्शनाच्च ॐ

ज्ञानी परं ब्रह्मैव गच्छति । कुतः? तेन श्रवणादिभिः परब्रह्मण एव दृष्टत्वादित्यर्थः ॥ ७ ॥

१४. ॐ न च कार्ये प्रतिपत्त्यभिसन्धिः ॐ

इतोऽपि ज्ञानिनः कार्यब्रह्मप्राप्तिरनुपपन्ना । कुतः? **चो** यतः । **कार्ये** ब्रह्मणि विषये ज्ञानिनः **प्रतिपत्त्यभिसन्धिः** प्रतिपत्तिः उपास्तिः । अभिसन्धिः प्राप्नुवानीतीच्छा **न** अस्ति । अत इत्यर्थः ॥ ८ ॥

---

१. 'ब्रह्मविदाप्नोति परम्' (तै.२–१)

१५. ॐ अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ॐ

वायुप्रतीकालम्बनान् व्याप्तोपासकानधिकारिणः **नयति** परं ब्रह्म गमयति। अन्यान् **प्रतीकालम्बनान्** प्रतीकशब्दितदेहान्त उपासकान् कार्यब्रह्म नयतीति 'स एनान्'[1] इति श्रुत्यर्थ इति **बादरायणाचार्यो** मन्यते। कुतः? **उभयथा च दोषात्**। एनां व्यवस्थामनङ्गीकृत्य सर्वेषां एकैकप्राप्त्यङ्गीकारे कार्यब्रह्मपरब्रह्मप्राप्त्यङ्गीकारे कार्यब्रह्मपरब्रह्मप्राप्तिपक्षद्वयोक्तदोषप्राप्तेः। ननु 'यत्प्राप्तुरभिवाञ्छिति तत्प्राप्नोति'[2] इति वचनात् तत्तदिच्छामात्रेण तत्तत्प्राप्तिसम्भवान्नोक्तव्यवस्थाङ्गीकार्येत्यत आह– **तत्क्रतुश्चेति**। अनेन 'स यथा कामो भवति तत्क्रतुर्भवति'[3] इत्यादिश्रुतिर्गृह्यते। **च**शब्दो यत इत्यर्थे। यतः स यथेति श्रुतिस्तत्तत्प्राप्तीच्छामात्रेण तत्तत्प्राप्तिं प्रतिषिध्य तज्ज्ञानोपासनापरोक्षैरेव तत्प्राप्तिं वक्ति। अतस्तत्तदिच्छामात्रेणैव न तत्प्राप्तिर्युज्यते इत्यर्थः॥ ९॥

१६. ॐ विशेषं च दर्शयति ॐ

चो यतः। 'अन्तःप्रकाशा'[4] इति श्रुतिः केचनाप्रतीकालम्बनाः केचन प्रतीकालम्बना इति **विशेषं** भेदं **दर्शयति** प्रतिपादयति। तस्माच्चोक्तं युक्तमित्यर्थः॥ १०॥

इति श्रीजगन्नाथयतिकृतायां सूत्रदीपिकायां
चतुर्थाध्यायस्य तृतीयः पादः॥ ४॥ ३॥

---

१. 'स एनान् ब्रह्म गमयति' (छां.४–१५–६)

२. 'यदुपास्ते पुमान् जीवन्यत्प्रसुमभिवाञ्छति।
यच्च पश्यति तृप्तस्सन् तत्प्राप्नोति मृतेरनु' (पाद्मे)

३. 'स यथा कामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यते' (बृ.६–४–५)

४. 'अन्तःप्रकाशा बहिःप्रकाशाः सर्वप्रकाशाः।
देवा वाव सर्वप्रकाशा ऋषयोऽन्तःप्रकाशाः मनुष्या एव बहिःप्रकाशा' (चतुर्वेदशिखा.)

चतुर्थाध्यायस्य चतुर्थः पादः

॥ सम्पद्याधिकरणम् ॥ १ ॥

१. ॐ सम्पद्याविहाय स्वेन शब्दात् ॐ

ज्ञानी **सम्पद्य** ब्रह्म प्राप्य । **अविहाय** ब्रह्मानतिक्रम्य । **स्वेन** आविर्भूत-स्वरूपेणावस्थितः सन् भोगान् भुङ्क्ते । कुतः? **शब्दात्** 'स एवं वित्'[१] इति श्रुतेरित्यर्थः ॥ १ ॥

॥ मुक्ताधिकरणम् ॥ २ ॥

२. ॐ मुक्तः प्रतिज्ञानात् ॐ

